॥ श्रीः ॥

पंतविठ्ठलविरचितं

सुश्लोकलाघवम्

सद्वृत्ताख्यटीकया समेतं

इदं

बी. ए. उपपदधारिणा साने इत्युपनामधेयेन नारायणा-
त्मजेन काशिनाथशर्मणा बी. ए. पदवीधरस्य
गोडबोले इत्युपाह्वस्य बाळकृष्णसूनोः
नारायणशर्मणः साहाय्येन
प्रकाशितम्

द्वितीयावृत्तिः

शकाब्दाः १८१७.

MAHARAJAH SERFOJI'S SARASWATHI MAHAL LIBRARY TANJORE

प्रस्तावना.


पंडित **विठोबाअण्णा** कऱ्हाडकर यांच्या इतर कृतींप्रमाणेंच '**सुश्लोकलाघव**' प्रथमतः "**काव्येतिहाससंग्रह**" या मासिक पुस्तकात प्रसिद्ध झाले. त्याच वेळेस ते रा० रा० **नारायण बालकृष्ण** गोडबोले बी. ए. यांणीं "**संग्रहांत**" छापण्यासाठीं तयार केलें होतें. परंतु त्या वेळीं त्यांजकडे प्रूफ पाठविण्यास सवड न झाल्यामुळें ग्रंथात अशुद्धें बरीच राहिलीं. साप्रतच्या आवृत्तीचा बहुतेक सर्व भाग (पृष्ठे १५-शेवटपर्यंत) रा० **गोडबोले** यांणीं आपला अमूल्य वेळ खर्चून स्वतःच तपासिला हा मोठा लाभ झाला आहे. तथापि अजूनही काहीं अशुद्धें राहिलीं आहेत तीं शुद्धिपत्रात नमूद केलीं आहेत. 'सुश्लोकलाघवात' वर्णिलेल्या विषयाची अनुक्रमणिकाही आता जोडली आहे. तिचा हा ग्रंथ चाळण्यात बहुत उपयोग होईल. असो पूर्वीच्या आवृत्तीपेक्षा हल्लींची आवृत्ति लोकाश्रयास अधिक पात्र होईल अशी आशा आहे.

ही आवृत्ति काढताना लेखी प्रती बऱ्याच मिळाल्या होत्या. या प्रतींचा लाभ पुणें येथील राहणारे वे० रा० रा० श्रीधरशास्त्री लिमये यांणीं करून दिला, याबद्दल त्यांचे मजवर बहुत उपकार झाले आहेत. तरी काहीं स्थळें अद्यापिही संशयात्मक राहिलीं आहेत आणखी चांगल्या प्रती मिळाल्याशिवाय अशा स्थळांचा निर्णय होणें मुष्किल आहे. पुनरावृत्ति काढताना अशा लेखी प्रतींचा बहुत उपयोग होईल. म्हणून ज्यास अशा लेखी प्रती मिळतील त्यांणीं त्या मजकडे पाठविण्याची कृपा अवश्य करावी.

'**सुश्लोकलाघव**' प्रसिद्ध होण्याच्या कामीं रा० रा० **नारायण बाळकृष्ण गोडबोले** यांणीं जें प्रथमपासून साहाय्य केलें त्याजबद्दल त्यांचे आभार मोठ्या आनंदाने मानून हा लेख संपवितो.

काशिनाथ नारायण साने.

सुश्लोकलाघवग्रंथस्यानुक्रमणिका.



सुश्लोकलाघवस्य शोधनपत्रम्

पृष्ठ.	पङ्क्ति.	शुद्धम्.
		० नमाम्यहं ॥ १ ॥ वशीकरोति सद्भक्तिर्यस्मा सुश्लोकलाघवम् ॥ अतस्तन्नामिका टीकां कुर्वे विद्वन्मनोरमां ॥२॥ इह खलु कश्चित्पंतविठ्ठलाह्वयः कविर्नृणां चित्तचमत्कारविभावनादिमिषेण भगवदेकनिष्ठनामामिपादपिषु: कचन सुश्लोकलाघवनामानं प्रबंधमारप्स्यमानः शिष्टाचारप्राप्तं त्रिविधमपि मंगलमाचरति । तत्र वस्तुनिर्देशरूपमाह । भक्त°
„	१२	शृंगारादि
„	१६	भावशुद्धं ।
„	२६	हंसं समारूढा
२	९	प्रतिभा
„	१५	उत्कृष्टः। नीळकंठ
„	१६	राः स्वर्णे
„	१०	शांतत्वं
„	२१	निष्ठतया
„	२६	नामिकमिति
„	„	यतो हि सुश्लोकराघ°
„	२८	कृत्मावस्त्वा–
„	२९	प्रवृत्ति°

पृष्ठ.	पङ्क्ति.	शुद्धम्.
२	„	न त्याज्य
„	„	°विकी या
„	२९	प्रतिभा
३	२	°तन्निदा
„	११	जायेत चेतसि
„	१२	सहजः प्रमोदः
४	१७	सूरिभ्य
„	२६	नामशंपतैवा–
„	३०	प्रमोदोऽनिर्वचनीयानंदः
५	१	संसदः स्तंभ°
„	१२	सकलजग–
„	२८	ननु नडेन
५	१०	°न्मिथ्या ।
„	३१	न 'ग'घटितं
६	२	°स्य तान्
„	१२	स्यानोत्थितो
„	१९	सर्वत्र ज्ञातं
„	२०	वंध्याया बहू°
„	„	प्रमाता दृढं
„	२१	निबध्नाति
„	२३	। परार्धस्य
७	१०	चक्षुःश्रवोभूषितः
८	४	°नैवंप्युवाचेह
„	१९	मनोदेवो(?)
९	१३	जडैर्मूर्खैः
„	१५	विलोढनं
„	१६	उच्चैःश्रवा

पृष्ठ.	पंक्ति.	शुद्धम्.
९	२१	सुष्ठु
"	२६	धान्यसमृद्धिः (संसिद्धि- र्वा) च
१०	१४	पाणिनिस्मरणात्
"	१६	समुच्चयेन
"	२२	प्रभूततमसि
"	२७	इत्यर्थः ।
"	३०	°मुत्तमप्राप्ति प-
११	१	समृद्धः
"	२२	हृदविशिष्टेति
"	२८	सत्तारकः
"	३२	हरेर्द-
१२	६	विध्य
"	२०	सौष्ठव
१३	४	मनुष्य
"	११	राजकृपा मा रामा रा मा
"	"	कुमारसुखगरिमा
"	१८	वायुसुत
"	२०	तत्संघातः
१४	२७	त्रिषेण पे। पोपे।
१५	११	भज भज
१६	१	पतितानां ससारा°
"	१०	°द्ररसेन
"	१२	कुर्याद्.°
"	२८	पुतसुदर
१७	४	जीर्णज्वरो
"	२९	हरि
१८	२६	मनोरथशब्दप्रक्रियायां
"	"	मनस् रथ
१९	६	प्रकाश्यते

पृष्ठ.	पंक्ति.	शुद्धम्.
२०	७	खर्वश्च
"	२५	लोहं
२१	१२	स्वत्वं
"	१५	कर्तेति लुटःप्रथमपुरुष- स्यैकवचनम्
२२	१३	यः पुष्णाति ।
"	१४	ओदनप्रियश्च । कथैव
"	२४	समीर्वीकश्च ।
"	२६	मार्गणेभ्यो बाणेभ्यो
२३	२	मृषा मन्ये
"	३	नाशंक्य°
२५	६	प्रबंधा
"	१९	कौरवान्सु
२६	११	दुष्टोऽपि
"	१५	अपराचीना
२७	२०	घातुको हिंस्रः
२८	१	°संभृत°
"	४	°त्रानुतापे
"	१३	अन्यथावाचक
"	१८	गूढमाधुर्यं ।
"	"	वैराग्ये, ऊष्मणि च ।
"	२०	अन्यथा दार्ढ्य°
२९	१	सन्
"	१९	श्वेतकिरणः
"	२१	°त्वात्तत्संसर्गः
"	२३	°पुष्पाश्चन्द्र°
"	२६	अत्र सर्वेषामित्यस्य पूर्वं ' सर्वत्र ' इत्यधिकः पाठः
३०	१४	रामेतिसंसर्गनम्

पृष्ठ.	पंक्ति.	शुद्धम्.
३०	२२	रामेतिनाम°
३१	३	सृजति
"	६	समुद्धृत्य
"	१५	°ञ्चैतत्स्पृहय°
"	१८	इतः ।
३२	१३	°न्मुक्त्वैवाऽतः
"	१६	कृते
३३	१६	°हि ' इति
"	२१	°द्येवं मन्यसे
"	"	°इत्यक्षेवा°
"	२३	°श्रयमश्नाती°
३४	३	तात् स्थिता
३५	२१	°त्वात्त्प्रार्थयते
३६	२५	द्वैतं ।
३७	"	°नमेव कुरुत ।
"	२८	इत्यर्थे इत्यस्मादनंतरं ' परं ततः प्रारब्धसंक्षये । अमाया सर्वथा मायाया अभावं गतः सन्परमधाम्नि कर्मसाक्षिणि ब्रह्मणि विशति । विदेहकैवल्यमाप्नोतीत्यर्थः । ' इत्यधिकः पाठः ।
४१	१२	कर्तव्यं
४२	१९	युगाते
४३	२	नृत्यति
"	३	°कार्द्रः
"	२०	शुंडादण्डः
४४	१०	°मित्यं
"	१५	निष्कामं

पृष्ठ.	पंक्ति.	शुद्धम्.
४५	१९	ज्ञानं ' इति
४६	३	पातो
"	४	स्त्वहम्
"	१४	मेवं
"	३१	समानम् ।
४९	४	च्युति
"	५	°रंगीदृशा-
"	६	संगादपि ॥
"	११	मुहुः
"	२१	रेफं
"	२७	°त्कालसूत्रं
५०	१८	तया
५१	३	°मृतश्च्यु°
"	९	तु
५२	५	°विनश्याद्य°
"	"	गंधम् ।
"	१५	भागवतात्
५३	१३	°धनम् '
५४	१६	द्यूतं
५५	५	पुमान्
"	६	स मंद
"	१६	°स्तैराकुलश्च ॥
"	२५	तत्संगृहाण
५६	१४	निर्भ-
"	१८	°श्चेन्द्रिय°
"	११	°त्सृज्य
५८	११	पृष्टे
६०	६	°श्रयम्
"	१०	°मृततृप्ताः
६५	२१	मेवं ।

पृष्ठ.	पंक्ति.	शुद्धम्.
६६	८	सद्योग°
„	३१	परिपक्का
६८	१५	°र्धभूर्छा°
७०	१७	°पितोऽतक्को
„	२१	सुखं ।
७२	२०	°जंगाना-
„	२७	सभाजयति पूजयति ।
७५	१६	°पतितत्व°
७६	८	स्वीयोऽपराण्ह°
७७	१	°दस्येव शारद°
„	९	°चोष्ठपुटेन
७९	१०	गदाव्याध्या। अदूरेति।
„	३२	°त्वा बलेन मूर्धभेदं
८१	१७	प्रेषितः
८४	„	'उत्'
„	२३	°त्व गीताभिरुपदिष्टं;
„	२५	पार्थः असिश्च ।
९१	३	°जाना
„	१९	किमिदमाचारि°
९८	३१	राट्
९९	१२	सौवर्णी
„	२७	कविता मान्या भव-
१००	२०	बहून्
„	२५	°ब्दास्ते°
„	२७	नवा नूतना
१०२	१२	निषिध्य चिकीर्षोः
„	२६	विद्ययाप्यज्ञान-
१०३	„	इति चंद्रगुप°
१०३	३४	सेव्येति ।
१०६	१७	अहं तु
„	२८	चेदेवं
१०७	२८	किमनेन स्यादिति
„	३२	पत्ये इति ।
१०९	३१	नान्ययेति
११२	२३	पश्चा-
११५	१३	गदाभृत्समः
११६	८	भवन्
„	२०	ह्यनेर°

पुणें येथे 'ज्ञानप्रकाश' छापखान्यांत छापिलें.

पंतविठ्ठलकृतं

सुश्लोकलाघवम्.

अलंकृतिपरिष्कृतः सुरसभावने पंडितः ।
प्रनष्टखरदूषणः प्रथितचारुवृत्तस्थितः ॥
प्रमोदयति यः सतः सुगुणतः स्वकश्लोकतः ।
प्रभुं रविकुलाग्रणीः कविवरेण्यवद्राजते ॥ १ ॥
पद्मोल्लासकरं द्विजेश्वरभृतं गोपालकं सद्गणैः ।
संसेव्यं हरिसादरं मधुपरोत्कंठं गिरीशाश्रितम् ॥
भक्त्या नौमि निरंतरं मुरहरं लंबोदरं शंकरं ।
देवं तिग्मकरं हरप्रियतरं तेजो जगत्सुंदरम् ॥ २ ॥

श्रीगणेशाय नमः ॥ श्रीरामचंद्रचरणाभ्यां नमः ॥ श्रीगुरुभ्यो नमः ॥ पूर्णकामं गुणग्राम विश्राम कामविद्विषः ॥ कामाभिरामं श्रीरामं मेघश्यामं नमाम्यहं ॥ १ ॥ अलंकृतेति । अलंकारभूषितोऽलंकारशास्त्रे निष्णातश्च । देवसमाजरक्षणे सुष्ठु शृंगारादिरसविभावने च । खरदूषण प्रखरदूषणं रलयोः सावर्ण्यात्खलकृतदूषणं वा तन्नामानौ राक्षसौ च । वृत्त चरित्र शार्दूलविक्रीडितादि च । गुणो दयादाक्षिण्यादिः काव्यादिश्च कामलक्षणे प्रसिद्धः प्रसादादिश्च । श्लोकः कीर्तिः पद्यं च ॥ १ ॥

नमस्क्रियारूपमाह द्वाभ्याम् । पद्मेति । (वि०) लक्ष्मीविनोदकरं । (ग०) बिंदुजालकाविर्भावशुद्धं । पद्मकं बिंदुजालकमित्यमरः । पद्मोऽस्त्री पद्मके व्यूह इति मेदिनी । (श०) पद्माख्यासनसंक्षेपकरं । (सू०) कमलविकासिकिरणम् । (दे०) कमलवच्छोभमानहस्तं । द्विजेति । (वि०) गरुडपोषकम् । (ग०) महादन्तधारिणम् । (श०) चंद्रचूड । (सू०) चंद्रपोषकम् । स हि सूर्यप्रकाशेन वर्धते । ब्राह्मणरक्षकं वा । (दे०) सुरथसमाधिनामकक्षत्रवैश्यरक्षकम् । (वि०) गौर्धेनुः । (ग०) सरस्वती । (श) नदी । (सू०) किरणश्च तत्पालकम् । (दे०) गोपः कृष्णस्तल्लक्षितः । कृष्णवर्णस्तादृशो यद्वा गा जलं पाति स मेघस्तद्वद्वा अलका यस्य । सद्गणैरिति । (वि०) सात्वतगणाः । (ग०) प्रमोदादयश्च । गणानां त्वेति मंत्रलिंगात् । (शं०) प्रमथादयश्च । (सू०) वेदगणाश्च त्रयीमयत्वादुषित्वादिस्य सन्मार्गमित्यादौ सच्छब्दस्य वेदपरत्वदर्शनात् । (दे०) देवतागणाश्च ब्रह्मादिभिः स्त्रीरूपाणि कृत्वा सेवितत्वात् । ब्राह्मी हंससमारूढेत्यादि चंडीस्तवे प्रसिद्धं । हरीति (वि०) हली बलभद्रस्तत्र सादर । रलयोरैक्यात् । (ग०) हरयः हरिद्वर्णा ये शादास्तृणानि दूर्वा इति

महेशार्धेंदुलसित विंदुभूतामरापग ॥
शक्त्याश्लिष्टतनो शांत जगद्बीजाय ते नमः ॥ ३ ॥
अवनप्रवणो नित्यं कृतकुंजररंजनः ॥
करोतु कुशलं कोऽपि हरिर्वः खलदुःसहः ॥ ४ ॥
सुविचित्रबाणरचनं सुजनाः सुश्लोकलाघवं श्रयत ॥
स्पष्टं नृणां प्रतिष्ठा दृष्टा नूनं यतो जनस्थाने ॥ ५ ॥
न त्याज्यं सहजं सदोपमपि हे कौंतेय कर्म स्वकं ।
प्रारंभः सकलः सदोष इति हि श्रीवासुदेवो जगौ ॥
तत्काव्यप्रतिमा यतश्च सहजा नो कृत्रिमातो बुधा-
स्त्यक्त्वा दोषभयं सुदूरतरतो युक्तोऽभवद्विठ्ठलः ॥ ६ ॥

यावत्ता लाति गृण्हाति तं । शादो जंबालशष्पयोरित्यमरः । सशयोरलयोश्चैक्यं । (शं.) हरौ विष्णौ सादरं । (सू०) हरिभिरश्वैर्यः सादोगतिः पदूलगत्यादौतां लाति । (दे०) हरिणा सिंहेन यः सादो गतिस्तां लाति तत् । मध्विति (वि०) मधुनामा यः परः शत्रुस्तमुद्गतकंठं करोति तं । (ग०) मधुनि ये परा भृंगास्तेषामुत्कंठा यस्मिन् मदोदकसंभृतत्वात् । (शं०)मधुपा भृंगा रा मेघाश्च तद्वदुत्कष्टः कंठो यस्य तं नीलकठंमित्यर्थः । रा स्वर्णे जलदे धन इति हैमः । (दे०)मधु मद्यं पल मास च तयोरुत्कंठा यस्य तत् । गिरीति (वि०) गिरीशो गोवर्धनः । (ग०) शिवः । (शं०) कैलासः । (सू०) उदयाचलः । (दे०) हिमाचल शिवो वा । तेजो देऽयाध्य ॥ २ ॥

महेशेति । अर्धेंदुरर्धचंद्रो नादश्च । बिंदुःपृषदनुस्वारश्च । शक्तिर्गौरी कला च । बीजाक्षरस्य बिंदुनादकलाशांताख्या अवयवास्तंत्रे प्रसिद्धाः । शांतत्वं तु महेशेति पद दर्शयति । अर्थतस्तु नित्यसमाधिनिष्टतयास्त्येव ॥ ३ ॥

आशीरूपं तृतीयमाह । अवनेति । वनप्रवणाद्गजघातकात्खरदुर्धरात् प्रसिद्धसिंहादस्य वैलक्षण्य ज्ञेय ॥ ४ ॥

ग्रंथस्य प्रयोजनमाह । सुविचित्रेति । बाणरचन. शरप्रयोगः शब्दविन्यासश्च । सुश्लोकलाघवं पुण्यश्लोकं रामभद्रमेतन्नामान ग्रंथ च । प्रतिष्ठाऽवस्थानं सम्मानश्च जनस्थानं खरालयं नाशिकेति प्रसिद्ध सभा च । राघवयोगेन जनस्थाने नृणां प्रतिष्ठा दृष्टाऽतस्तदपेक्षकैस्तदाश्रयण कार्यमितिभावः ॥ ५ ॥

ननु काव्यस्य सर्वथा निर्दोषत्वेन रचयितुमशक्यत्वात् सदोषस्य च कुत्सावदत्वात्तत्रकथं प्रवृत्तिरित्यत आह । न त्याज्यमिति । प्रतिभा स्वाभाविकीयाशक्तिः । कृत्रिमाक्रिययानिर्वृत्ता । यतो हि सहजं कर्म कौंतेय सदोषमपि न त्यजेत् ॥ सर्वारंभा हि दोषेण धूमेनाग्निरिवावृता इति गीतायां ॥ ६ ॥

अज्ञानादथवा प्रमादवशतः काव्यं सदोषं भवे-
त्तन्निंदास्पदमित्युपक्रममिमं कुर्यां न वै तर्ह्यहम् ॥
कर्तुं हैहयराजपुंगवमिवाप्येतत्सदोषं पुन-
र्निर्दोषं न धृतव्रताः कविकुलोत्तंसा भवंतो यदि ॥ ७ ॥

पंतो यद्यहमेष माधवमिलन्मूर्धन्यमध्यास्थितो ।
दोषस्तर्हि न चाश्रयिष्यदणुरप्येतं प्रबंधं नवम् ॥
तस्माद्वेदपुराणशास्त्रनिपुणाः सभ्या भवंतः स्वयं ।
प्रायश्चित्तमिह प्रयच्छत ततो दोषः कुतः स्थास्यति ॥ ८ ॥

नूनं निसर्गतः कविरूढमलप्रशमने हि सरसानाम् ॥
प्रतिकूलतापि न भवेदनर्थकृत्कतकवत्कदाचिदपि ॥ ९ ॥

किंच दोषोत्सारकाभावे तत्प्रवृत्तौ बाधकं नान्यपेत्याह । अज्ञानादिति । सदोषं दोषसहितं भुजसहित च । निर्दोषं दोषरहितं भुजरहितं च । कविभिर्भार्गवः कव-पिता च । सदोषं कार्तवीर्यं निर्दोषं कर्तुं भार्गव इव भवंतः कविकुलश्रेष्ठा यद्यत्र तत्काव्यं तथा कर्तुं न स्युश्चेदप्रवृत्तिः स्यादिति भावः ॥ ७ ॥

दोषोत्सारणमार्गं दर्शयति । पत इति । यद्यहं पंतो भगवन्निष्ठवरेण्यजनमध्ये गणनीयोऽभविष्य तर्हीमं प्रबंधं दोषोऽणुरपि नाश्रयिष्यद्भगवन्निष्ठानां हि कृतिं न कोऽपि दूषयति तत्पुण्यप्रभावात् । नह्ययं तादृशः । अथवा ' ठं माधवाय पुण्यै नमः' इति केशवादिन्यासे दर्शनान्माधवस्य ठकारवाचकत्वं तंत्रे प्रसिद्धं । तं मिलन् यो मूर्द्धन्यमध्यो डकारः । ऋटुरषाणां मूर्धेति टवर्गस्य मूर्धन्यत्वात् । तथा च डकारे कारमयोगे डिरिति जातं तमास्थितोऽधिष्ठितः पंतः पंडितो भवति । पंडितकृतिषु दोषदर्शनेऽपि तेषां विद्वत्तया न कोऽपि तं पश्यति । ते तु महांतः कदाप्यन्याय न करिष्यंतीति विश्वस्ताः । अहं सोऽपि न एवं च मय्युभयविधत्वाभावान्मत्कृतप्र-बंधे दोषः संभवेदेव । पर त्वयं संभावितदोषः श्रीमत्पर्षदमागतस्तदत्र सर्वैः प्रा-यश्चित्त नियोज्य । दत्ते च तस्मिन्संभावितोऽपि दोषो नावतिष्ठेतेति भावः । यद्यत्रैवभव च्छब्दयोगे प्रयच्छतेति मध्यमपुरुषप्रयोगोऽनुपपन्न इति दोषः । तत्र श्रीमद्भिर्भ-वंतीति भवंतः समर्था इति व्युत्पत्त्या प्रायश्चित्त दत्तं चेच्छुद्धमिदं पद्यं भवति ॥ ८ ॥

ननु प्रायश्चित्तदानमानुकूल्य एव संभवेदिति चेत्तत्राह नूनमिति । कवौ रूढो मलो दोषः के जले विरूढो मलः कलुषता च । सरसानां सोत्साहानां सद्भक्तिवि-शेषाणां च । स्वभावतः कवितादोषमपहर्तुं सरसस्य जनस्य मलकलुषतामपहर्तुं शक्तस्य कतकस्य च प्रतिकूलतापि स्वेष्टहान्यै न भवति यत्सरसकतकशब्दौ प्रतिलोमतः पठितावपि तमेवार्थमभिदधात इति ॥ ९ ॥

किं काव्याद्विरमेयमत्र हि कथंचिद्दोषसंभावना-
प्य ह्येतनु निरूपणीयमबुधस्याग्रे विविच्य क्वचित् ॥
किंत्वेतस्य सतोऽसतोऽपि च पुनः पात्रं स्मृताः सूरयो।
दोषावस्थितये तु किं कथय रे कल्पेत सूर्यागमः ॥ १० ॥
त्रिविधार्थवशा कविता वेश्येव विभास्यतश्च तां प्रति यः ॥
भूषाकरणसमर्थो दोषासंगं स एव विदधातु ॥ ११ ॥
इतिहासपुराणागमविचक्षणा दूषणस्य बलिनोऽपि ॥
सुश्लोकलाघवस्य श्लोके किल नामशेषतैव स्यात् ॥ १२ ॥
मूर्ध्न्यंजलिं विरचयन्मुहुरर्थयेऽहं ।
सुश्लोकलाघवमहो शृणुतानसूयम् ॥
जायेतचेतसि ततः सुमहाप्रसादः ।
स्यादेव वागविषयः सहजप्रमोदः ॥ १३ ॥
सुश्लोकलाघवश्लोकं विचित्रानंददायकम् ॥
सकलाः स्पृहयंत्येव हरिदासा विशेषतः ॥ १४ ॥

किं च महता समागम एव दोषनिबर्हणायेत्याह । किं काव्यादिति । दोषावस्थितिर्दोषस्यावस्थानं रात्रेश्चावस्थानं । सूरीणां पंडितानामागमः समागमः सूर्योदयश्च । सद्वाऽसद्वा काव्यं सूरिभ्य एव दर्शनीयं न मूर्खेभ्यः । तत्र सूर्यागमो दोषावस्थितये कदापि न दृश्यत इति भावः । सूर्यागमश्चेद्दोषाभावो दोषावस्थानं चेत्सूर्यागम एव नेति मन्यामह इति ॥ १० ॥

किंच दोषासंजनमपि भूषाकरणसमर्थेनैव कार्यं नान्येनेत्याह । त्रिविधेति । त्रिविधार्थो नानाद्रव्याणि त्रिविधार्थोद्भावनं च । भूषाकरणमंगप्रत्यंगेषु भूषणार्पणं सम्यगुल्लासनं च । दोषासंगं रात्रौ रत्युत्सवं दोषासंजनं च । एवं च भूषाकर्तुर्दोषोद्भावनं भूषणपर्यवसाय्येवेति भावः ॥ ११ ॥

दोषाभासेऽपि श्रीमद्भिर्विचारितेऽत्र दोषसद्भावो नस्यादेवेति सदृष्टांतमाह । इतिहासेति । दूषणस्य दोषस्य राक्षसविशेषस्य च । यथा रामचरिते पूर्वं दूषणस्य भासमानत्वेऽप्यंते नामशेषतैवास्ते तथात्रेति भावः । अस्य ग्रंथस्य भगवद्गुणवर्णनप्रधानतया ‘ तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि । नामान्यनन्तस्य यशोऽङ्कितानां' इत्यादि भागवतोक्तेर्दृश्यमानस्यापि दोषस्यागणनीयत्वात् ॥ १२ ॥

यद्यप्येवं तथापि विद्वत्प्रणतिरेव सर्वार्थसाधनीत्याह मूर्ध्नीति । सत्कीर्तिं राममेनं ग्रंथं च । प्रसादः नैर्मल्यं चमत्कारश्च निर्वचनीयानंदः प्रमोदो मोक्षश्च ॥ १३ ॥

यत्सुश्लोकलाघवश्लोको निर्दोषोऽत फलितमाह । सुश्लोकेति । सकलाः कलासहिताः सर्वे च । हरिदासा गोस्वामिनः भगवन्निष्ठाश्च ॥ १४ ॥

सुश्लोकलाघवश्लोकः प्रस्तुतो जनसंसदि ॥
न कस्मै रोचतां नूनमेकां खरचमूं विना ॥ १५ ॥
यदेवानिभृतं सत्यं तन्नित्यं वस्तु कीर्त्यते ॥
नास्त्येव या विचारेण सा मायेत्यभिधीयते ॥ १६ ॥
श्रीगुरोः करुणापांगपीयूषपिठरो हि यः ॥
न तमःसंभवा बाधा तस्यस्याद्दतिदुस्सहा ॥ १७ ॥
परमपदविजित्यै नैव सद्वंशभूति-
र्मतिरपि न वयो वा सद्गुरुः किंत्विहैकः ॥
इति कथयितुमीशः संसदस्तंभमध्या-
द्गुरु गुरु गुरु शब्दं व्याहरन्नाविरासीत् ॥ १८ ॥
नगघटितं चलघटितं जडोपरचितं च तत्कलोपचितम् ॥
मिथ्या सकल जगदिदं सत्यं किं तु प्रतिष्ठितं ब्रह्म ॥ १९ ॥

सुश्लोकेति । खरो राक्षसविशेष. रलयोः सावर्ण्यात् खलश्च गर्दभप्रायश्च॥१५॥

वेदांताधिकारिणां साधनचतुष्टयसम्पन्नत्वाच्चतुष्टये च नित्यानित्यवस्तुविवेकस्य मुख्यत्वात्तमेव दर्शयति । यदेवेति । यन्निभृतमन्यतं देशतःकालतश्चेति यावत् सत्यं सतान्वयि तन्नित्यं ब्रह्मविकारेण भूतं युक्त त्यकारेण सहितं सत्यं च नित्यमित्येव प्रतीयमानापि विचारेण या नास्ति सा माया तदानित्य । मा शब्दो निषधवाची मा नास्ति या सा माया विचारो विवेकः यद्वा विचारो विष्णुस्तदुपासनया ॥ १६ ॥

जगदाकारेण प्रतीयमानाज्ञानाभावस्य विचाराधीनत्वात्तस्य च गुरुकृपासाध्यत्वात्तमेव स्तौति । श्रीगुरोरिति । श्रीगुरोर्देशिकस्य बृहस्पतेश्च । तमोऽज्ञानं राहुश्च । गुरोरानुकूल्ये यथा राहुर्बाधितुं नेष्टे तथा देशिककृपायां सत्यामज्ञानं ॥ १७ ॥

इदं च साक्षाद्धरिरेवाहेत्याह । परमेति । गुरुगुरुगुरु इति सिंहस्य मंद्रशब्दानुकरणं न हि प्रह्लादस्याभिजनता न च मतिर्न च वयस्तथापि गर्भे नारदेनानुगृहीत इति तदर्थे ममैतादृग्रूपभाक्त्व संप्रतिपन्नं तस्माद्गुरोरन्यन्मत्प्राप्तये साधनं नास्तीति हर्षव्याकुलतया तादृशशब्दं व्याहरन् नृसिंह आविरभूदिति ॥ १८ ॥

सद्गुरुरुपदिशति अध्यारोपापवादन्यायेनेत्याह । नगघटितमिति । हे सौम्य इदं दृश्यमानं सकलजगत् किंचिन्नगैः स्थावरैर्घटितं किंचिच्चलैर्जंगमैर्घटितं स्थावरजंगमात्मकमस्ति । एतत्सर्वं जडोपरचितं विद्धि । जडेनाज्ञानेनोपरचितं ननु जडेन केवलेनोपरचनं कथं स्यादिति चेत् तत्कलोपचित तस्य ब्रह्मणो या कला ईक्षणरूपा शक्तिस्तयोपचित समृद्धं एवमध्यारोपमुक्त्वापवादमाह । इदं सकलजगत् मिथ्यास पत्वेन ब्रह्मैवावशिष्यते रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् । शब्दतोऽपीदं निरूपयितुं शक्यते । यथा सकलजगत् नगघटितं गकारेण च घटितं न भवति गकारो

मायाब्रह्मसमागमादुदितवानेष प्रपंचो मृषे-
त्येवं सत्यपि सत्यतामुपदिशंत्येकेऽस्यतान् (तनू) किं ब्रुवे ॥
आदौ ब्रह्म नपुंसकं सुविदितं जायास्य माया वशा ।
किं ताभ्यामुदितस्य तस्य जगतः सत्यत्वगंधोऽप्यहो ॥ २० ॥
वंध्यायास्तनयः सुगंधिसिकतातैलैः समभ्यज्य च ।
स्नात्वा मांगलिकैः कुरंगसलिलैर्धृत्वा खपुष्पस्रजम् ॥
कर्तुं वांछति गार्दभेन विधिना षंढस्य पुत्र्या सहो-
द्वाहं तत्र च दक्षिणा चल सखे पारेपरार्धं मिलेत् ॥ २१ ॥
शैलाधीशधरः कुमारस्त्वावितः सत्याऽन्वितोऽब्जांकितो ।
गंगाभूतियुतो विनायकाहितश्चक्षुःश्रवो भूषितः ॥
इत्थं नाम मनागपि प्रथयते नोमाधवो माधवा-
द्वैतं यश्च विभाति सोऽतिमगुणस्थानोस्थितो नान्यथा ॥२२॥

गतः । अवशिष्ट सकलजत् पुनश्च लघाटितं चकारान्नेत्यनुकृष्यते लकारघटितं न भवति । लकारो गतः । अवशिष्ट सकजत् पुनर्जडोपरचितं जकारस्य लोपस्तेन रचितं यस्मिन् डलयोरैक्याज्जकारो गतः । अवशिष्ट सकत् पुनस्तत्कलोपचितं यदवशिष्टं तत् कस्य लोपस्तेन चितं युक्तं ककारो गतः । अवशिष्टं सत् ब्रम्ह जगत आदावंते च तदेवावशिष्यते । एतदेतस्य स्वरूपचर्यंयैव ज्ञायत इति ध्येयं ॥१९॥

एवं मिथ्यारूपस्यास्य प्रपंचस्य सत्यतामुपदिशतः कांश्चिद्विदुष उपालभते । आदाविति । सुविदितं सर्वैः सर्वत्रज्ञातं तत्प्राति जगदुत्पादने तस्य माया स्त्री वशा वंध्या वशीभूता च नपुंसकाद्वंध्यायाबहून्यपत्यानि जातानीत्युक्ते यो नाम प्रमाता इदं विश्वसेत् सोऽत्र विश्वसेदिति ॥ २० ॥

एतत्प्रपंचार्थमेव तज्जातीय पद्यं निबध्नाति । वंध्यायास्तनय इति । कस्यचिद्दक्षिणार्थिनो याचकस्यान्य तादृश प्रति उक्तिरिय परार्धस्य । पार इति पारेपरार्धं संख्या तु परार्धपर्यंता तदूर्ध्वं संख्याभावात् ॥ २१ ॥

एवमद्वैतसिद्धौ य पुनर्द्वैतं भासते तन्मायागुणकृत नान्यथेत्यत्र निदर्शनमाह । शैलेति । कैलासे धरतेऽतिष्ठत तयोक्तः । धृङ् अवस्थाने । गोवर्धनधरश्च । कुमारेण स्वामिना तुष्ट. कुर्भूदेवी मारो मदनश्च ताभ्या तुष्टः । सत्या पार्वत्या सत्यया सत्यभामयान्वित एक पद अब्जेन चंद्रेण शंखेन पद्मेन च । भूतिर्भस्म संपच्च । विनायको गणेशः वीना पक्षिणा नायको गरुडश्च । सर्पभूषणः शेषशायी च । एवमुमाधवः शिवो माधवाद्वैतं न प्रथयते । यश्च भासते सोऽतिमोगुणस्तमोगुणस्तस्य स्थानं स्थितिस्तत्कृतोऽय न पारमार्थिक. । शब्दतोऽपि अदेङ् गुणइति अकार एकार ओकारश्चेति वर्णत्रय गुणशब्दाभिधेय तत्रांत्यो गुणः कः ओकारस्तस्य

वित्तार्थं यतसे भृशं यदनिशं शंसार्थमप्यात्मनो ।
व्यर्थं तन्मम मित्र तत्र भवतो नात्यंतिकं स्यात्सुखम् ॥
गुर्वाराधनतत्परेण मनसा कुर्वात्मशं साधनं ।
किं तस्मिन्नुपलभ्यते न हि धनं नो वात्मनः शंसनम् ॥२३॥
तद्वित्तं स्वसुखं जनस्य नियतं यत्प्रार्थ्यते कुप्रभो-
र्वित्तः सत्तम वित्तवित्तजमदोन्मत्तेन चित्तेन यः ॥
कस्योऽहं कथमस्मि कोऽहमिति तत्कुर्वात्मनः सर्वदा ।
सद्युक्त्या बहुशोधनं न बहुशस्तत्रापि किंस्विद्धनम् ॥ २४ ॥
मिलेधदयुतं धनं तदधनं धनं यत्तु वै ।
मिलेत नियुतं धनं निधनमेव तज्जायते ॥
तथा धनपरार्धकं निखिलभावहीनात्मकं ।
तदक्षरपदांतरे स्थितमरे धनं सर्वथा ॥ २५ ॥

स्थानं किं उकारः स्थानेऽतरतमइति उकार ओष्ठ्यत्वात्तादृशस्य ओकारस्य स्थानं भवति । एवं चायमुमाधव. स माधव इत्युकारकृतो भेदो नान्यथा ॥ २२ ॥

निरतिशयात्मसुखसाधनं विहायापातरमणीयसुखसाधनद्रव्यार्जनं न कार्यमित्यभिप्रायेनाह वित्तार्थमिति । लोके हि केचिद्द्रव्यमेवार्जयंति परे अर्जितद्रव्यत्यागेन कीर्तिं तदुभयमपि नात्यंतिकसुखकारणं आत्यंतिक सुखसाधनेनैव मनोजयो वासनाक्षयो हरिभक्तिरूपेण तन्निरतिशयानंदलक्षणं सुखं तु प्राप्नुयादेव । किं च यदर्थं त्वं यतसे तदुभयमपि तत्रानुषंगिकं नास्तीति न किं नूपलभ्यत एव यथात्मशंसाधनं आत्मनः शं सुखं तस्य साधनं अस्मिन् पदे आत्मशंसा धनं च वर्तत एवेति ॥ २३ ॥

तद्वित्तमिति । हे सत्तम यत् कुप्रभो भूपतेर्वित्तं याच्यते तज्जनस्यासुखं सुखकारकं न भवति । यद्वा अमूना प्राणानां स्वजनस्य हेतुरितिशेषः । यतः स कुप्रभुः कुत्सितप्रभु. तदेव विशदयति यो धनमदेन मदोन्मत्तेन मनसा वित्तः स्यात् स्तस्मादात्मविषयकविचारमेव कुरु तेन परमसुखं स्यात् । किं च यदर्थं त्वं यतसे तद्धनमपि तत्रानुषंगिकं नास्तीति न आत्मनः बहुशोधनमित्यत्र बहुशः धनं वर्तत एवेति ॥ २४ ॥

किं च यदपि मेलितं धनं न धनं भवति । धनं तु ब्रह्मपद एव स्थितमित्याह । मिलेदिति । अयुतं दशसहस्रं धनं न धन यस्य कस्यापि सकाशेऽस्त्येवेति अकारेण युतं युक्त धनं अधनमेव नियुतं लक्ष तत्तु अर्जनरक्षणादिना मरणरूपमेव पञ्चिकारेण युतं धनं निधनमेव तत् तथा धनपरार्धं धनस्य परार्धं परमसंख्यावधिभूतं परार्धपर्यंता हि संख्या ज्योतिःशास्त्रप्रसिद्धा एवं तर्हि किमपि नास्ति

आत्ममनो बंधने हेतुं चित्तं क्षिणु हि यत्नतः ॥
चित्तस्य तस्य क्षयतः केवला चित्प्रकाशते ॥ २६ ॥
सत्यां विरक्तौ विपिनेऽपि वासे सत्यप्यथ ब्रह्मभवोपदेशे ॥
निवृत्तिसिद्धिः परमा समाधावेवेत्युवाचेह मृकंडुसूनुः ॥ २७ ॥
अये मनोमत्तमतंगजोऽयमितस्ततश्चंक्रमणो रजोभिः ॥
क्रीडन्सदा पिप्पलभोगतुष्टस्तच्छांतये त्वं हरिमाश्रयस्व ॥२८॥
मर्यादा न च यस्य यो मृतमयो यस्मिञ्छुचिर्नीचगैः ।
संतर्प्यो न च वाडवः किल जलैर्न स्वातिवर्षेऽपि वा ॥
मुक्ता नित्यममंदरागमथनादुच्चैःश्रवा वा हरि-
र्नो लभ्यस्तदयं भवो हि नितरां वारां निधेर्दुस्तरः ॥ २९ ॥

धनशब्दस्य धः पूर्वार्धे न परार्धे यश्च नकारः सोऽभावएवधनं तु अक्षरपदांतरे ब्र-ह्मपदे विष्णुपदे वा ' अक्षरंब्रह्म परमं सदसत्क्षरमक्षर ' मित्युक्ते दृश्यते । नित्यं अक्षराणि अकारमारभ्य क्षकारपर्यंतानि तत्र ये पदे पकारदकाररूपे तन्मध्ये ध-नेतिसर्वदा स्थितमिति यथा तथदधनपफबभमेति अक्षरशब्दो हि स्वरे रूढः स्व-रव्यंजनरूपेऽपि प्रयुज्यते यथा ' मकारस्तृतीयाक्षरो भवतीति ' श्रुतिः । ' मंत्रराजः षडक्षरः ' इत्यादि स्मृतिश्च पद इत्यत्र क्रमोऽविवक्षितः अतो न धनार्थे यत्न कु-र्यात्किंतु ब्रह्मविद्भवेत् ब्रह्मनिष्ठं प्रति न धनमेव स्वयं प्रार्थयते ममांगीकारः कार्य इति स तु तत्प्रति न कटाक्षलेशमात्रेणापि संभावयतीति पूर्णधनत्वादिति तात्पर्यं ॥२५॥

' एक एव मनोजन्यो जितः सर्वार्थसिद्धिद इति ' वासिष्ठोक्तेर्मनोजयमंतरेणा-त्मप्राप्तेरभावात्तत्क्षयमाह आत्मनइति । चित्तस्य तस्य क्षये चित् स्वयमेव प्रकाशते यथा चित्तसंबंधिनस्तकारस्य क्षये लोपेऽर्थाच्चिदित्येवावशिष्यते ॥ २६ ॥

चित्तजयस्य निरोधसमाधिरेवोपाय इत्याह । सत्यामिति । वैराग्ये वनवासे ब्रह्म-णः शिवस्य चोपदेशेऽपि समाधावेव निवृत्तिसिद्धिः । चित्तस्य विषयोन्मुखतापरिहा-रेणात्माभिमुखीभावः यथा सुरथस्य राज्ञः समाधेर्नाम वैश्यस्य च समाने वैराग्ये विपिनवासे ब्रह्मभवस्य सुमेधोपरपर्यायस्य वासिष्ठस्योपदेशे समानेपि निवृत्तिसिद्धिः आत्माभिमुखीभावः समाधावेव नान्यत्रेति सप्तशत्याद्यवदवीचारिते स्पष्टं ॥ २७ ॥

सुगमोपायमाह अय इति । रजः रजोगुणः धूलिश्च । पिप्पल विषयसुखं त-स्य यो भोगः तयोरन्यः पिप्पल स्वादुत्वात्र तथा स्वीकारात् । पिप्पलस्याश्वत्थस्य योभोगः भक्षणं स हि गजाय रोचते । पिप्पलः कुंजराशन इति । हरिं सिंहं च प्राणस्पंदनिरोधात्सत्संगाद्वासनात्यागाद्धरिचरणभक्तियोगान्मनः स्ववेगं जहाति ज्ञाने' त्याचार्योक्तेः ॥ २८ ॥

सर्वोनर्थभूतस्य संसारस्य निवृत्तिरेव परमपुरुषार्थ इति निवर्त्यस्य तस्य स्वरूपमाह

विहीनः स्नेहलेशेन निर्दशश्च निरंजनः ॥
अध्यात्मज्ञानदीपोऽयं तमो हंत्यचलप्रभः ॥ ३० ॥
कर्मसाक्षितिरोभावे दोषावाप्तिरुदीर्यते ॥
आविर्भावे पुनस्तस्य सर्वतः सुदिनं भवेत् ॥ ३१ ॥
इतरभजनघनरसतः फलनिष्पत्तिर्न संभवेदिति न ॥
मुक्ताः परंतु मन्ये स्वातिघनरसं विना न जायेरन् ॥ ३२ ॥
संसारिणामिहामृतलाभोऽमृतमध्यवर्तिनामपि न ॥
मीनानामिव तत्राप्रत्यङ्मुखतैव जायते विघ्नः ॥ ३३ ॥
स्त्रीत्वं न पुंस्त्वं न नपुंसकत्वं न वा विभक्तिर्वचनं न यत्र ॥
तस्याव्ययस्य प्रतिलब्धयेऽत्र स्वस्थानमेवोपदिशंति संतः॥३४॥

मर्यादेति । मर्यादा कूलभूमिरवधिश्च अमृतमयः उदकमयः मृतमयश्च मृतेन जननमपि लक्ष्यते । शुचिर्वाडवः ... अनलः शुद्धो विप्रश्च नीचगैर्जलैः निम्नप्रवणैरुदकैः नीचानुसारिभर्मंड ... स्वातिवर्षे. स्वातिनक्षत्रवृष्टिः स्वस्य द्रव्य. स्वातिवृष्टि. प्राप्तिश्च । मुक्ता मौक्तिकानि जीवन्मुक्ताश्च । अमंदस्तीव्रो रागः प्रीति स्नेहमथनमन ... व्यवहार । मदरसंज्ञकोऽगः शैलस्तेन मथन निलोडनंच । उद्धं ... नाम हरिश्च महायशा भगवांश्च ॥ २९ ॥

... अध्यात्मज्ञानमेवेत्याह विहीन इति स्नेह प्रेमा तैलं च दशा पयोवस्थावर्तिश्च । अंजनं विषयसंबंध कज्जलं च । तम संसारकारणमूलाज्ञानमंधकारश्च । अचलप्रभोऽचलप्रभ वातादिना चलप्रभश्च । प्रसिद्धदीपादयं विलक्षणस्वभाव ॥ ३० ॥

आत्मज्ञानाभावे ... तद्भावेत्याह कर्मसाक्षी आत्मा सूर्यश्च । दोषावाप्तिर्दोषस्य प्राप्ति रात्रिश्च । सुदिन पुण्य सुदिवसश्च ॥ ३१ ॥

आत्मभिन्नदेवभजनेनापि स्वर्गादिफल भवति न तु मोक्ष इत्याह । इतरेति । इतरेषां देवानां भजने यः घन आर्द्र रसः प्रेमा इतरो यो भजनः नक्षत्रजनः स्वात्यतिरिक्तो मृगादिस्तस्य घनरसः उदकवर्षं च । फलनिष्पत्तिः स्वर्गादिफलप्राप्ति धान्यवृद्धिश्च । मुक्ता जीवन्मुक्ता. मौक्तिकानि च । स्वातिघनरसः आत्मत्वेन देवभजनविषयक यो घनरस आसक्ति स्वातिनक्षत्रोदक च ॥३२॥

ननु ब्रह्मणः सर्वात्मकत्वेन तत्रस्थानामस्माकं तल्लाभः कुतो नास्तीत्यत्राह । संसारिणामिति । अमृतलाभ वस्तुलाभ जललाभश्च । अमृत ब्रह्म तत्रस्थाना जलान्तर्वर्तिनः च प्रत्यगभिन्नात्मप्रवणताभाव प्रत्यगुन्मुखताभावश्च ॥ ३३ ॥

निर्धर्मकस्य वस्तुन. स्वात्मन्येवान्वेषणं कार्यमित्युपदिशन्तीत्याह । स्त्रीत्वमिति । विभक्ति ... परिच्छेद प्रथमादिसप्तम्यंता च । वचनमुक्ति एकद्विबहुत्वोपाधिकं च । अव्ययस्य अविनाशिन. परमात्मन अनरा सुहम् इत्यादिरूपस्य च । स्वस्थान

अचलः किल संसारो नृणां परम दुःखदः ॥
तत्र स्वरूपसंधानं मन्येऽहं सुखसाधनम् ॥ ३५ ॥
संसारसागरस्त्वेष दोषाकरसमुद्भवः ॥
तच्छोषकारकं ब्रह्मतेज एकं विराजते ॥ ३६ ॥
दोषोद्रेकभवे प्रभूततमसि व्याप्ते द्विजानां व्रजो ।
मूढो नष्टसुदृक् समीपगमपि स्थाणुं परं स्वाश्रयम् ॥
द्रष्टुं न क्षमते चरंति परितः किंचात्मघोषद्विष-
स्तत्रानंतपदोदयः सुखयिता स्यात्कर्मसाक्षी विभुः ॥ ३७ ॥
आत्माराम इहैक एव तनुते पुंसां परां निर्वृतिं ।
संसारातपतापतप्तवपुषामत्यंतदुःस्थात्मनाम् ॥
पूर्णाखंडरसेन बिभ्रति भृशं सर्वागमाः सद्रुचिं ।
यत्रामी शुकनीलकंठकपिराड्हंसा रमंतेऽनिशम ॥ ३८ ॥

आत्मरूपस्थान स्वरित्यव्ययस्थान स्वरादिगणश्च । स्वरादि निपातमव्ययमिति पाणिनि स्मरणात् । स्त्रीत्वादिशून्यमव्ययं यथा स्वरादिगणे लभ्यते तथा परमात्मवस्तु आत्मन्येव लभ्यत इत्यर्थः ॥ ३४ ॥

एवं निवर्त्यं संसारं निवर्तक चात्मज्ञान पृथक्त्वेन निरूप्य समुच्चयेन निरूपयति पचभिः । अचलइति । अचलः व्यवहारेण नित्य पर्वतश्च । स्वरूपस्य संधानमनुसंधान सर्वानुस्यूतत्वेन स्वरोविज्ञस्योपासन च ॥ ३५ ॥

संसारसागरइति । दोषाकरस्य दोषराशेश्चंद्रस्य च । तस्य संसारस्य शोषं क्षयं करोति तादृशं ब्रह्मरूपं तेज एवैक त सागर शोषयति तच्छोष करके कुभे भवं कारकं ब्रह्मतेजो द्विजरूपं तेज अगस्त्याख्यमेवैकं ॥ ३६ ॥

दोषोद्रेकभव इति । दोषोद्रेक बधककर्मोद्रेक तन्मूले भवे कीदृशे प्रभूतमसि बहलाज्ञाने रा[illegible]त्रिसभवे गाढांधकारे च । द्विजाना विप्राणा पक्षिणा च । नष्टसुदृग्ज्ञानः नष्टनेत्रशक्तिश्च । द्रष्टु ज्ञातुं वीक्षितुच । स्थाणु शिव परमात्मानं वृक्षं च । आत्मान घोषयंती त्यात्मघोषा वेदातिनस्तेषा द्विषः शत्रवो नास्तिका आत्मघोषाः काकास्तेषां द्विषो घूकाश्च । ते हि रात्रौ प्रवर्त्तदश अनतो विष्णुस्तस्य पदं चरणं तस्मादुदयो यस्य । भगवदुपासनवशाल्लब्ध । इत्यर्थ अनतमाकाशस्तद्रूपं यत्पदं तत्रोदयो यस्य । कर्मसाक्षी परमात्मा सूर्यश्च ॥ ३७ ॥

आत्माराम इति । आत्मैव आराम उद्यान पूर्णाखंडरसेन हेतुना अनवच्छिन्नजलसमृद्ध्या हेतुना च आगमाः शास्त्राणि अगमा वृक्षाश्च । सद्रुचिमुत्तमप्रीतिप्रतिपादनविषये सम्यक् शोभाविशेष च शुको योगींद्रः कीरश्च । नीलकंठो भगवान् शिव मयूरश्च । कपिराट् हनुमान् कपिश्रेष्ठश्च । हंसाः परमहंसाः पक्षिविशेषाश्च ॥ ३८ ॥

योवै पंचमहाभूतविवर्तपरिबाधितः ॥
तस्य ब्रह्मविचारोऽयं साक्षात्पंचाक्षरी मतः ॥ ३९ ॥
न योगे नैव करणे मूलाधिष्ठानमिष्यते ॥
मूलाधिष्ठानसंप्राप्तिर्भजने सहजा नृणाम् ॥ ४० ॥
बालाः स्थूलाक्षरोपास्तिप्रतिकूला भवंति चेत् ॥
सूक्ष्माक्षरं न लेखार्हस्थिति तत्करगं भवेत् ॥ ४१ ॥
यदि न हरेः सारथ्यं गुरोर्नरोऽधिगतशास्त्रविद्योऽपि ॥
जायेत कलिभवमहाभारतरणदक्षिणः कथंकारम् ॥ ४२ ॥
सत्तारकः स्याद्भजनेन युक्तो नृणां तमृक्षः किल सत्पथोऽपि ॥
साहाय्यकं चेन्न शतह्रदाया घनाघनः किं जलदानदक्षः ॥४३॥
हरिपरिचरणं वृषानुबद्धं विहितं क्षेत्रविशुद्धयेऽथ तत्र ॥
घनसुभगमहोदयामृतार्द्रं प्रभवति सत्प्रहितं स्वलब्धिबीजम् ४४

यो वै इति । पंचाक्षरी भूतादिप्रपंचनिवर्तक पंचाक्षरमन्त्रोपासकः पंचपरिमिताक्षरश्च । पंचमहाभूतानि आकाशादीनि सएव विवर्तः मिथ्याभासः पंचानां महतां भूतानां पिशाचानां विवर्त अभिग्रह ब्रह्मविचार इति पंचाक्षराणि ॥ ३९ ॥

उक्तं भजनं भगवत्प्राप्तौ कारणमित्याह । न योग इति । योगे अष्टांगे विष्कंभादिषु च । करणे ज्योतिष्टोमादि क्रियायां बवादिषु च । मूलभूतमधिष्ठानं परमात्मा मूलनक्षत्रस्थितिश्च । भजने भक्तौ नक्षत्रजने च ॥ ४० ॥

बाला इति । बाला अज्ञा शिशवश्च । स्थूलाक्षरं व्यक्तिमापन्नं सगुणं ब्रह्म रामकृष्णशिवादि महान्त्यक्षराणि अआ इत्यादीनि च । सूक्ष्माक्षरं परमसूक्ष्मवस्तुभूतं ब्रह्म अन्यत्प्रसिद्धं । लेखेषु देवेषु शुद्धसात्त्विकत्वात् अर्हा योग्या स्थितिर्यस्य लेखेषु पत्रादिलेखेषु च । न हि पत्रादिव्यवहारः स्थूलाक्षरैर्भवति ॥ ४१ ॥

यदि न हरेरिति । सारथ्यं सूतत्वं च । गुरु महत्कुरुद्रोणश्च नरो मनुजः पार्थश्च । शास्त्रविद्या तत्त्वमस्यादि वाक्यजनितज्ञानं शास्त्रसंबंधिनी विद्या च । कलियुगोद्भवमहाभारस्य तरणे उत्तरणे दक्षिण कलिः कलहस्तेन भवो यस्य तस्मिन् महाभारताना रणे युद्धे च ॥ ४२ ॥

सत्तारक इति । सत्पथा धर्ममार्गः नक्षत्रपथः आकाशश्च । यो हि भजनयुक्तः स एव तारकः उत्तमतारा विशिष्टश्च । भजनं भक्तिः नक्षत्रजनश्च । शतह्रदा विद्युत् साचानेक ह्रदविशिष्टेति जलवृष्टिहेतुः ॥ ४३ ॥

हरीति । हरेर्भगवतः हलेर्महतो लांगलस्य च । रलयोरैक्यात् । परिचरणं भजनं परितः प्रवर्तनं च वृषेण स्वधर्मेण बलीवर्देन च क्षेत्रस्य शरीरस्य केदारस्य च घनवत्सुभग महः कांतिर्यस्य हरेर्दयामृतार्द्रं घनस्य यः सुष्टुभेषु नक्षत्रेषु मृगादिषु

न शास्त्राभ्यासंगान्न च विवरणान्नानुकरणा-
न्न संकल्पान्नैवाप्यवसितिविधानादपि मुहुः ॥
नृणां साक्षात्प्रादुर्भवति सुरतानंदविभवो ।
विना रामासंगाद्विविधकरणव्यूहसुभगात् ॥ ४५ ॥
खगासने भव्यगुणेंतरेण वरं शरं रीतिधरं नियोज्य ॥
उपासनस्यातिबलेन सौम्य त्वं सूक्ष्मलक्ष्यं प्रति विध्य शीघ्रम् ४६
शंकरे भक्तिमान् स्याच्चेच्छं करं तस्य निश्चितम ॥
या तनावात्मबुद्धिस्तु यातना सा सनातनी ॥ ४७ ॥
बहुर्भकं महाभगमपि कांताभरसमन्वितं भवनम ॥
भवति सदाभरणस्थलमपि भावस्थितिविवर्जितं तु वनम् ॥४८॥
मुमुक्षवः संपरिशीलयंतु जनाः सनातच्युतसद्गुणांस्तान् ॥
यतो हि मुक्ता अपि तैर्विमुक्ताः सद्यो विभक्ताः पतिता भवंति॥४९॥

महोदयस्तस्माद्यदमृतं [जलं] तेनार्द्रं सद्भिः प्रहितमुपदिष्टं सत् सम्यगुप्तच आत्मलाभस्य बीजं ज्ञानं स्वस्य द्रव्यस्य लाभो यस्मात्तद्बीजं च ॥ ४४ ॥

न शास्त्रेति । सुरतानंदः स्वस्मिन् यो देवताभावस्तत्प्रयुक्तो य आनंदः रतिसुखं च । रामे आसंगो दृढासक्तिः स्त्रीसंगश्च । करणानि श्रवणकीर्तनादीनि चुंबनाश्लेषादीनि धेनुकादीन्यासनानि वा ॥ ४५ ॥

खगासनइति । भव्यगुणे उत्तमगुणे उत्तममौर्वीके च । खगासने गरुडासने शरासने च । अंतरेण मध्ये रीतिधरं 'री' इत्याकारकं वर्णं धरति तत् शरं शरीरं पित्तलरेखाभूषितं बाणं च । उभयत्राप्यंतरेण रीतिधरं स्वनिष्ठश्रेष्ठत्वधरं च । उपासनस्य उपास्यायाः शराभ्यासस्य च । सूक्ष्मं लक्ष्यं परमात्मतत्त्वं अणुशरव्यं च ॥ ४६ ॥

शंकर इति । शं सुखं तनोति । आत्मबुद्धिर्देहेऽहं भावः ॥ ४७ ॥

भक्तिहीनं सर्वं न शोभत इत्याह बहुर्भकमिति । शिशुभिरलंकृतं महैश्वर्यं स्त्रीसमृद्धमुत्तमाभरणं तत्तत्स्थाने एतादृशमपि भवनं गृहं भावस्थित्या भक्त्या हीनं चेद्वनमेव भवति भस्य भवर्णस्य अवस्थानेन हीनं भवनं वनमेवावतिष्ठते उक्तसर्वविशेषणेषु भकारवर्जनेनार्थः । बहुर्भकमिति बहुरर्कप्रतापो यत्र छायाभावात् । महापर्वतप्राय दुर्गमवस्तुसंयुक्तं सदा रणार्हस्थलं यद्वा दारणस्थलसहितं वनं तदप्येतादृशं न तु रमणीय ॥ ४८ ॥

भक्तिं विना मुक्ता अपि नैव शोभत इत्याह मुमुक्षवइति अच्युतस्य सद्गुणाः मुक्ता जीवन्मुक्ताः मौक्तिकानिच तैरच्युतसद्गुणैः अत्रुटितसाधुदोरकैर्विभक्ताः पृथग्भूता ज्ञानरक्षकाभावात् पतिताः पातित्ययुक्ता गलिताश्च । येन्ये ऽरविंदाक्षविमुक्त-

श्रीरामपादांबुजसेवकेभ्यः कथार्चनध्यानपरायणेभ्यः ॥
सांतानिकामोदकषायितेभ्यो रोचेत किं रेऽमृतसंपदेभ्यः ॥ ५० ॥
न पूजनं नो भजनं च यत्र न वंदिभावो न च मूर्तिवीक्षा ॥
फलं च किं तादृशवस्तुनः स्यादतोऽपवर्गस्त्वमनुष्य लोके ॥ ५१ ॥
आदिमा भक्तिरित्येतत् सर्वसज्जनसंमतम् ॥
यदनाशोचिता सैव मुक्तिर्भवति निश्चितम् ॥ ५२ ॥
मातंगोऽपि प्राप मुक्तिं दुरापां भक्त्या पद्मं पद्मनाभे समर्प्य ॥
तादृक्प्रायाः शुद्धजन्मान एव नैवेक्ष्यंते शार्ङ्गिणः प्रीणनाय ॥ ५३ ॥
यत्तु भगवत्पदगाधःस्थितमपि जघन्यकर्मनिरतत्वात् ॥
पुरुषोत्तमे भवेच्चेद्दृढभावं दृश्यतेऽस्य गतिरूर्ध्वम् ॥ ५४ ॥
मा राजकृपा मा रामा मा कुमार सुखगरिमा ॥
माराज मा स्वमहिमा पदपद्माराधनेऽस्तु ते प्रेमा ॥ ५५ ॥

मानिन स्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृत युष्मदङ्घ्रयइति भागवते ॥ ४९ ॥

भक्तास्तु मुक्तिं न स्पृहयन्तीत्याह श्रीरामेति । रामभक्ता हि ब्रह्मलोकोपरितनान् सांतानिकाख्यलोकान गच्छन्ति तत्रत्यानंदेन कषायितेभ्यः अमृतसपन्मोक्षसंपत्त्ररोचते सांतानिकानमर्त्योपरितनो मद सापइति लोके तदामोदकषायितेभ्यः अमृतं दुग्धं न रोचत इति युक्तमेव ॥ ५० ॥

ते वदंति च न पूजनामिति पूजन फलं वंदिभावो भजनं मूर्तिवीक्षा च यत्र नास्तीति कृत्वा तादृशस्य अपवर्गस्य लोके पवर्गरहितत्वं चेति ॥ ५१ ॥

अहेतुकी भक्तिर्मुक्तिरित्याह आदिमेति आदिमा श्रेष्ठा आदौ वर्णे भकारे मकारो यस्या सा अनाशोचिता आशया । उचिता समवेता तादृशी न भवति सा उत्वागमबाधे अकारस्य नाशो यस्या तत उता उकारेण चिता एवं भक्तिरित्यत्र भस्य मादेशे तदुत्तराकारस्य लोपे तत्र उकारनिवेशे मुक्तिर्भवतीति ॥ ५२ ॥

भक्तिर्जातिश्रैष्ठ्यं नापेक्षत इत्याह मातंगइति मातंगो गजः अंत्यजविशेषश्च ५३

तथा गुणवत्तामप्यपेक्षत इत्याह यत्त्विति । भगवत्प्रोक्तकार्यत्वाभावात्स्वकर्मणि रतत्वेन भगवत्पदाधःस्थित प्राणिजातं यच्छ्वपा भगवति दृढभावं चेत्तस्याधोगतिर्नास्ति यद्भगवद्योनिमद्धस्तु जघन्यकर्मणि मैथुने निरतत्वेनापरस्याधोभागेस्थितामप्युत्तमपुरुषे दृढभावं चेत्तस्योर्ध्वगतिर्भवति पुरुषायिते विपरीतरते प्रवर्तेत इत्यर्थः ॥ ५४ ॥

अतः कविस्तमेव भगवंतमभ्यर्थयते माराजेति । राजकृपा राः द्रव्यं रामा स्त्री कुमारसुखं स्वमाहात्म्यं च माभूत् हे माराज रमानाथ ॥ ५५ ॥

उदारांस्त्वदृते नान्यान् प्रपश्याम्यायि पार्वति ॥
श्रीरामभक्तिमाणिक्यमदेयमपि देहि मे ॥ ५६ ॥
भामे भा मे कथंकारं कामे का मे गतिर्भवेत् ॥
रा मे रामे परा भक्तिर्यामे यामे भजाम्यतः ॥ ५७ ॥
श्रांतोऽसि चेत् संसृतितीव्रतापतः सीतान्वितं मारुतपोतसेवितम् ॥
पलाशसंघातसमृद्धविक्रमं रामं धृताकारमुपेहि सत्वरम् ॥ ५८ ॥
यातायातैः सुबहुभिः श्रांतोऽसि यदि हे सखे ॥
एकं कुरु घनच्छायं सीतारामपदं भज ॥ ५९ ॥
विषयोपहितोऽचलस्थितिः सतमस्कः कनकांगनाप्रियः ॥
भव उग्र इहापि राघवस्मरणाच्छांतिमुपैति निर्भराम् ॥ ६० ॥
असौ भवभुजंगश्चेद्बाधतेऽति भयंकरः ॥
रामं नरेंद्रं भजत विनतानंदनं द्रुतम् ॥ ६१ ॥

उदारानिति त्वमेव उदाराः उः शम्भुस्तस्य दाराः कुटुंबिन्युदारादानशूराश्च ५६
भामइति । भामे क्रोधेऽङ्गीकृते मे भा शोभा कथं स्यात् । कामेऽङ्गीकृते मे गतिः का स्यात् रामे परा भक्तिर्मे राः द्रव्यं अतः प्रतियामे राममेव भजामि ॥ ५७ ॥

यतो ज्ञानं भक्त्यैकलभ्यं सा च भगवद्विहारिणीति संसारनिवृत्त्यर्थं स एवाश्रयणीयइत्याह । श्रांतोऽसीति । भवदुःखहनारत संसृतय. संसृतिसंबंधी तीव्रतापस्ततश्च । पंथानः पदवी सृतिरित्यमरः । सीतयान्वितं शीतेनान्वितं च सशयोरैक्यात् वायुसुतेन हनुमता सेवितं मंदमारुतेन च पलाशिनो राक्षसास्तेषां संघातो नाशस्तत्र समृद्धो विक्रमो यस्य पलाशिनो वृक्षास्तत् संघातः समूहस्तत्र वीनां पक्षिणां क्रमः पदन्यासो यत्र धृताकारं सगुणं रामं ब्रह्म रामपदेनासौ परं ब्रह्माभिधीयतइति श्रुतेः आकारसहितं च रामं आरामं ॥ ५८ ॥

यातायातैरिति घनच्छायाकांतिर्यस्य निबिडच्छायं च सीतायुक्तं रामचरणं शीतमारामपदं च यातायातं पुनरपि जननं पुनरपि मरणं गतागतं मार्गविषयं च ॥ ५९ ॥

विषयेति विषया उपहिता यत्र विषेण यो यो मोहः स हितो गतो यस्मात् युपुरुपुलुपु विमोहनेइति हिगताविति धात्वोरूपे ध्रुवस्थितिः. कैलासवास्तव्यश्च साज्ञानः सतमोगुणश्च कनकमंगना च प्रिये यत्र कनकं धत्तूरो गौरी च प्रिये यस्य उभेोऽपिभवः संसारः शिवश्च शांतिं निवृत्तिं परमानंदं च ॥ ६० ॥

असावेति नरेंद्रं राजानं विषवैद्यं च विनतानंदनं प्रणतानंददं गरुडं च वैनतेयत्वात् ॥ ६१ ॥

शुचिसान्निध्ययोगेन त्वदि रामोपगूहनात् ॥
कर्मसाक्षिसमालोकाद्भवं हेमंतवज्जयेत् ॥ ६२ ॥
अंधं तमश्चेदयि बाधते त्वां सरोजनेत्रं जगदेकसूत्रम् ॥
सुधाचरित्रं परमं पवित्रं कुरुष्व मित्रं वसुदेवपुत्रम् ॥ ६३ ॥
कृच्छ्रदविषयोपहितो भवो महापन्नगोऽसिभोपयाति ॥
तद्भयशमनाय विना जिष्णुपविक्रममहं न कलयेऽन्यम् ॥ ६४ ॥
कुजन्मिप्रायेयं मदकरकलिव्यालिविषमा ।
कुदाराव्यासंगप्रतिहतसुगोत्राऽतिभयदा ॥
द्विजिह्वैराकीर्णा व्यथयति महावंचकवती ।
प्रपंचारण्यानी भज भज सखे तन्नरहरिम ॥ ६५ ॥
भ्रमयति भवापित्तं चेद्भज नरसूतशेखरं कृष्णम ॥
सद्रोरसेन सहासितमनुत्रुटिकं सर्वथा त्यज स्नेहम् ॥ ६६ ॥
पतितानां संसारांधतमसकूपे विनष्टदृष्टीनाम् ॥
महता विहिता महिना सुहिता स्यादच्युतावतारकथा ॥ ६७ ॥

शुचीति शुचि साधुरग्निश्च रामोपगूहनरामऽस्थान स्त्रीणामाश्लेषश्च आत्मनो दर्शन सूर्यातपसेवा च ॥ ६२ ॥

अंधंतमइति । अज्ञान अधकारश्च मित्रं सखाय सूर्यं च ॥ ६३ ॥

कृच्छ्रदविषयेति दुःखविषयसहित कृच्छ्रप्रदेशर्माहित कृच्छ्रदोपोविषेण योपः विमोहः यपुविमोहने तस्य हित आधान यस्मात् महापन्नग सर्पः महापत्पर्वतो वा जिष्णु. अर्जुनः त पाति स हरिः तस्य विक्रम. अवतारलीला जिष्णुपो हरिस्तस्य वि. पक्षी गरुडस्तस्य क्रम. पदन्यास. जिष्णुरिंद्रस्तस्य पविर्वज्रस्तस्य क्रमः क्षेपश्च ॥ ६४ ॥

कुजन्मीति । कुत्सितप्राणिबहुला वृक्षप्राया च मदकरो यः कलिस्तस्य व्यालश्च विषमामदकला ये करिणस्तेषा च रलयोरैक्यात् कुत्सितस्त्रीव्यभिचारेण दूषित कुला कुं दारयति ते कुदाराः सूकरास्तद्व्यासगेन उत्कीर्णभूमिः द्विजिह्वाः खलाः सर्पाश्च महावंचकाः प्रतारका जंबुकाश्च नरहरिं नरसिंहं ' अटव्यानारसिंहश्चेति वचनात् ॥ ६५ ॥

भ्रमयतीति । नरः अर्जुनस्तस्य यः सूतशेखरः सारथिश्रेष्ठस्तं कृष्ण हे नर कृष्णं वर्णतः सूतशेखरं नाम रसायनं च सद्रोरसः साधूनां वाग्रसः दुग्धं च घृतं वा हसितेनस्मितेन सहितं सशर्करं च अनुत्रुटिकं त्रुटिः सूक्ष्मकालमानं प्रति तत् अनुगतसूक्ष्मैलाबीज च स्नेहं गृहदारादिषु प्रेमाणं तैलं च ॥ ६६ ॥

पतितानामिति । नष्टज्ञानाना नष्टेक्षणाना च अच्युतावतारकथा भगवत्कीर्तनं अभ्रष्टध्यानमार्गवार्ता च ॥ ६७ ॥

पतितानांसंसारांधतमसकूपे विनष्टदृष्टीनाम् ॥
एकं महदुपदिष्टं कष्टहरं चक्रिणो हि गुणभजनम् ॥ ॥ ६८ ॥
संसारे वर्तमानस्य नानादुष्कृतकारिणः ॥
यदि ते नरकाद्भीतिः कृष्णमेकं समाश्रय ॥ ६९ ॥
भवसागरं तरीतुं वांछसि चेत् सौम्य कुरु मदीयवचः ॥
यत्नांतरं विहाय प्रत्नं भज तारकेशकुलरत्नम् ॥ ७० ॥
द्वाविह दृष्टौ शरणीकर्तुं संसृतितरंगिणीतरणे ॥
उडुपकुलपतिः कृष्णः श्रीरामस्तरणिकुलपतिश्चान्यः ॥ ७१ ॥
जातो जलप्रसंगाद्विस्मारयति भ्रमोऽयमात्मानम् ॥
शुभमधुनार्द्रसेन च सुरसंसेव्यं भजस्व चंडीशम् ॥ ७२ ॥
समासितरुचिराज्योपेतमरे नरकेसरिणं संसेवेथाः ॥
अमृताभिमुखः स्याः किं कुर्याद्दुःसहतापभवज्वर एषः ॥ ७३ ॥
व्यथयति बहुदोषभवोपताप एषोऽभ्रकायकृष्णाय ॥
स्पृहय सुखोदर्कायानेकसुरसभावनैः प्रसिद्धाय ॥ ७४ ॥

पतितानामिति । महद्भिः सद्भिर्बहुभिश्च चक्रिणो भगवतोऽरघट्टस्य च गुणा-
न भजन सेवन गुणस्य स्थूलरज्जोश्च ॥ ६८ ॥

संसार इति । कृष्णो हि नरकस्य असुरविशेषस्य हंता ॥ ६९ ॥

भवसागरमिति । तारकाणामीशश्चंद्रस्तस्य कुले रत्नमिव श्रेष्ठ कृष्ण तारयंति
ते तारकाः कर्णधारास्तत्कुलश्रेष्ठ च ॥ ७० ॥

द्वाविहेति । उडुपश्चंद्रः चर्मावनद्धवंशविदलनिर्मित तरणसाधनं टोकरोति प्र-
सिद्धं च तरणिः सूर्य नौकेति च ॥ ७१ ॥

जात इति । जलस्य जडस्य अविद्याया उदकस्य च भ्रमो भ्रांतिः शुभं अ-
धुना उत्तममधुना च आर्द्ररसेन सार्द्रप्रेम्णा आर्द्रकस्य रसेन च सुरैः संसेव्यं सु-
रसं सेव्यं च चंडीश महादेवं राजचंडीश्वराख्यरसायन च ॥ ७२ ॥

समासितेति । सम्यक् या असिता श्यामला रुचयः तासां राज्या पंक्त्या उ-
पेतं यद्वा समा तुल्या या सिता श्वेता शर्करा तत्पंक्त्या यद्वा मया लक्ष्म्या सहितः
समः सितरुचि श्वेतद्युतिः राज्येन त्रिभुवनाधिपत्येन उपेतः सचासाविति विशेष-
णोभयपदकर्मधारयः तुल्यशर्करायुत सुदरघृतेनोपेत च नरकेसरिण नृसिंहं नृके-
सरोपयं रसायनं च अमृताभिमुख. मोक्षाभिमुखः दुग्धपानाभिमुखश्च भवः तरुण.
संसारश्च ॥ ७३ ॥

व्यथयतीति । अनेकदोषसंभवः । ससारसंबंधी तापः उल्बणवातपित्तादिदोष-
संभवः उपताप. रोग. अभ्रवत् कृष्ण. कायो यस्य तस्मै कृष्णाय अभ्रकाय रसा-

संसाररोगो यदि बाधते त्वां गदारिहस्तः करुणार्द्रचित्तः ॥
सौकर्यतो यस्य रसोद्धृतिस्तं याह्योषधीशान्वयरत्नमेकम् ॥७५॥
सुवर्णमालिनी कृष्णामधुना भज चेद्भवः ॥
जिर्णज्वरो बाधते त्वां पिंडिकोद्वेष्टनादिभिः ॥ ७६ ॥
उन्मत्तप्रतिविशृंखलं विहरति ब्रह्मांडभांडोदरे ।
नृणां धैर्यविलोपके कलियुगे स्वच्छंदसंचारिणि ॥
विध्वस्ता हि महागमा द्विजकुलं सुव्याकुलं संकुलं ।
प्रायेणैव रजस्तमोऽप्युपगतं पंथा हृतो नैगमः ॥ ७७ ॥
दूरेणापगतो वृषो बहुमदामोदः पुनः पुष्कलं ।
संक्रांतो मधुपा भ्रमंति निभृतं दृष्टाश्च पुष्पत्विषः ॥
रूढाश्चंचलदृश्योऽधिविटपं नानादरैर्भीरवो ।
नन्वं को नु हरिं विनाऽस्य जगतः स्याद्रक्षणे दक्षिणः ॥ ७८ ॥
कलिमलिनमतेर्नरस्य नैव स्वपदप्राप्तिपरोऽपरोऽस्त्युपायः ॥
हरिगुणपरिशीलनात्तदेतन्निपधेंद्रो निपुणं विचारणीयः ॥ ७९ ॥

[illegible] उदर्के उत्तरकाले यस्य अनेकवारकृततुरगमहरक्षणैः प्रख्याताय अनेकैः सुरैः आर्यावर्तस्थैः [illegible] भावनाभिः प्रसिद्धाय । संपन्नाय दत्त[illegible] ॥ ७४ ॥

संसारेति । गदा अरि चक्रं हस्ते यस्य स गदारिः औषधं च यस्य [illegible]कर्तृकं रसोद्धरणं भूम्युद्धरणं सौकर्येण सूकरभावेन तद्रूपावतारेण पारदोद्धरणं च सुकरत्वेन [illegible] ॥ ७५ ॥

सुवर्णेति । सुवर्णमालिनी रसायनविशेष च कृष्णा कृष्णवर्णा अधुना कृष्णामधुना [illegible] च पिंडिकास्नायु. उद्वेष्टन वस्त्रं पिंडिकयोः जंघापश्चाद्भागयो उद्वेष्टन उद्वेष्टन तच्च जीर्णज्वरं द्योतयति ॥ ७६ ॥

उन्मत्तेति । [illegible] च कलियुगं प्रसिद्धं करींद्रं च रलयोरैक्यात् महागमाः महाशास्त्राणि महावृक्षाश्च । द्विजकुलं विप्रकुलं पक्षिकुलं च । रजः गुणः धूलिश्च । तमः गुणः अंधकारश्च । नैगमः वैदिकः वणिग्जनसंबंधी च ॥ ७७ ॥

दूरेणेति वृषः धर्मः [illegible] मदो गर्वः आमोदस्सोपः मदस्य दानोदकस्य गंधश्च मधुपा भृगा मद्यपाश्च विटपे वृक्षशाखायां जारश्रेष्ठे च नाना आदरैः भयैश्च भीरवः स्त्रियो मयक्षी[illegible] हरिं भगवंतं सिंहं च ॥ ७८ ॥

कल्येति । नरस्य नलस्य च स्वपदं स्वरूपं स्वराज्यं च हरिगुणपरिशीलनं भगवद्गुणचर्चा अश्वरज्जुधारणं च नलस्य राज्ञो [illegible] ऋतुपर्णराजस्य सारथ्यांगीकारेण स्वराज्यप्राप्तिरभूदिति ॥ ७९ ॥

कलिप्रदुष्टोऽक्षवशंगतश्चेद्भ्रष्टात्मसाम्राज्यपदो नरः स्यात् ॥
स्वकं पदं प्रापयितुं पुनस्तं मन्येऽनघा हारिहृदयविद्या ॥ ८० ॥
द्विजेंद्रत्रासाढ्यः किल बहलदोषोपचयकृत् ।
स्फुरज्जाड्योल्लासो गुरुसुदिनचर्याक्षयकरः ॥
कलिः शीततुश्च व्यथयति भृशं चेत्स्वनयने ।
निमील्य स्वच्छंदं हृदयधृतरामः स्वपिहि रे ॥ ८१ ॥
उर्यत्र सिद्धः सततं गुणोदयो सिद्धो रलोपः स्वरगौरवप्रदः ॥
तत्रैव नूनं रघुनाथमंदिरे मनोरथः सिद्धिमियादसंशयम् ॥ ८२ ॥

कलिप्रदुष्ट इति कलिनाप्रदुष्ट इति समानमुभयत्र अक्षवशं इंद्रियवशं पाशवशं च स्वरूपानंदच्युतिः साम्राज्यच्युतिश्च नरः नलश्च पदं स्वरूपं राज्यं च हरेर्भगवतः हृद्या प्रिया या विद्या आध्यात्माख्या अश्वहृदयविद्या च । नलः किल कलिना ग्रस्तः पुष्करेण भ्रात्रा द्यूतार्थमाहूतः सन् तेन सह द्यूतं कृतवान् तत्र तेन राज्यादि सर्वं जित्वा विवासितः स ऋतुपर्णराजगृहउवास तेन चाश्वहृदयविद्याहेतुना सारथ्ये नियोजितस्तेन कारणेन पुनःस्वपदप्राप्तिरिति भारतकथासूचन ॥ ८० ॥

द्विजेंद्रेति द्विजेंद्राणां त्रासो येषां तादृशा आढ्याः धनिका यस्मिन् चंद्रादयस्त्रासस्तेनाढ्या युक्तोऽतिशीनकरत्वात् बहलदोषाणां वृद्धिकृत् बहलो दोषोपचयः रात्रिवृद्धिस्तां करोति जाड्यं मौर्ख्यमालस्य च गुर्वी या सुदिनचर्या पुण्याचरणं दिवसचर्या च हेमंते हि रात्रिमानं वर्धते दिनमानं हीयते । हृदये धृतः रामो येन रामा स्त्री च ॥ ८१ ॥

ऐहिकामुष्मिकं सर्वमपि भगवदार्पणेव सिध्यतीत्यतउत्तरं वर्णयति उरिति उः रुद्रः तदवतारत्वाद्धनुमान् हशि चेत्युत्वं च सिद्धः सर्वदा कार्यकरणे उद्यतः रोरीति लोपदृष्ट्या सिद्धश्च सच गुणोदयः गुणैरुत्कृष्टः गुणत्वेनोदयो यस्य ओकारो भवितेति यावत् असिद्धोऽविद्यमानः हशि चेति दृष्ट्या च रलोपोऽभिलोपः राममंदिरे सीतावियोगेऽपि अश्वमेधादेर्जातत्वात् अभिमद्भावः रोरीति लोपश्च सच स्वर्गे अगौरवप्रदस्तुच्छत्वापादकः स्वरस्याचो गौरवं दीर्घत्वं ददाति । मनोरथशब्द प्रक्रियायां तु मनसूरथ इति स्थिते ससजुषोरुरिति सकारस्य रेफो मनर्रथ इति तत्र रोरीतिरेफलोपो हशि चेत्युत्वं च प्राप्तं विप्रतिषेधे परं कार्यमिति परत्वाल्लोपे प्राप्तेऽपि पूर्वत्रासिद्धमिति तस्यासिद्धत्वात् हशि चेत्युत्वे मनउरथ इति ततआद्गुण इति गुणे मनोरथइत्यस्य सिद्धिर्जायते एवं च मनोरथसिद्धौ उः सिद्धो रलोपोऽसिद्धश्चापेक्षितः तदत्रोभयमस्तीति राममंदिरएव मनोरथसिद्धिर्नान्यत्रेति ॥ ८२ ॥

कस्माद्दुर्गतिविह्वलो भवसि रे श्रीरामचंद्रप्रभुः ।
सर्वोदारगुरुस्तदीयजनतासंगेन संगम्यताम् ॥
भूत्वा प्रह्वतनुः स्तवैरभिनवैः स्तुत्वा निबद्धांजलि-
र्भक्त्याचारफलं निवेदय ततः पूर्णः स्वलाभो भवेत् ॥८३॥
अजरामरता यस्य पुंसो वसतिर्निरंतरम् ॥
अजराऽमरता तस्यावश्यं पाणितले स्थिता ॥ ८४ ॥
भुक्तिर्द्रव्यनिबंधनाऽस्य जगतो बोधैकलभ्या पुन-
र्मुक्तिस्तदुभयसिद्धयेऽत्र शरणं को नाम लोकत्रये ॥
एवं वेदपुराणशास्त्रनिचयानालोड्य संपश्यतां ।
दृष्टिं गच्छति राम एव भगवान्नान्यो वदान्यः क्वचित् ॥ ८५ ॥
सूर्यः शंकरः स्वयं हि जगतां संतापको नंदन-
स्तस्यैको जगदंतकस्तदनुजो मंदो जगत्पीडकः ॥
एवं सत्यपि मित्रतामुपगतः सर्वत्र यद्भास्करः ।
सोऽयं तस्य कुलेऽवतारमहिमा श्रीरामचंद्रप्रभोः ॥ ८६ ॥
सूर्यः स्थावरजंगमात्मजगतामात्मेत्यपि: संजगौ ।
मंत्राणां च स एव दैवतमिति प्राह प्रसिद्धं स्मृतिः ॥
ध्यायत्यर्चति यत्नमभ्यति यजत्येनं द्विजानां गणः ।
सोऽयं तस्य कुलेऽवतारमहिमा श्रीरामचंद्रप्रभोः ॥ ८७ ॥
भास्वानेष जडस्वरूपमपि मां तेजोमयं यो व्यधात् ।
तत्तस्मै प्रतिदेयमेवमनिशं युक्तोऽप्यशक्तः स्वयम् ॥

कस्मादिति दुर्गतिरधोगतिर्दारिद्र्यं च उदारः सरलः दाता च तदीयजनता साधवः राजपुरुषाश्च आचारस्य कर्मणः फलं चारफलं राजादनफलानि च स्वलाभः आत्मलाभो द्रव्यलाभश्च ॥ ८३ ॥

अजरामरेति पूर्वार्धे अजश्चासौ रामश्च तत्र रता उत्तरार्धे अजरामरता जरामरणशून्यता ॥ ८४ ॥

भुक्तिरिति राम: रा: द्रव्यं म: बोध: मन अवबोधन इत्यस्मादन्येभ्योऽपि दृश्यत इति ड: एवं च रामइत्यत्र भुक्तिमुक्तिसाधनमुभयमपि लभ्यते ॥ ८५ ॥

श्रीरामसंबंधवंत सर्वे जना: सत्कुर्वंतीत्याह सूर्यइति मित्रतासूर्यतां सख्यं च ॥ ८६॥

सूर्यइति ' सूर्यआत्मा जगतस्तस्थुषश्च ' इत्यपिश्रुतिः ' एकैव वा महानात्मा देवता ससूर्य ' इत्याचक्षत इति स्मृतिरूपा सर्वानुक्रमणी यतः सर्वमंत्राणां सूर्यो देवता तस्मात्तत्तन्मंत्रैः क्रियमाणं कर्म सूर्यविषयकमेवेति ॥ ८७ ॥

भास्वानेष इति जडस्वरूपमुदकमयं मंडलं डलयोरैक्यात् जडस्वरूपे चोदक-

लग्नो भिक्षुकशेखरः समभवद्रामस्य पृष्ठं ततो-
ब्रह्मण्यः स चकार भास्करकुलं सर्वप्रकाशोज्ज्वलम् ॥ ८८ ॥
वृत्तिं पुनः कामपि कल्पयेथाः श्रीमानुदारस्त्वमतः श्रितोऽसि ॥
मयार्जितं वृत्तिशतं हरंतं भवंतमेतं किमिव ब्रवीमि ॥ ८९ ॥
विस्मयं वितनोत्येतद्विषमाक्षविचेष्टितम् ॥
अप्यंधकारिणा येन नृणां चक्षुः प्रकाशते ॥ ९० ॥
नीलांगो मकराभकुंडलधरः खर्वश्च यः कच्छपो ।
दंताः कुंदविलासिनः करयुगे यस्याब्जशंखौ पुनः ॥
आस्ते यस्य विशालवक्षसि महापद्माधिवासोऽनिशं ।
लोका आशु मुकुंदमाश्रयत तं चेत्पूर्णवित्तेच्छवः ॥ ९१ ॥
यो वै धृतः श्रीहरिणा निजे करे स्पर्शः स एवेति विनिश्चयो मम ॥
स्वस्पर्शमात्रेण हि लोहलं ध्रुवं चकार शंखोऽपि सुवर्णसंभृतम् ॥ ९२ ॥
अहो धनार्थं प्रधनं विधाय सुखेन वीरा निधनं भजंते ॥
तत्तादृगप्यत्र धनं विहाय धीराः सुखं श्रीपतिमाश्रयन्ते ॥ ९३ ॥

मयमंडले संक्रांताः किल सूर्यरश्मयश्चंद्रइत्याचक्षते प्रतिदिवं प्रत्युपकर्तव्यं द्विजशालश्चेद्रः पाठांतरं भिक्षुकः शिवस्तस्य शेखरोऽवतंसः भिक्षुकश्चरश्च ब्राह्मणश्च रामचंद्रइत्यत्र रामस्य पृष्ठ सर्वदालग्नश्चंद्रो दृश्यते ॥ ८८ ॥

वृत्तिं पुनरिति वृत्तिं जीवनोपायं क्षेत्रारामादि मनोवृत्तयश्च व्याजनिंदेयं ॥ ८९ ॥

विस्मयमिति विषमाक्षः शिवः चक्षुर्नेत्रं ज्ञानं च अंधकस्य दैत्यविशेषस्य अरिणा अंधंकरोत्येवं शीलेन च ॥ ९० ॥

नीलांग इति महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । मुकुंद कुंद नीलाश्च खर्वश्च निधयो नवेति भगवतो नवनिध्यात्मकत्वात् तमेव आश्रयत हे पूर्णवित्तेच्छवः पूर्णज्ञानेच्छवश्च खर्वो वामनः विदः भावो वित्ता ॥ ९१ ॥

यो वै धृत इति स्पर्शाख्यो मणिः यत्स्पर्शेन लोहं स्वर्णं संपद्यते लोहलं अस्फुटवाचं बालत्वात् ध्रुवं उत्तानपादपुत्रं लोहसंग्राहकं च लोहं लातीति व्युत्पत्तेः सुवर्णाः शोभनाक्षराणि सुवर्णं कांचनं च ध्रुवः किल सपत्नमात्रा हेलितः स्वजननीकथनाद्भगवंतं प्रसादयितुं वनं निजगाम तत्र च श्रीनारदेन संबोधितः सन् मधुवनं तपोऽभ्यतिष्ठत् । अथानुग्रहीतुमुपगतं श्रीभगवन्तमालोक्याद्वितीयोऽयं पुरुषइति कृत्वा तं स्तोतुमियेष परं वाक्पाटवाभावान्नाशकनोत् । तद्भगवता विज्ञाय श्रुतिमयपांचजन्येन गल्लदेशे स्पृष्टस्तत्प्रभावादधिगतवाक्शक्तिर्भगवंतं स्मर्यादैः स्तवैस्तुष्टावेति दिक् ॥ ९२ ॥

अहो इति प्रधनं युद्धं निधनं मरणं धीरा विवेकिनः ॥ ९३ ॥

यं सद्योऽनुजिघृक्षुरस्य हरति द्रव्यं तदेतत्प्रभोः ।
किं श्लाघ्यं ननु मादकं तदिति चेत्स्याद्दुर्बलोऽनुग्रहः ॥
मैवं युक्तमेव तस्य तदसद्वित्तापहारक्रिया ॥
सद्वित्तार्पणमेष वत्सलतया कर्ता यतः श्रीपतिः ॥ ९४ ॥
नापुत्रस्य गतिर्मतेति ससुतः स्यादित्यमुक्तश्रुतेः ॥
को नामात्र जनो न सत्यमिति तद्ब्रूयात्परं वच्म्यहम् ॥
यो गोविंदपरः ससद्गतिधरः सोऽयं सुताढ्यश्च य-
छ्लोके तद्गतिभाक् सनंदन इति ब्रह्मात्मजो गीयते ॥ ९५ ॥
तेजोनिधिर्यद्यपि कर्मसाक्षी तथापि सूर्यान्वयकांतयोगम् ॥
विना कथंस्वित्प्रभवेद्वदस्व सत्पाकतासिद्धिममुष्य कर्तुम् ॥९६॥
यद्यप्यपकारधियं कुरुते परमेश्वरे तथाप्येषः ॥
सत्त्वं नैव विमुंचाति केवललयभुक् स हि श्रीशः ॥ ९७ ॥
मानरहितः स्वकार्ये पटुश्चतुर्दशजगत्प्रथितगोत्रः ॥
मकरालयांतवासी प्रियभक्तश्चित्तपावनो भगवान् ॥ ९८ ॥

यं सद्य इति सद्वित्तार्पण उत्तमद्रव्यार्पणं ब्रह्मविद्यार्पणं च ॥ ९४ ॥

नापुत्रस्येति सनंदनः एतन्नाम नंदनेन पुत्रेण सहितश्च यो हि जातमात्रएव प्रव्रजितः यस्योपनयनमपि नास्ति ॥ ९५ ॥

सर्वगस्य सर्वात्मनोऽपि ब्रह्मणो भक्तकार्यकारित्वं सगुणद्वारैवेत्याह तेज इति तेजसांनिधिः प्रकाशोपमश्च कर्मसाक्षी ब्रह्म सूर्यश्च सूर्यान्वयकांतः सूर्यवंशकमनीयो रामः सूर्यसंबद्धकांतः सूर्यकांतश्च सत्पाकता पाकः पवित्रः 'तं पाकेन मनसे' त्यादौ दर्शनात् उत्तमपवित्रता साधुः पाकः पचनं यस्य तस्य भावस्तत्ता उत्तमपाकइत्यर्थः वदस्वेत्यात्मनेपदं भासनार्थे भासमानो वदेत्यर्थः ॥ ९६ ॥

तादृशस्य परमकृपालोर्भगवतः प्रातिकूल्येन चिंतनमपि न स्वार्थविहंतीत्याह यद्यपीति अपकारो विरोधस्तद्युक्ताबुद्धिः पकाररहितोऽयमिति धीश्च परमेश्वरे अपकारबुद्धौ प्रयुक्तायामपि रमेश्वरोऽपि स्थाने यश्च रमेश्वरः स परमेश्वरादपरोनेति ९७

भगवतो हि भक्ताः प्रियाभवंतीत्याह मानेति मानं प्रमाणं तेन रहितोऽप्रमेयइत्यर्थः यद्वा मा च नरश्च पार्थश्च ताभ्यां हितः अभिमानरहितश्च स्वेषां स्वीयानां भक्तानां कार्यसंपादने पटुः स्वस्यात्मनः कार्यसंपादने पटुश्च चतुर्दशसु जगत्सु भुवनेषु प्रसिद्धं गोत्रं नाम यस्य चतुर्दशसंख्याकानि जगत्प्रथितानि गोत्राणि यस्य समुद्रस्य अंते मध्ये वास्तव्यः 'नियाते गुरुमर्येते' त्यत्रांतशब्दस्य मध्यपरत्वदर्शनात् समुद्रस्यांते प्रांते च प्रियाः भक्ताः अस्य प्रियं भक्तं ओदनं यस्य चित्तं पावयति शोधयतीति चित्तपावन इति ब्राह्मणजातिविशेषश्च ॥ ९८ ॥

य: पुष्पवद्दग्भृतपांडुबालो वल्यंचितांगो नवनीरदश्री: ॥
हरि: पुराणोऽयमिह श्रुतिश्च भक्तप्रियस्तत्कथिकाप्रियोऽपि ॥९९॥
हर्यप्रिय: सर्वजनाप्रिय: स्याद्धर्यप्रिय: सर्वजनप्रिय: स्यात् ॥
इति स्म जाने हयमारमेकं पश्यन् पदार्थं चणकं द्वितीयम् ॥१००॥
सद्वंशजात: सगुणस्तु नम्रो यश्चापि शक्तौ बहुमार्गणेभ्य: ॥
ददाति लक्षं तमहं न मुंच कोदंडमित्थं कथयन् [illegible] ॥ १०१ ॥
जलजं जलस्थमपि ज [illegible] हीनमधिगतामोदम् ॥
भ्रमरहितं वस्तु करे कलय [illegible] ॥ १०२ ॥

चरंति रथवत् [illegible] ननु [illegible] ये जना
निधाय निखिलं [illegible] स्वभारं परम् ॥
करेण कलयामि [illegible] जनान्
प्रदर्शयितुमच्युत: [illegible] चक्रं करे ॥ १०३ ॥

य: पुष्पाति पुष्पवंतौ सूर्या [illegible] यस्य [illegible] पुष्पवंतौ दिवाकर निशाकरावित्यमर: पुष्पं नेत्ररोग [illegible] पाण्डुरा: पाण्डवा येन भृतपाण्डुकेशश्च बलिना [illegible] यस्य वलिभि: शिथिलचर्मभिरंचितं अंगं यस्य [illegible] निर्गता रदश्रीर्दंतशोभा यस्य [illegible] भक्तप्रिय: ओदनप्रियत्वकथैव कथिका [illegible] व्यंजनविशेष: प्रिया यस्य च अतिवृद्धस्य हि [illegible] तत्प्रियत्वं योग्यमिति ॥ ९९ ॥

हरीति हयमार: करवीरमूलं [illegible] हयमार सहर्यप्रिय एव हरिरश्वघातको हि हरेरश्वस्य [illegible] सर्वेति ॥१००॥

धर्मेति [illegible] सद्वंश: उत्तम कुल वेणुश्च सगुण: [illegible] कुटिलश्च यश्चापि शक्तौ सत्पामार्गणेभ्यो याचके [illegible] ददाति यश्चापि धानु- ष्कस्तस्य शक्तौ पाटवे सति मार्ग [illegible] ददाति च ॥ १०१ ॥

जलजमिति डलयोरैक्यात् [illegible] च [illegible] आमोदो हर्षो गंधो यस्य च भ्रमेण रहितं भ्रमरे [illegible] च ॥ १०२ ॥

चरतीति हरिर्भगवान् अश्वश्च निज [illegible] स्वोदरकरहृवं च

विष्णुपदं बहुतारकमित्युच्चैर्यद्वदंति सर्वजनाः ॥
तदिदं न मृषामन्ये परं त्वपेक्षा स्थिता प्रदोषस्य ॥१०४॥
बहुतारकता विष्णुपदेऽस्त्येव न संशयः ॥
किंत्वंजसा सा बहुलदोषोद्रेके हि दृश्यते ॥ १०५ ॥
दोषाकरो भवतु विष्णुपदानुगामी
सद्वृत्तनां स कलयेत्किल पंचदश्या ॥
पाश्चात्यषोडशकलाक्षयतो विदेह-
भावं व्रजेदिह निदर्शनमेष चंद्रः ॥ १०६ ॥
भवचरणे चेतश्चेत् [illegible] जायेत तर्हि भवतरणम् ॥
कामरणमकाकारं यर्हि भजेत्तर्हि रे भजेन्मरणम् ॥ १०७ ॥

[illegible] पादं रथचरणं च [illegible] च ये [illegible]तेषां दास्यमपि करोमि [illegible] ॥ १०३ ॥

[illegible] पापाशयानामिति नाश- [illegible] च बहु यथा तथा तारकं [illegible]स्य च पातकयपेक्षया हि तस्य [illegible]वृद्धिरिति ॥ १०४ ॥

[illegible]षामुद्रेकः बहुलः कृष्ण- [illegible] बहुधो दृश्यंते तारकास्त- [illegible] ॥ १०५ ॥

[illegible] हरिचरणमाकाशं च सद्वृ- त्तनां [illegible]ध्यात्मविद्याग्रंथेन पूर्णिमया च [illegible]शरीरं अन्यत्र प्रसिद्धाः [illegible] प्रवृत्ते तत्प्रसादेन कंचन- गुरु[illegible] निश्चयेन लिंगदेहभंगपूर्व- क [illegible] अत्रैव समवलीयंते विमुक्त- श्च [illegible] ॥ १०६ ॥

भवचरण इति [illegible] विग्रहः अकः पापः आकारो यस्य [तं] पापरूपमित्यर्थः कामरणं [illegible] मरणं संसारः मृत्युश्च भवचरण इति शब्दे चे चकारं [illegible] भवति तथा कामरणशब्दः अ- काकारः काकारेण रहितश्चेत् मरणमिति जायत इति ॥ १०७ ॥

स्याल्लिंगभंगो बहुवाररामासंगेन कामाभिहतस्य पुंसः ॥
लिंगस्य भंगे हि विदेहभावो भवेदिति स्पष्टतरं ब्रवीमि ॥१०८॥
सुखस्य लिंगं वदनोज्ज्वलत्वं तत्सर्वदा सौम्य समीहसे चेत् ॥
निःसंगमंगीकुरु शर्वदास्योज्ज्वलत्वमेकं किल निर्व्यलीकम् १०९
तत्र श्रवणं ॥ भो भक्तिमार्गनिरताः श्रवणं कुरुतानिशम् ॥
भजनस्य हि संपूर्तिः श्रवणेन विना कुतः ॥ ११० ॥
स्पृहयते यदि माधवलब्धये भवतु तच्छ्रवणप्रवणो जनः ॥
श्रवणधिष्ण्यगतो भगवानिति प्रथयति श्रुतिरेव सनातनी १११
श्रवणानुसरणमेव श्रीरामं स्पृहयतां सतामेकम् ॥
श्रवणाभावं रचयन् रामविरहमन्वभूद्दशरथोऽपि ॥ ११२ ॥
यो नवीनोपनीतानां विना श्रवणकर्मणा ॥
श्रुतिग्रहः सविफलः शिष्टैश्चापि विगर्हितः ॥ ११३ ॥

स्याल्लिंग इति कामोऽभिहतो यस्य निष्कामस्येत्यर्थः बहुवारं बहुकालं रामेण आसंगः आसक्तिस्तेन लिंगदेहस्य सप्तदशकलात्मकस्य भंगो नाशः तस्मिन् सति विदेहकैवल्यं मोक्षः स्यात् कामेनाभिहतस्य ताडितस्य बह्व्यो या वाररामा वेश्या-स्तत्संगेन लिंगभंगः उपदंशेन तस्मिन् सति विदेहभावो मरणं जायेतेति ॥१०८॥

सुखस्येति शर्वस्य शिवस्य दास्ये उज्ज्वलत्वं निष्कपटत्वं यच्छर्वदास्योज्ज्व-लत्वं तच्छसयोरभेदात्सर्वदास्योज्ज्वलत्वं सर्वदाऽऽस्यस्य मुखस्योज्ज्वलत्वं ॥१०९॥

अथ सामान्येनोक्तां भक्तिं श्रवणकीर्तनादिविशेषाकारेण वर्णयति तत्र तावदा-दौ श्रवणमाह भो इति श्रवणेन तन्नामकभक्त्या नक्षत्रविशेषेण च भजनस्य कीर्तनादेः नक्षत्रलक्षणजनस्य अश्विन्यादिसप्तविंशतिराशिरूपस्य च ॥ ११० ॥

स्पृहयत इति श्रवणाधिष्ण्यं श्रवणभक्तेः पद तन्नक्षत्रं च श्रवणस्य हि वि-ष्णुदेवकत्वं तथा च श्रुतिः ' त्रेधा विष्णुरुरुगाय ' इत्यादि ॥ १११ ॥

श्रवणेति श्रवणं तन्नामभक्तिः श्रवणाख्यो वैश्यमुनिश्च यत्र हते तत्पित्रा दश-रथं प्रति शापो दत्त किमिति त्वमप्येव पुत्रविरहवान् भवेति ' श्रवणमुनिपितुः प्रायः शापकाल ' मिति हनुमन्नाटके ॥ ११२ ॥

यइति यथा नूतनब्रह्मचारिणा श्रवणनक्षत्रे कर्तव्येनोपाकरणाख्यसंस्कारेण विनाकृतं वेदग्रहणं विफलं शिष्टासंमतं च तथा विगेरुडस्तस्येनो विष्णुस्तेनोपस-मीपं नीतास्ते न भवंति ते नवीनोपनीताः संसारिणस्तेषां सच्छास्त्रश्रवणं विना कृतं कर्णग्रहणं विफलं शिष्टासंमतं च ' बिलेबतोरुक्रमविक्रमान्ये न शृण्वतः क-र्णपुटे नरस्ये ' ति भागवतोक्तेः ॥ ११३ ॥

श्रवो मुकुंदस्य सखे दिगंतारूढं तथासि त्वमपि श्रवो मे ॥
सख्यं तवानेन भवेत्तु मुख्यं गुणेन नाम्ना पयसोरिवेह ॥ ११४ ॥
धत्से यत्किल कुंडलं वचसि यच्चांगेषु नेत्रांकतो ।
यच्चैकांततया खलान्समुदितान्संसेवसे कौरवान् ॥
तत्कर्ण प्रतिभासि कर्ण इव मे नाम्ना गुणैः सर्वथा ।
तद्राधाप्रियसाधको भव नरस्तोत्रप्रबंधांस्त्यज ॥ ११५ ॥
या किन्नरोपज्ञमनेकरागा समूर्च्छना या स्वरभावयुक्ता ॥
तां गीतिकां कर्ण विहाय दूरं शृणु त्वमेताः(?) पुरुषोत्तमस्य ॥११६॥
युक्तं विरक्तः खलु विश्वदेवश्रितोत्तरागर्भभवः परीक्षित् ॥
ददर्श विष्णोः श्रवणं तदादौ प्रत्यग्दृशिस्थो भजनस्य मध्ये॥११७॥

भगवद्यशःश्रवणमात्रं कुरु । ततस्तुभ्यं तद्विनान्यत्किमपि न रोचेतेति कविः स्वकर्णमभ्यर्थयते । श्रव इति । यथा पयः पय इति नाम्ना माधुर्यादिगुणेन च दुग्धजलयोर्मुख्यं सख्यं तथा हे श्रवः कर्ण तवापि मुकुंदश्रवसश्च स्याद्यशोऽपि दिगंतारूढ । त्वयि दिशो देवतात्वेनातः रूढा यस्मिंस्तथोक्तं । 'रोरि' इति लोप, ढ्रेति दीर्घः ॥ ११४ ॥

धत्स इति । कुंडलं कर्णवेष्टनं, तदेव सहजं च । अंगेषु प्रतीकेषु, देशविशेषेषु च । नेत्रांकतः नयनसमीपे, नेत्रं नायकस्तस्यांकं चिन्हं तेन प्रभुत्वेनेत्यर्थः । खमाकाशं लाति गृह्णाति तथोक्तास्तद्गुणत्वादुद्धताश्च । समुदितानुच्चारितानुदयं गताश्च । कौरवान्सुयोधनादीन्, कौ पृथिव्यां रवान् शब्दान् । राधाप्रियः कृष्णो, राधाया एतन्नाम्न्याः कैवर्तकुटुंबिन्या इष्टं च । तया हि कर्णः पालितोऽभूत् । नरो मनुजोऽर्जुनश्च ॥ ११५ ॥

कदाचिदापातरमणीयत्वेन गीतं प्रवर्तिष्यसे तत्राह । येति । किन्नरा देवगायकविशेषास्ते उपज्ञा आद्यज्ञानं यस्याः । स्त्रीलिंगविशेषणत्वेऽपि उपज्ञोपक्रममिति नपुंसकत्वं । अनेके रागाः भैरवरागकल्याणादयो यस्या । मूर्च्छना एकविंशतिः । सप्तस्वराणां प्रत्येकं ग्रामत्रयं । स्वराः षड्जादयः सप्त तेषां सत्ता यस्यां । भगवद्गीतास्तु पुरुषोत्तमोपज्ञं वैराग्यपापादिका मोहविध्वंसिन्यश्च स्वर्गप्रापिकाश्च । किन्नरो देवगायकः, कुत्सितनरश्च । रागो विषयप्रीतिः, रामकल्याणादिश्च । मूर्च्छना मोहः, एकविंशतिश्च । स्वरित्यव्ययं स्वर्गवाचि तद्भावः, षड्जादिसत्ता चेति ॥ ११६॥

यत्परीक्षिद्धरिगुणश्रवणमेव चकार तद्युक्तमित्याह । युक्तमिति । विश्वस्य देवो नाथो हरिस्तेन श्रितो य उत्तराया गर्भस्तत्र भवः । 'अश्वत्थाम्ना प्रयुक्तं ब्रह्मास्त्रं भगवान्गदापाणिर्गर्भस्थः सन्निवार्य परीक्षिद्रक्षणं कृतवान्' इति भागवते । प्रत्यग्दृशि स्वरूपज्ञाने स्थितः । भजनस्य मध्ये विष्णोः श्रवणमेव ददर्शेति युक्तं । विश्वैः

अथ कीर्तनं ॥ स्त्रीचिंतापि मनोभवं वितनुते तत्सन्निधिः किंपुन-
स्तस्मिन् सत्यपि नित्यदा नुजप (भज) ति श्रीरामरामेति यः ॥
साधोस्तस्य महेश्वरस्य न पुरः स्थातुं समर्थः स्मरो ।
नूनं दर्शयितुं जनानिति भवोऽभूदर्धनारीनटः ॥ ११८ ॥
सत्त्वप्रधानानि जगाद यास्को नामानि गीतासु तु वासुदेवः ॥
सत्त्वं सुखे संजयतीत्यवोचन्नामैव तस्मान्महते सुखाय ॥ ११९ ॥
भो मानवा नाम वदध्वमुच्चैस्ततो भवेज्ज्ञानमतीव शुद्धम् ॥
सुप्रत्ययोऽस्मादविशेषतः स्यादिति प्रतिज्ञां कुरुते ह्यनंतः॥ १२० ॥
मंथानं स्वधियं विधाय भगवानाम्नायरत्नाकरं ।
निर्मथ्यासकृदुज्जहार गिरिशो रामेति रत्नोत्तमम् ॥
तद्यस्याधिगलं विराजति महाभागाय दिव्यात्मने ।
तस्मै धन्यतमाय न स्पृहयतां किं मुक्तिपण्यांगना ॥ १२१ ॥
श्रीरामनाम्नः कथनेन मर्त्यो दुष्टोऽपि भिन्नात्मकतां विहाय ॥
ऐक्यं समेतीति वितर्कयेऽहं यत्ना कुजन्माऽजनि नाकुजन्मा॥१२२॥

देवैः श्रिता देवतान्वेन सा उत्तरा उत्तराषाढा तत्रस्थः। प्रत्यक् परार्चाना या दृक् दृष्टिस्तत्र तिष्ठति तथा भूतश्च ।विष्णुदेवताक श्रवणमेव भजनस्य नक्षत्रजनस्य मध्ये पश्यति । प्रथमोपनतत्वात् । अश्विन्यादिनक्षत्राणि हि शुशुमारचक्रे स्थितानि प्रागच्छंति ॥ ११७ ॥

अथ कीर्तनं । तत्र नाम्नः प्राधान्यातदेव स्तुवन्नादौ नाम कामं जयतीत्याह । **स्त्रीति** । साधोः सतो महेश्वरस्य महासमर्थस्य, शिवस्य च । यथा मम स्त्रियमर्धांगे वहतोऽपि नामजपप्रभावात्स्मरोऽग्रतः स्थातुं न शक्तोऽभूदेवं नाम सर्कीर्तयितुरपीति दर्शयन् ॥ ११८ ॥

सत्त्वप्रधानानीति ।' भावप्रधानमाख्यात, सत्त्वप्रधानानि नामानि ' इति यास्को नाम ऋषिर्नैरुक्त आह । यतो नाम सत्त्वप्रधानं सत्त्वं च सुखकारणं तस्मान्नामैव सुखाय कल्पत इति ॥ ११९ ॥

नाम ज्ञानप्रापकमित्याह । **भोइति** । वदध्व भाषमाना ब्रूत । 'भासनोपसंभाषा-'. स्यात्मनेपदं । सुप्रत्ययः सम्यक् ज्ञानमविशेषत स्त्रीशूद्राणामपीत्यर्थः । न केवलं ब्राह्मणानामेवेत्यनतः शेषः । भगवानेव वा । अनंतः शेषावतारः पतंजलिरेकवच-नमुत्सर्गतः करिष्यामीति नाम्नः प्रातिपदिकमात्रात्सुप्रत्ययैकवचनं विधत्त इति१२०

नाम्ना मुक्तिर्भवतीत्याह । **मंथानमिति** । मथान मंथनदंडं ।आम्नायो वेदः । दिव्यात्मने दिव्यदेहाय । धन्यतमाय धनहेतुर्धन्यस्तदतिशयवतं च ॥ १२१ ॥

श्रीरामेति । भिन्नात्मकतां द्वैत,भिन्नपदतां च । ऐक्यमद्वैतमेकपदतां च । ना नरः

बहिष्कृतः स विज्ञेयो यो हि गोत्रपराङ्मुखः ॥
धर्मोऽप्यस्य न संसिध्येत्कैवल्यं तु कुतस्तराम् ॥ १२३ ॥
बहुदोषभवोपतापशांतिं तनुतेऽतीविकृतिं परामकुर्वत् ॥
कलयेऽहमये जगत्त्रयेऽस्मिन्परमं नामरसायनं तदेकम् ॥१२४॥
यो घातुकोऽप्यघोऽपि स्यात्कृष्णकंठो यदृच्छया ॥
निर्भिद्य मूर्धसीमानं स तत्सायुज्यमाप्नुयात् ॥ १२५ ॥
अंग श्रीराममातः स्रवदमृतरसो नामनामा स्तनोऽयम् ।
हृद्यस्तेऽस्यानवद्यः क्रम इह परमं विस्मयं नस्तनोति ॥
बालानेवाद्विजान् यो जनयति न सुखं केवलं सेवमानान् ।
यत्प्रौढान्सद्विजानप्यतितरलयते सद्रसेनातितृप्तान् ॥ १२६ ॥
श्रीरामनाममाधुर्यस्वादसंभृतचेतसाम् ॥
मृद्वीकारसरूपं तु भाति तुच्छतमं भुवि ॥ १२७ ॥

कुजन्मा कुत्सितजन्मा। नाकुर्वल्मीक तस्माज्जन्म यस्य स वाल्मीकिरित्यर्थः। नाकुजन्मेति यद्विन्नात्मतया स्थित तन्नाकुजन्मेत्येकपदमभूत् ॥ १२२ ॥

नामपराङ्मुखं निंदति । बहिरिति । गोत्रं नाम, ज्ञानयश्च ॥ १२३ ॥

बहुदोषेति । बहुदोषविशिष्टसंसारजन्य उपतापः संतापो, बहवः प्रबला ये दोषा वातादयस्तेभ्य उत्पन्नो य उपतापो रोगः। विकृतिमसद्गृहं स्वधर्मत्यागादिकं, रोगांतरं च। नामरसायनं, आमरसायनं न भवति तच्च। आमं रसायनं सेवितमुद्दिष्टरोगं वारयेद्वा नवेति संशय एव परं रोगांतरमवश्यमुत्पादयेदिति। तादृगिदं न भवति १२४

यो घातुक इति। घातुकोः हिंस्रः। अघः पापयि यदृच्छया कृष्ण कृष्ण कृष्ण इति उद्धोषयेद्व्यावभेदपुरःसरं कृष्णसायुज्यमाप्नुयात् । यथा कृष्णं जिघांसुरघासुरः कृष्णकंठत्वेन मूर्धानं भित्त्वा तत्सारूप्यं गतः। 'अघासुरः सर्परूपः कृष्णजिघांसया मुखं व्यादाय वने स्थितः। गोपशिशुषु गह्वरधियातःप्रविष्टेष्वपि कृष्णं प्रतीक्षमाणोऽभूत्। भगवता तज्ज्ञात्वा तत्कंठं प्रविश्य शरीरं वर्धयित्वा तत्कंठनालरोधः कृतः। अथ प्राणरोधे जायमाने मूर्धानं भित्त्वा तत्सायुज्यमाप' इति भागवते ॥ १२५ ॥

नामेदृशं सदप्यतिमधुरमित्याह । अंगेति। अंगेति संबोधने । अमृतरसो दुग्धरसो, मोक्षरसश्च । हृद्यो वक्षसि भवः, प्रियश्च। क्रमः परिपाटी । बालान् शिशूनज्ञानिनश्च। अद्विजान् दंतरहितान्, शूद्रादींश्च। सद्रसोऽन्नरसो, ब्रह्मरसश्च। सद्विजान् दंतसहितानुत्तमद्विजान्नारदादींश्च ॥ १२६ ॥

श्रीरामेति। मृद्वीका द्राक्षा तस्या यो रसस्तस्य रूपं तुच्छं भासते। यतस्तन्मृदोवीकारो विकारस्तत्स्वरूपं। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति पाक्षिको दीर्घः। परिहारवत् ॥ १२७॥

श्रीरामनाममाधुर्यस्वादसंभृतचेतसः ॥
शर्करां वा सुधां वापि परार्थत्वेन मन्वते ॥ १२८ ॥
मन्ये वेदरसालजं फलमिदं रामेति नामेशितु-
र्व्यूढं गूढरसं तु तत्प्रथमतस्तत्रानुतापे सति ॥
रागोऽस्मिन्ननकैरुदेत्यथ महामोदोद्गमानुद्गिरं-
श्चोक्षे चोपितमात्र एव सहसा श्चोतत्यतः सद्रसः ॥ १२९ ॥
न द्विषंति ग्रहाश्चंद्रमेष दोषाकरोऽपि सन् ॥
माहात्म्यमेतच्छ्रीरामनामसंसर्गसंभवम् ॥ १३० ॥
चंद्रो वै परदारधर्षणरतो नक्षत्रमार्गस्थितो ।
नित्यं क्षीणतनुः कलंककलुषो दोषाकरोऽतर्जडः ॥
ईदृक् सन्नपि यच्च राजपदवीमारूढवान्सांप्रतम् ।
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३१ ॥

श्रीरामेति। शर्करां सिता । सुधाममृतं । परार्थत्वेनान्यवाचकत्वेन मन्वते। न तु प्रसिद्धशर्करामृतवाचकत्वेन । शर्करा दृषत् । सुधा चूर्णं ॥ १२८ ॥

ननु नामैतादृङ् मधुरं चेदनुभवारूढं कुतो न जायते। न हि माधुर्याभिज्ञः कश्चिद्गुडशर्करादिकं परित्यज्य तत्कार्यकारित्वेन नामान्यनुसंकीर्तयतीति चेत्तत्राह। **मन्य इति**। ईशितुः परमात्मनो रामेति नाम वेदाम्रवृक्षस्य व्यूढं विशालं फलमस्ति। तत्प्रथमतस्तु गूढमाधुर्यं तत्रानुतापे वैराग्ये ऊष्मणि च सति। रागस्तद्विषयप्रेमा, तस्मिन्नो रक्तिमा च। महामोदः परमामोदो, गंधश्च। चोक्षे सम्यक् पक्के सद्रसो ब्रह्मरसः श्चोतति क्षरति। यथाम्रफलमादावम्लमेव तस्य च पाकसमये ऊष्मापेक्षाऽन्यथादार्ढ्यमावहन्न सम्यक् पचते। ततस्तत्र आमोदमुद्गिरन्रक्तिमोदेति। ततो वृक्षादवचित्य चोपितमात्र एव रसं मुंचति। तद्वदिदमपीति। एतेन परिपाकपर्यंतं वेदोदितकर्मसाहित्येनैव कीर्तनं। जाते परिपाके न कर्मण्यासंग इति सूच्यते। 'तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते' इति शुकोक्तेः ॥ १२९ ॥

नाम्नः साक्षात्संकीर्तनं महाफलमिति किं वाच्यं यदेतस्य यत्र क्वापि संसर्गोऽपि महाफल इत्याह। **न द्विषंतीति**। दुराचारपीडका अपि ग्रहा न चंद्रं द्विषंति। 'विधोर्नो रिपुः' इति ज्योतिषात्। रामचंद्र इति पदे चंद्रस्य रामसंसर्गो जात इति ॥ १३० ॥

चंद्र इति। न सुशीलो, न च क्षात्रशाली, नापि बलिष्ठः, नैव कीर्तिमान्, न पुण्यशीलो, न च बुद्धिमान्। तथाऽपि राजभावमापन्न। परदारास्ताराः नक्षत्रमार्ग आकाशं, क्षत्रमार्गाभावश्च। कलंकोऽकः, गर्हा च। अंतर्जडो मंदोऽन्तर्जलश्च। जलमयमंडलत्वात्। राजा भूपश्चंद्रश्च ॥ १३१ ॥

जातः सन् कुटिलस्वमेव भजते संसेवते वारुणीं।
शुभ्रांघ्रिर्गुरुदारधर्षणकरो ब्रह्मघ्नसंसर्गभाक् ॥
ईदृक् सन्नपि यद्द्विजेंद्रपदवीमाप्तवान्सांप्रतं।
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३२ ॥
जातः सन्कुटिलस्वमेव भजते संसेवते वारुणीं।
शुभ्रांघ्रिर्गुरुदारधर्षणकरो ब्रह्मघ्नसंसर्गभाक् ॥
युक्तं तत्क्षयजर्जरो हिमवपुर्यस्त्वेष जैवातृकः।
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३३ ॥
विश्वस्यास्य पृथक् पृथग्ग्रह इह स्याभिग्रहानुग्रहे-
ष्वेकैकोऽपि समग्रकर्मणि पुनः सर्वानुकूल्ये सति ॥
प्रायेणैव (च) महाजनः स्पृहयते चंद्रानुकूल्याय यत्।
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३४ ॥
चंद्रोऽयं क्षयजर्जरः किल तथाप्यादित्यभौमादयः।
प्राणिभ्यः सदसत्फलं स्वगतिभिर्दातुं समग्रग्रहाः ॥
सर्वाधारतया श्रयंति यदमी नूनं तदीयं बलं।
सोऽयं रामपदप्रसंगमहिमा लोके समुज्जृंभते ॥ १३५ ॥
द्राक्षादीनि फलानि संति मधुराण्येवेति नैवान्यथा।
किंत्वेको भ्रशमाम्र एव भवति प्रेयान्नृणां सर्वतः ॥

जातः सन्निति। वारुणीं प्रतीचीं दिशं, सुरां च। शुभ्रांघ्रिः श्वेत किरणः, श्वेतदूषितपादश्च। ब्रह्मघ्नः शिवः। 'तेन हि चतुराननस्य पंचमशिरश्छेदः कृतः' इति पुराणादौ। चंद्रचूडत्वात्संसर्गः, अन्यत्र प्रसिद्धं। द्विजेंद्रश्चंद्रः, ब्राह्मणश्रेष्ठश्च ॥ १३२ ॥

जातः सन्निति। जैवातृक आयुष्मांश्चंद्रश्च। हिमवपुः। यस्य हस्तपादाद्यवयवा अपि शीतला जाता एतावान् क्षयाद्यासन्नमरण इत्यर्थः। एतद्योक्तदोषफलं युक्तं। तथाऽपि जैवातृकः ॥ १३३ ॥

विश्वस्यास्येति। सर्वेषां ग्रहाणामानुकूल्येऽपि चंद्रानुकूल्यमपेक्षंते। प्रायेणेति 'शुक्ले चंद्रबलं प्रोक्तं कृष्णे ताराबलं स्मृतम्' इत्यभिप्रायेण ॥ १३४ ॥

चंद्रोयमिति। चंद्रस्य बहुदौर्बल्येऽपि सर्वे ग्रहाः प्राणिभ्यः साध्वसाधुफलदाने-ऽप्यैव बलमपेक्षंते तद्रामनामवैभवप्रसंगजं। 'अमृतकिरणरश्मेर्वीर्यमादाय सर्वे ददाति हि फलमंते प्राणिनां साध्वसाधु' इति श्रीपतिः ॥ १३५ ॥

रामेत्यानुपूर्व्याः संसर्गो महाफलमिति किं वक्तव्यं। यदानुपूर्वीभंगेनापि यथा कथं-चिद्वर्णग्रहणे फलमित्याह। **द्राक्षेति**। 'राम' इत्यत्र 'रेफ आकारो मकारो-

आत्तस्य त्वमुना कथंचिदपि यद्रामेति सर्वात्मनो ।
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृंभते ॥ १३६ ॥
चापः पुष्पमयो, मधुव्रतमयी मौर्वी, मिता मार्गणा, ।
हीनांगः स्वयमप्यसौ जयति यन्मारो जगत्सर्वशः ॥
आत्तस्य त्वमुना कथंचिदपि यद्रामेति सर्वात्मनो ।
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृंभते ॥ १३७ ॥
अत्यंतं चपला रमा प्रकृतितोऽन्यथा जलध्यात्मभू-
रेवं सत्यपि यद्धरेर्भगवतो द्वेधापि हृद्याऽभवत् ॥
आत्तस्य त्वमुया कथंचिदपि यद्रामेति सर्वात्मनो ।
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृंभते ॥ १३८ ॥
पापा ये तु निरक्षराः परदृढासक्त्यैव रामेत्यदः ।
संसर्गाद्दधाति स्थितिं मुनियतं लेखेषु सर्वोपरि ॥
रेफात्मन्युत नापवर्गभवने वर्णे जघन्ये फलम् ।
यस्माद्दृश्यत एतदत्र निखिलं रामेति संसर्गजम् ॥ १३९ ॥
परं पदमिदं जगद्रमयति स्वसंकीर्तना-
दनंतखरदूषणप्रतिहर्ति विधत्तेतराम ॥

ऽकार' इति वर्णचतुष्टयं नदाम्नेण गृहीतं। यथा वाल्मीकिना 'मरेति' तथा। 'आकारो मकारो रेफोऽकार' इति ॥ १३६ ॥

चाप इति । मार इत्यत्रापि ' म् आ र् अ ' इति वर्णचतुष्टयं ॥१३७ ॥

अत्यंतमिति । रमा इत्यत्रापि 'र् अ म् आ' इति वर्णचतुष्टय। द्वेधाऽभ्यंतरे बाह्ये च ॥ १३८ ॥

पापा इति । पापा अपि रामेति नामसंसर्गमात्रेण लेखेषु देवेषु सर्वोपरि स्थितिं दधति। परमेते निरक्षरा अपेक्षिता यत्तेषां दृढासक्तिर्भवति । अर्थातवतां तु वितर्काकुलतया दृढासक्त्यभावात् । रेफात्मनि रेफरूपे, कुत्सितात्मनि च । नापवर्गभवने । पवर्गो भवनं यस्य स न भवति अपवर्गभवनः। स न भवति नापवर्गभवनः। पवर्गीय इत्यर्थः। जघन्ये चरमे वर्णे मकारे, मोक्षयोग्यो न भवति तादृशे, नीचवर्णे च । रामेति समुदितसंसर्गस्य फलं दृश्यते। यल्लेखेषु लेखनेषु सर्ववर्णोपरि रेफमकारौ स्थितिं कुरुतः। परमेतौ निरक्षरौ स्वररहितौ चेत्। यथा 'भर्गः, नंव्रा' न तु 'सरमः, समर' इत्यादौ। कस्मात्साक्षरत्वात् । अक्षरं त कर्मकत्वादव्ययनं, अकारादिस्वरजातं च। परे ब्रह्मणि दृढासक्तिः, परवर्गेषु च । लेखो देवो, लेखन च । रेफो रवर्णः, कुत्सितश्च। नापवर्गभवनः पवर्गस्थो, मोक्षानर्हश्च। जघन्योऽ यो, नीचश्च। वर्णोऽक्षरं, ब्राह्मणादिश्च ॥ १३९ ॥

मस्त्वानत्राति सर्वतोऽप्यविदितोपघातादतो ।
निकाममपि रामतो जयति नाम तस्योत्तमम् ॥ १४० ॥

सृजति नाम सुशीलवरं जनं रघुपतिस्तु कुशीलवरंजनम् ।
अहमतःकथयामि गणाधिकं रघुपतेरपि नाम तदीयकम् ॥१४१॥

महेशो रामाख्यं परमममृतं वेदजलधेः ।
समुद्धृत्य प्रेम्णा स्फटिकनिभकंठे निहितवान् ॥
जनः कश्चित्पश्येन्मलिनतरदृष्ट्येति भगवान् ।
धृताशंकः पंकैर्मृगमदभवैः किं स्थगयति ॥ १४२ ॥

मित्रक्षेत्रकलत्रपुत्रसदनद्रव्याणि दिव्यप्रभं ।
कूर्चं भव्यशिखोपवीतमपि यद्ब्राह्मण्यसंपादकम् ॥
हृत्वाप्यस्य तदंबरं बत बलादादिश्य भिक्षाटनम् ।
दंडं चापि पुनः स्मरेदिति महावाक्यं श्रुतेर्गोचरम् ॥१४३॥

रातन्मत्त्वमसि द्वयोर्युतिरिति प्रोक्तं रहस्ये महा-
वाक्यं तत्सुलभं नृणां कथमपि स्याद्भुक्तिमुक्तिप्रदम् ॥
यच्चेत्स्पृहयान्विमुक्तिमपि यच्छ्लोकावया मारुति-
र्भोगाः संतु तवाखिला इति बलात्सानंदमुक्त्वारत ॥१४४॥

किंबहुना। नामेदं रामादप्यधिकमित्याह । परामीति । रामेण त्वेकाऽयोध्यैव परं पदं नीता। खरो दूषणश्चैकैक एव हतो। विश्वामित्रमखश्चैक एव विदितोपघाता-द्रक्षितः। नाम्ना तु त्रिभुवनं परं पदं नीयते । अनेकानि खरदूषणानि हन्यंते । 'यस्य स्मृत्येत्यादिना '। विदितादविदिताच्चोपघाताद्विदिते प्रतिपदोक्ते प्रायश्चित्ते कृतेऽपि तदीयवैगुण्यापनोदार्थं अविदितत्यर्थादतदेवेति। मखमात्रं रक्ष्यते ॥१४०॥

सृजतीति। नाम सुशीलेषु वरं श्रेष्ठं जनं करोति। रामस्तु कुशीलवयोः पुत्रयो रंजनं लालनं करोतीत्यर्थांतरं। (रामावतारयोगेन रघुवंशस्य सूर्यवंशस्य भूषणं भवतीति) ॥ १४१ ॥

अत एव भगवान्महेशः परमेश्वरः परमोत्कृष्टमिति कृत्वा नाम साधु रक्षतीत्याह । महेश इति । स्पष्टं ॥ १४२ ॥

'आद्यो रा तत्पदस्यार्थे (र्थो) मकारस्त्वंपदार्थवान् । तयोः संयोजनमसीत्यर्थे तत्त्वविदो विदुः॥ तत्त्वमस्यादिवाक्य तु केवलं मुक्तिदं मतं । भुक्तिमुक्तिप्रदं चैतत्त-स्मादप्यतिरिच्यते' इति रहस्योपनिषदं मनसि निधायाह। मित्रक्षेत्रेति।कूर्चं श्मश्रु। मित्रादि सर्वं हृत्वा भिक्षाटनमादिश्य त्यक्त पुनः स्मरेदिति दंडं निर्दिश्य तत्त्वम-सिवाक्यं श्रुतिगोचरं भवति। दंडो वैणवोऽपराधशिक्षार्थं क्रियमाणश्च ॥ १४३ ॥

रातन्मेति। राकारस्तत्पदार्थो मकारस्त्वंपदार्थस्तयोर्योगोऽसिपदार्थः। एतन्महा-

अनंताकारमप्येतदनंताकारमेव हि ।
वैपरीत्यं गतमपि नार्थहानिर्मनागपि ॥ १४५ ॥
अपि ललितसुगुणवेणिः सालंकाराऽपि या सुवर्णाऽपि ।
रघुतिलकविहीना चेद्वाणी रमणीव नैव कल्याणी ॥ १४६ ॥
भावप्रधानमस्याख्यातं यत्प्रत्ययः परः प्रकृतेः ।
तं भज शेषगिरिस्थितमच्युतमिह शाब्दिकं वचःशुद्ध्यै॥१४७॥

वाक्यं सर्वेषामाचांडालं सुलभं । तत्तु ब्राह्मणानामेव नेतरेषां। तत्त्वेकांते गुरुशिष्यैक-समधिगम्यमिदं तु वाद्यघोषपुरःसरं सर्वत्र विराजते। तत्तु सर्वं त्यक्त्वा श्राव्यं। इदं तु सर्वं त्यक्तवतो बलाद्भुक्तिमर्पयति। भगवता रामेण वरं वृणीष्वेत्युक्ते ' त्वन्नाम स्मरतो राम न तृप्यति मनो मम। अतस्त्वन्नाम सततं स्मरन्स्थास्यामि भूतले ' इति हनुमता सर्वत्र विरज्य नामन्येवार्थिते जगज्जनन्या जानक्या ' तमाह जानकी प्रीता यत्र कुत्रापि मारुते। स्थितं त्वामनुयास्यंति भोगाः सर्वे ममाज्ञया 'इत्यादितः। यश्च सीतादेव्याऽऽदृतः स आनंदमुक्त्या जीवन्मुक्त्यादितः । विद्यामयत्वात् ॥ १४४ ॥

अनंताकारेति। एतद्रामेति नाम अंते योऽकारस्तेन रहितमपि 'राम्' इति बीजं भवति। तथानंताकारं। ' यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः। तथैव रामबीजस्थं जगदेतच्चराचरम् 'इति श्रुतेः। विपरीते कृते मरेति ज्ञानं चेदपि व्यतिहारः संपद्यते। ' सोऽहमहं स इतिवद्व्यतिहारो विशिषंति ' इति ब्रह्मसूत्रात् । अत एव वाल्मीके-स्तत्फलदमभूत् ॥ १४५ ॥

मोक्षपदवीं प्रस्थितवतां पुरःस्थिता भगवद्गुणरहिता वाणी न कल्याणी। 'न त-द्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्षया 'इति शुकोक्तेरित्याह।अपीति।यथा ललितमुक्तदामग्रथित-वेणिः अलंकृतोत्तमांगकांतिरपि रमणी लघुना तिलकेन विहीना यथा ग्रामांतरं प्रस्थितानां न कल्याणी पुरतः स्थिता, तथोत्तमप्रसादादिकाव्यगुणानां प्रवाहो यस्यामुपमाद्यलंकारवती वर्णरचनाऽपि मधुरा यस्या तादृश्यपि वाणी रघुतिलकेन रामेण हीना चेन्न कल्याणी ॥ १४६ ॥

ननु वाक्शुद्धिर्व्याकरणोपासनमंतरेण न घटत इति। किं हरेरुपासनेनेति चेन्न। हरेर्व्याकरणरूपत्वादित्याह।भावप्रधानमिति।यस्य आख्यातं कीर्तनं भावप्रधानं भक्तिप्रधानं, आख्यातं तिङंत च भावप्रधानं। देवदत्तो गच्छतीत्यत्र देवदत्तकर्तृकं गमनमिति बोधः । न तु तार्किकवद्गमनानुकूलव्यापारवान् देवदत्त इति। यस्य प्रत्ययः प्रतीतिः प्रकृतेर्बुद्ध्यादिभ्यः परः।'यो बुद्धेः परतस्तु सः' इति। प्रत्ययः सुप्तिङा-दिः प्रकृतेर्नामधात्वादिभ्यः परः।' प्रत्ययः। परश्च 'इति सूत्रात् (अष्टा०)। शेषगिरिर्वेंक-टाचलः, शेषावतारस्य पतंजलेर्गिरि वाचि। उत्तरोत्तरं मुनीनां प्रामाण्यात् ॥१४७॥

नो जातः प्रकृतेः परः क्वचिदपि प्राप्नोति यत्प्रत्ययो
लोपं नैव विकल्पते किल यदादेशः प्रवृत्तः क्वचित् ।
वृद्ध्या यस्य गुणो न बाधित इति श्रीरामचंद्रप्रभुः
सद्वैय्याकरणाद्विशिष्यत इति त्वं वाक् तमेवाश्रय ॥ १४८ ॥
त्वदधिपतिरयं सदाश्रयाशः स परं सर्वजनाश्रयप्रदोऽस्ति ।
जनयति बहुतापमंतिकस्थः स पुनर्विष्णुरनेकतापहंता ॥ १४९ ॥
शोभंते न कलाकलापकुशलाः कांता हि कांतं विना
तद्वाणि स्पृहणीयसद्गुणगणं श्रीनायकं संश्रय ।
नन्वस्ति ज्वलनः पतिर्म इति दुस्तर्कं वृथा मा कृथा
यत्स्वप्नेऽप्यविवाहिते न रमणे मुख्या रमन्ते स्त्रियः ॥ १५० ॥

किं च भगवान् श्रीरामो वैय्याकरणादपि विशिष्यत इति स एवाश्रयणीय इत्याह । **नो जात इति ।** हरेः प्रत्ययः सकृज्जातो न लुप्यते । ' इदं ज्ञानकलातनः सकृज्जाताऽभिरक्षते ' इति वाग्मिनोक्तेः । तस्य तु ' राजन् सु ' इत्यत्र प्रकृतेः परो जातोऽपि सुलोपोऽपि प्रत्ययो लुप्यते । ' हल्ङ्याब्भ्यो ' इति सूत्रात् । किं च यस्य हरेरादेशः क्वचिन्न विकल्पते । ' भीषास्माद्वातः पवते (न) ' इत्यादि श्रुतेः । अस्य तु ' हर एहि हरयेहीति ' ' लोपः शाकल्यस्य ' इति लोपरूप आदेशो विकल्पते । यस्य भगवतो वृद्धिः परकीयगुणं न बबाधे किं तु परगुणग्राहिकैवाभूत् । यद्वा । यस्य वृद्धिः परिस्फूर्तिस्तया तया (?) गुणस्य मैत्र्यादिकस्यापि वृद्धिरेव न बबाध इति । अस्य तु ' वृद्धिरेचि ' इति वृद्धिः ' आद्गुणः ' इति गुणं बाधते । गंगौघ इत्यादौ ॥ १४८ ॥

हे वाणि, यदीशं न मन्यसे किमिति 'अग्निर्मे वाचि श्रितः' इत्यादि श्रुतेस्त्वत्पत्नीवाहमग्निनाधिष्ठितेति कथमन्यं भजेयेति चेन्मैवं । तदाश्रयो न स्वार्थहेतुरित्याह । **त्वदधीति ।** आश्रयाशः अश्रयस्याशा यस्येति स्वातन्त्र्याभावः, आश्रय अश्नातीति च । हरिस्तु सर्वाश्रयप्रदः । अग्निस्तापं जनयति, हरिस्त्वनेकतापहा, नानात्वहंता च ॥ १४९ ॥

तस्मात्सुखहेतुर्गुणवान् श्रीमानेवाश्रयणीय इत्याह । **शोभंत इति ।** अग्निः पतिरस्तीति दुस्तर्कं मा कृथाः । यत्सर्वस्त्रीसाधारणमिदं । तथा च श्रुतिः । ' सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ' इति । एवं चाग्निः पतिरिति कृत्वा न काभिरपि तुरीयो वृतोऽपि तु व्रियत एव । तस्मात्त्वं तुरीय मनुष्यजं वृणु । स च श्रीकृष्ण एव नान्यः । यद्यग्निना तव विवाहोऽभविष्यत्तर्हीदं वक्तुं साम्प्रतमभविष्यत् । स त्वविवाहितोऽस्ति । अविनामेषेण वाहितश्च । कृष्णस्तु विवाहितोऽस्ति पर त्वं मुग्धत्वान्न जानीषे । विना

अंगेषु मुख्या द्विजमध्यसंस्था बाणानुसंधानपराऽसि नित्यम् ।
अंधस्थिरप्रेमरसा रसज्ञे नरस्तुतिं तत्त्यज कर्णवत्त्वम् ॥ १५१॥
जिव्हे मुख्य (सर्व) रसज्ञतां त्वयि गतां ज्ञात्वा समंतात्स्थिता
आसन् श्रीरघुनाथसद्गुणकथालाभार्थमेते द्विजाः ।
सद्वार्ताऽपि च न त्वयीति शिथिला रुष्टाः किमेकैकशो
निष्क्रांता इव संभ्रमात्तदधुना रामेत्यपि त्वं वद ॥ १५२ ॥
शुकं (नित्यं) स्वपंजरचरो हरितत्त्वसेवी
लोके न च क्वचन गच्छति पक्षपातम् ।
व्यक्ताक्षरं सुमधुरं निगदन् द्विजेंद्रो
राजेंद्रमभ्यरमयत्सुतरां शुकाख्यः ॥ १५३ ॥

गरुडेन वाहितस्तस्माद्विवाहितं स्वतःसिद्धं कांतं फकारांतत्वाच्छ्रीनायकं परित्यज्या-
विवाहिते रमणं मुख्यानां स्त्रीणां दूषणमित्याह । यत्स्वमोति । मुखे भवा मुख्या ।
॥ १५० ॥

एवं भगवत्स्तुतिं कर्तव्यां विधाय नरस्तुतेर्दूरतरोत्सारणं कार्यमिति साधयति ।
अंगेषु मुख्येति । अंगेषु अवयवेषु । मुख्या मुखे भवाऽसि । दंतमध्यवर्तिनी ।
शब्दानुसंधानपरा । अंधस्यपक्षे स्थिरः प्रेमरसो यस्याः । कर्णपक्षे । [अंगेषु]
अंगदेशेषु मुख्योऽधिपतिः । द्विजमध्ये विप्रमध्ये संस्था स्थितिर्यस्य । याचकै-
र्वेष्टित इति यावत् । यद्वा । द्विजाः क्षत्रियास्तत्र संस्था प्रतिष्ठा यस्य । ननु कैव-
र्तकपुत्रस्य कथं क्षत्रियेषु संस्था । यदयं बाणानुसंधानपरो महाधनुष्कः । अंधे
धृतराष्ट्रे स्थिरः प्रेमरसो यस्य । तदीयसंततिहितनिरतः । नरोऽर्जुनः, प्राकृतजन-
श्च ॥ १५१ ॥

जिव्हे इति । मुखे भवो मुख्यो यो रसः, उत्तमरसश्च । द्विजा दंता, ब्राम्ह-
णाश्च । अयं भावः । रसज्ञमुखेन हि हरिगुणोल्लसनं परमरमणीयमिति तां त्वयि
ज्ञात्वा भगवत्कथालाभार्थमेते द्विजास्त्वां परित आसन् । त्वं न प्रौढेति कृत्वा
तारुण्ये त्वयि पुनरागमिष्याम इत्येकदा निर्गताः । ततस्त्वां प्रौढां ज्ञात्वा पुनरागत्य
स्थितास्त्वत्परितोषायापि त्वदलभ्या य इक्ष्वादीना रसास्तानपि तुभ्यं दत्तवंतः ।
तथापि त्वयि रामकथावार्ताऽपि नास्तीति निर्विण्णा रुष्टाः संतो निर्गंतुमारब्धाः
संति । अधुनाऽपि तर्हि अनभ्यस्तेन कीर्तनेनालं । केवलं रामेत्यपि वदेति ॥१५२॥

इदानीं श्रीशुकेन कार्ते िन परिशीलितमिति तद्युक्तमित्याह । शुकमिति । स्वपंज-
रगतः, स्व आत्मा ब्रह्म स एव पंजरः, स्वकीयपंजरश्च । अन्यपंजरे स्थापितश्चेत्तत्रस्थे
न यथायोग्य सम्यक् पठतीति च । हरेस्तत्त्वं हरितत्त्वं, हरिद्वर्णत्वं च । पक्षपातमा-
ग्रहं, पक्षै पातं गमनं च । व्यक्तं यदक्षरं ब्रम्ह सगुणं रामकृष्णादि, स्पष्टाक्षरं च

तालिका हस्तगा चेत्स्यान्नामादेशपुरःसरम्।
सखे भवसि रे ब्रम्हकपाटोद्घाटनक्षमः॥ १५४॥
संतो यद्रघुनाथसद्गुणगणव्याख्याप्रसंगांतरे
पिष्टातैरवधूलयंत्यविरलं भालस्थलं देहिनाम्।
तन्मन्ये परमेष्ठिसृष्टजननव्युत्थाननिःश्रेणिका-
जाग्रद्दुर्लिपिमार्जनस्य सुजनाः कुर्वंत्यहो रूपकम्॥ १५५॥
निद्रा हते प्रेयसि कुंभकर्णे वैधव्यदीक्षां व्यथितेत्यतः किम्।
श्रोतुं कथां याति तथा पुराणं न ग्राम्यगीतं विबुधैर्विगीतम्॥ १५६॥
॥अथ स्मरणम्॥ अच्युतपदं मनसि कुरु जनयेदच्युतपदं महानंदम्।
न हि कोद्रवाः समुप्ताः क्षेत्रे जनयन्ति साधुगोधूमान्॥ १५७॥
चेतश्चंचल संचरस्यतितरां वक्तुस्पृहं सत्फले
प्रायेणैव तिरस्करोषि सुमनस्संघान्खले चाणके।
धत्से प्रेम वलंबसे च विटपांस्तद्वानरोऽसीत्यतः
श्रीरामं करुणार्णवं भज परं गेहानुबंधं त्यज॥ १५८॥

यथास्यात्तथा। शुकाख्यो योगींद्रः, कीरश्च। द्विजेंद्रः पक्षिश्रेष्ठो, द्विजश्रेष्ठश्च। राजेंद्रं परीक्षितं, राजश्रेष्ठं च॥ १५३॥

कीर्तनप्रसंगेन तालिकावादनं स्तौति। तालिकेति। तालिका 'टाळीति' प्रसिद्धा, उद्घाटनयंत्रं च। 'किल्लीति' भाषया। 'अस्योद्घाटनयंत्रं तु ताल्यपि प्रतिताल्यपि' इति हेमः। नामादेशः नामसंकीर्तनं, नाम्ना आदेशो निदेशश्च। मुद्रितकपाटोद्घाटनेनांतस्थवस्तुदर्शनाय राजानो द्वयीं गतिमाचरंति। अमुकोऽप-मागत एनं प्रति कपाटमुद्घाट्य अंतर्वस्तु दर्शितव्यमित्येवंरूपः संदेशो भृत्यद्वारा लेख्यद्वारा वा। अन्या तालिकादानं। एतद्द्वयमंतरेण मुद्रितकपाटोद्घाटनं न संभवति। तद्वत्॥ १५४॥

पिष्टातैर्भालोद्धूलनं वर्णयति। संत इति। पिष्टाताः सुगंधिचूर्णानि। 'बु-क्कोति' प्रसिद्धाः। कीर्तनमध्ये यदेतदाचरंति तस्यायमभिप्रायः। वक्तृश्रोतॄणां भाले ब्रम्हणा या जन्ममरणानां परंपरा लिखिता सा सर्वेषां कीर्तनजनितहरिप्र-सादेन मार्जितैवेति रूपकमनुकरणं॥ १५५॥ निद्रेति। स्पष्टं॥ १५६॥

अथ स्मरणभक्तिमाह। अच्युतमिति। भगवत्पदं, ब्रम्हपदं च॥ १५७॥

स्मरणस्य मनोधर्मत्वात्प्रार्थयते। चेत इति। फले कर्मणां फले, वृक्षफले च। सुमनसः साधवः, पुष्पाणि च। खले दुर्वृत्ते, अणके कुत्सिते, प्रेमाणं धत्से, चाण-के चणकानामिदं तत्र। खले प्रसिद्धे। विटपान्वृक्षविस्तारान्, जारश्रेष्ठांश्च। वलंबसे। 'अवाप्योरुपसर्गयोः' इत्यकारलोपः॥ १५८॥

रे रे चित्त लयो ममामृतकरे स्यादित्यतो मा स्म गाः
स्वास्थ्यं यद्भवसिंधुतोपकृदयं रात्रिंचरोऽतर्जडः।
श्रीरामस्तु भवाब्धिशोषणकरो रात्रिंचरद्वेषणो
नित्यं चापलताधरोऽप्यमृतदस्तत्तत्र शीघ्रं विश ॥ १५९ ॥
चंचलस्य विलये तव चेतो योग्यतां वहति चापलताभृत् ।
युज्यते कथमयं हिमरश्मिमंडलं जलमयं किल यस्य ॥ १६० ॥
मनोऽसि सांतं भज तर्ह्यनंतं क्षयालसं चंद्रमसं जहीहि ।
स हि स्वयं सांत इति प्रशस्तं धत्ते सदाऽनंतपदावलंबम् ॥१६१॥
रे रे चित्त त्यज द्वैतं त्वमेकत्वं समाश्रय ।
ततश्चासि चिदेव त्वं नात्र कार्या विचारणा ॥ १६२ ॥
अयि चित्त समुत्थपित्तवद्भृशमुत्क्लेशयते भवो यदि ।
समासितरुचिराज्यसभृतं भज शीघ्रं मखदं महागदम् ॥ १६३ ॥
अथ कथय कथं नु मत्तवन्मां भ्रमयसि पित्तमिवेह वित्तहेतोः।

रे रे चित्तेति । ' पचत्वोत्तर मनमश्चंद्रमसि लयो भवति ' इति श्रुतिसिद्धमर्थं मनसि कृत्वाह । ममामृतकरे लयः स्यादिति । किं तेन जन्ममरणनिस्तारो भवति, नेत्याह । भव. शिव, सिंधुः समुद्रः, भवसिंधुश्च । दोषाकरोऽन्तर्जड इति गते । रात्रिचरा राक्षसाः । चापलता धनुर्वल्ली, चाचल्य च । ' चापलश्चपलः ' इति द्विरूपः । अमृतं मोक्षं ददाति । चद्रस्तु अमृतं करे कृत्वा प्रलोभयति न तु ददाति ॥ १५९ ॥

चंचलस्येति । [illegible] पूर्वश्लोकेन ॥ १६० ॥

सांतेन [illegible] कृत किं स्यादित्याह । मन इति । सानमंतसहितं, सकारांत च । अनंत [illegible], भगवंत च । ननु ममाधिपतिश्चंद्रोऽस्तीति तं विहाय कथम[illegible] भजामि [illegible] । तदाश्र[illegible]किंचित्करत्वात् । यतः स हि चद्रमाः स्वयं सांत इति कृत्वा । अनंतपदं विष्णुपदमाकाशपदं च ॥ १६१ ॥

रे रे चित्तेति । द्वैत भेद, [illegible]कारयोः समाहारो द्वित । तदेव द्वैतं द्वित[illegible] त्यज । [illegible] । एकत्वमभेदं, एकः ' तु ' यस्य एकतु । [illegible] भाव एकत्व । [illegible]तकारं भज । ततश्चिदिति भवसि ॥ १६२ ॥

अयीति । उत्क्लेशयते बाधते, उपरिस्थितवमनमिव करोति । सम्यगासिता [illegible] रुचिर्यस्य स [illegible] राज्यसभृत राजभावापन्नस्त्वं । समा न्यूनाधिकप्रमाणरहिता सिता शर्करा [illegible] तद्रुचिराज्यं सद्यस्कघृतं तेन सभृतं च । महागदं महती गदा यस्य त कृष्णं, शुंठी च ॥ १६३ ॥

अथेति । पूर्णं वित्त द्रव्यं यस्य [स पूर्णवित् । तस्यभावः] पूर्णवित्ता,

रघुपतिपदपद्मचिंतया त्वं भव तूर्णं मम चित्त पूर्णवित्तम् ॥१६४॥
पित्रा पितृव्येण च नामशेषतामापादितासोच्छ्रुतिरत्र विप्लवे।
अतः स्वधर्माचरणे धृतव्रतः प्रल्हाद एव स्मृतितत्परोऽभवत् ॥ १६५॥
अथ पादसेवनं ॥ प्राज्ञानुभूतो भविता यतः स्वप्रत्ययः स किम्।
प्रसादः श्रीमतः सिध्येत्पादाधारं विना दृढम् ॥ १६६ ॥
अपि प्रसंगवशतो यो वैकुंठपदं श्रितः।
शास्त्रा ब्रवीमि निःशंकं स वैकुंठपदं श्रितः ॥ १६७ ॥
न विष्णुपदसेवनं त्यजत मानवाः सर्वथा
नरस्य कृतकृत्यता भवति यद्द्विजाधीश्वरः ॥
सदाचरणतत्परोऽमृतकरोऽप्यमायां गत-
स्ततः परमधाम्न्यहो विशति कर्मसाक्षिण्यसौ ॥ १६८ ॥

ब्रम्हसंपन्नता दस्य च ॥ १६४ ॥

अथ प्रल्हादः स्मरणं प्राधान्येन चकार तदुक्तमित्याह । **पित्रेति** । पित्रा हिरण्यकशिपुना, पितृव्येण हिरण्याक्षेण, नामशेषतां लोपं । श्रुतिः श्रवणं, वेदश्च । धर्मो भगवत्सेवारूपो ज्ञाननिष्ठः, नित्यनैमित्तिकरूपश्च । स्मृतिः स्मरणं, मन्वादिधर्मशास्त्रं च । धर्मानुष्ठाने प्रत्यक्षश्रुत्यभावे स्मृतिरेव प्रमाणमावहतीति ॥ १६५ ॥

पादसेवनभक्तिमाह । **प्राज्ञ इति** । यः प्राज्ञैर्ब्रम्हादिभिरनुभूतः स्वप्रत्ययः आत्मज्ञानं यतो भविता स श्रीमतो हरेः प्रसादः पादाधारं विना किं सिध्येत्तस्मात्तं सेवितः । यथा प्रज्ञ एव प्राज्ञ इति प्रज्ञेनानुभूतः स्वप्रत्ययः स्वार्थप्रत्ययः अण् । ' प्रज्ञादिभ्यश्च ' इति सूत्रात् । स यस्माद्भविता स आढ्यस्य प्रसादो नाम प्रासाद । प्रसादशब्दादपि कृते प्रासादो भवति । स दृढं पादाधारं विना न स्यात्तथा । पादो नाम पाषाणादिभिः प्रासादतलभूमिगर्भे दार्ढ्यार्थं पूरणं । ' पाया ' इति लोके ॥ १६६ ॥

अपीति । सकामतयाऽपि । वैकुंठो विष्णुः, लोकविशेषश्च ॥ १६७ ॥

न विष्ण्विति । सर्वदा विष्णुपदसेवनं कुरुत । तत्फलं नरस्य सर्वथा कृतकृत्यता । तत्रायमेव दृष्टान्तः । यथा नरस्य पार्थस्य । एवं सामान्यतः कृतकृत्यतामुक्त्वा विशेषाकारेणाह । द्विजाधीश्वरः ब्राम्हणः । सदाचरणतत्परः । अमृतकरः अमृतं भक्तिर्मोक्षश्च करे यस्य । जीवन्मुक्त इत्यर्थः । अत्र दृष्टांतोऽयमेव । यथा द्विजाधीश्वरश्चंद्रः सदा चरणतत्परः विष्णुपदस्थितः आकाशस्थितः । अमृतकरः सुधाकरः । स च, अमायाममावास्यायां गतः परमधाम्नि कर्मसाक्षिणि सूर्ये विशति विदेहभावमाप्नोति तद्वत् । नन्वेतेन ' स्वधर्मे निधनं श्रेयः ' इति साक्षाद्भ-

सर्वोपरि वरीवर्ति सदारामपदाश्रयः।
गणिकासंगिनोऽप्यस्मिन्नतिमुक्ताः सहस्रशः॥ १६९॥
विष्णोः सर्वावयवनिवहात्पादपद्मे विशेषः
कश्चिद्वाचामविषय इति स्पष्टमेते न विद्युः।
लब्ध्वा वक्षस्यपि पदमियं सर्वदा पद्मसद्मा
त्यक्त्वच्छद्मा सरसमनसा सेवते येन पद्मा॥ १७०॥

गवता कर्तव्यत्वेन प्रतिपादितस्य स्वधर्मस्य त्याग आपद्येतेति चेन्न। सर्वत संप्लुतोदकस्थानीये भगवच्चरणसेवने स्वधर्मस्यापि संपद्यमानत्वात्। तथाहि यं द्विजः सदाचरणतत्परः सदाचरणे विहिताचरणे तत्परो नेति न। तथा योऽमृत करः स यज्ञशेषहस्तो नेति न। तस्य श्रौतस्मार्तोभयमपि तत्रैव च संपद्यत इति। अथ द्विजाधीश्वरः क्षत्रियः। येषामुपनयनं ते सर्वेऽपि द्विजा इति क्षत्रि यवैश्ययोरपि द्विजत्वात्। चंद्रदृष्टांतसहितः प्राथमिकोऽर्थः पूर्ववत्। तस्य 'ध र्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते' इति। धर्मसंपादनं तु यथा। य क्षत्रियः सदाचरणतत्परः सदा च रणे युद्धे तत्परो नेति न। तथा योऽमृतकर सः। अमृताः जीवंतः कराः करभारा यस्य स नेति न। अथ द्विजाधीश्वरं वैश्यः। प्राथमिकोऽर्थः सदृष्टांतः पूर्ववत्। तस्य 'कृषिवाणिज्यगोरक्ष्यम्' इति धर्मसंपादनं तु यथा। यो वैश्यः सदाचरणतत्परः सदा चरणे इतस्ततः संचरणे वाणिज्ये। अथवा। अंतर्भावितण्यर्थेन चारणे गवादीना तत्परो नेति न। तथा अ मृतकरः दुग्धकरः। यद्वा अमृता जीवंती कला मूलधनवृद्धिर्यस्य। रलयोरैक्यात् 'कला स्यान्मूलवृद्धौ' इति मेदिनी। अथ [द्विजाधीश्वरः] शूद्रः। द्विजास्त्रैवर्ण्यमधी श्वरा यस्येति। प्राथमिकार्थः पूर्ववत्। 'परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्' इति त्रैवर्णिकचरणसेवनरूपधर्मसंपादनं यथा। यः सदाचरणतत्परः स तान्परि चर्यावान्वर्तत एव। मृतं याचितं अन्नादि करे यस्य। अथवा। ब्राह्मणभोजन स्यापि यज्ञत्वं। 'त्रयः पाकयज्ञा हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुताः' इति सूत्रात्। ततश्चामृतं द्विजभुक्तशेषं करे यस्येति॥ १६८।

सर्वेति। 'यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्। योगेन दानधर्मेण श्रेयोभिरितरैरपि। सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा' इति भागवतं। सदा रामपदस्य आश्रयः, सन् आरामः स एव पदं तस्य आश्रयः। गणिका वेश्या, पूतिका च। अतीव मुक्ताः, पुंडूकाश्च॥ १६९॥

किंच लक्ष्म्या व्यवहारदर्शनेनापि भगवत्पादपद्मेऽस्ति कोऽप्यनिर्वचनीयो विशेष इति गम्यत इत्याह। विष्णोरिति॥ १७०॥

श्रीप्राणनाथमृदुसुंदरपादपद्म-
संवाहनोत्थसुखनिर्भरकृष्टचेताः।
श्रीस्तस्य किं क्षणवियोगजदाहभीता
हस्ते बिभर्ति किल तत्प्रतिमासरोजम् ॥ १७१ ॥
वत्से विष्णुपदे सुखं समधिकं यद्वागगम्यं परो
लाभः किंच जगत्त्रयीमहितता तस्मात्तदेवाश्रय।
अंतःक्षीरनिधेर्मुहुर्मुहुरिति श्रीविष्णुपद्या रमा
कारुण्यात्किल शिक्षितेव चरणं नास्य क्षणं मुंचति ॥ १७२ ॥
विरक्ता मुक्ता अप्यनिशमनुरक्ताः पदमिदं
भजंते तत्कोऽस्मिन्मधुरिमगुणो नास्मि कलये।
स संप्रत्यास्वाद्यो यदि तदुपहासोऽत्र तदजः
शिशुः सन्नंगुष्ठं रसयति जलेऽश्वत्थदले ॥ १७३ ॥
लब्ध्वा वक्षस्यपि पदमियं तीर्थपादस्य विष्णो-
र्वारंवारं चरणकमलं सेवते स्नेहसांद्रा।
कन्या धन्या सकलसरितां पत्युरस्युत्तमांगी
युक्तं स्त्रीणां भवति बहुशो मातृगेहं सुखाय ॥ १७४ ॥
नेत्रारुण्यं यदेतद्भवति ननु रुषो लिंगमाक्षिप्रसादः
स्नेहैः पादोपचारादिति सुरभिपजोऽधीतमंतःसमुद्रम्।

श्रीरिति। तस्य पादस्य प्रतिमाभूतं सरोजं कमलं ॥ १७१ ॥

वत्स इति। विष्णुपदी भागीरथी। सा च समुद्रकांता। ततश्च रमाया जननी। यदा रमा समुद्रान्निर्गंतुमारब्धवती तदा तया शिक्षिता। किमिति। विष्णुपदे सुखम-धिकं। किंच जगत्त्रयपूज्यत्वं च। तदुभयं तत्रत्यया मयाऽनुभूतमतस्त्वं तदेवाश्र-येति। तेन सा सर्वदा तन्निष्ठा भवतीति तात्पर्यं ॥ १७२ ॥

विरक्ता इति। शिशुभावं विनांगुष्ठे रसिते जगत्युपहासः स्यादिति शिशुर-भूत्। शैशवमपि कृतकमिति संज्ञायानः सर्वभूतोपरमे यत्पुनर्जन्मवर्जितं तत्तु जडं ज्ञानशून्यं न किमपि ज्ञातुं समर्थं। तत्रापि वटदले लीनः सन्महतामनुचिताचर-णस्य परमदुष्करत्वादेतेनापि व्यवहारेण पूर्वोक्तोऽर्थः सुसाध्य एवेति ॥ १७३ ॥

प्रासंगिकतया लक्ष्मीकर्तृकपादसेवनमुत्प्रेक्षते द्वाभ्यां। लब्ध्वेति। नेत्रेति च। तीर्थं भागीरथी पादे यस्य। सा तु समुद्रपुत्र्या लक्ष्म्या माता भवति ॥ १७४ ॥

नेत्रारुण्यमिति। लक्ष्म्या समुद्रमथनात्पूर्वं धन्वंतरिणा सहैकत्रावस्थानात-त्सकाशादायुर्वेदमधीतं। किं तन्नेत्रारुण्यं। तत्क्रोधेनापि भवति। नेत्रप्रसादस्तु स्नेहै-र्घृतादिभिः पादोपचारेणेति। ततश्च मम शील चंचलं भगवांस्तु सुस्थिरात्मा स

मच्छीलाय प्रकुप्येन्न स खलु भगवान्सुस्थिरात्मेति मुग्धा
स्निग्धा दुग्धाब्धिकन्या चरणसरसिजं सेवते सत्यनन्या॥ १७५॥
रामश्चिन्मयविग्रहोऽस्य जगति प्राप्तुं पदप्रक्यतां
भूत्वैवामृतवृत्ति संततमधोवक्त्रं सदप्यात्मनः ।
आकल्पं नलिनं तपो यदि गुणाधानाय तीव्रं तपे-
ल्लोके यन्नलिनं तदेव नालिनं को वा विशेषो भवेत् ॥ १७६ ॥
तोये तामरसं तपः प्रभुपदं स्यामित्यताप्सीदधो-
वक्त्रीभूय ततस्तु तत्र समभूत्सश्रीकता केवलम् ।
नैवांघ्रित्वमथो हताशमपि तच्चाद्यापि चंद्रोदये
सद्यः संभृतरामचंद्रचरणं पश्याधिना ताम्यति ॥ १७७ ॥
नलिनं मुख्यमावासं यद्यप्यस्ति तथाप्यहम् ।
श्रीरामचरणौपम्ये मन्ये मलिनमेव तत् ॥ १७८ ॥
श्रीरामस्य नखेंदुनाऽस्मि विजितः खेंदुः पुनः सन्निति
क्षीणात्माथ निरेति तत्कुलगुरुं वक्तुं जडघ्यात्मजः ।

स्वस्मै कुपितस्तु न स्यादित्याशंक्य स्नेहसाद्रा सती मुहुः पादोपचारं कुरुते । कृतेऽस्मिन्सर्वदाक्षिप्रसादः । आरुण्यापगमेनारुण्यं नास्ति । तन्नास्ति चेत्कोपो नास्तीति मुग्धभावरमणीयं ॥ १७५ ॥

पादसेवनप्रसंगात्पादस्य सौभाग्यमाह । राम इति । अमृतवृत्ति अयाचितवृत्ति, अमृते जले वर्तत इत्यमृतवृत्ति । आत्मनो गुणाधानाय अधोवक्त्रमपि सत् । नलिन इति नामनामिनोरभेदाध्यवसायेन यथावस्थितत्वं नलिनमधोवक्त्रत्वं चोच्यते । अधोवक्त्रमपि नालिनमेव । न तत्र कोऽपि विशेषः ॥ १७६ ॥

इति कस्यचिद्भगवज्जनस्य वचनमवधार्य तदसहमानमिव तदेव पुनः कर्तुं प्रवृत्तं तस्य कः परिणाम इत्याह । तोये तामरसमिति । अधोवक्त्रमपि भूत्वा तपस्तप्तवत् । तत्पुण्यवशेन श्रीसहितता प्राप्ता । श्रिय आरामस्तत्रासीन्न पदभाव । तामरस अधोवक्त्रभावेन ‘सरमता’ जाता । या च सरमता सैव सश्रीकता । रमया सहितस्य भावः सरमता ॥ १७७ ॥

ननु माभूत्पदसायुज्यं मुख्यलक्ष्म्या निवासत्वात् । पदे नलिनौपम्यं तर्हि स्यान्नेत्याह । नलिनमिति । मुख्याया माया लक्ष्म्या आवासो यत्र । मुख्ये आद्ये वर्णे मकारस्यावासो यत्र । यत्र च आद्यो नकारस्तत्र मकारादेशे नलिनं मलिन भवति ॥ १७८ ॥

श्रीरामस्येति । चंद्रः पंचदश्या पूर्णकलः सन्नात्मानमतिसुभगं मन्यमानः श्रीरामनखं जेतुं गतः । गतमात्र एव तत्प्रभया हतप्रभोऽभूत् । अथाभ्यसूयया करोति, नखेत्यादि । तदा हि क्षीण कुलगुरुं सूर्यमेतत्पुत्रस्य दुर्वृत्तता कथयितुं तद्धाम

रामश्चंद्र इवेति तद्विषयिता नीतोऽसि शिष्टैः सखे
तत्किं ग्लायसि याहि सांत्वित इति प्रायः शनैर्वर्धते ॥१७९॥
॥ अथार्चनं ॥ गोऽतस्थितामृतरसस्तुष्ट्यै पुष्ट्यै च नो गवाम् ।
सभाजनगतो नित्यं सेवितस्तुष्टिपुष्टिकृत् ॥ १८० ॥
नैरंतर्येण यस्मिन्नतिसुलभतया जायते स्वस्य लाभः
श्रीरामाराधनं तत्सुरवरमहितं हंत संत्यज्य लोकैः ।
सेव्यंते ते नरा अप्यतिकठिनतराराधना अप्यधन्या
हा हा हा कोऽयमेषां कलितिमिरकृतो नष्टचाक्षुष्कभावः॥१८१॥
नारायणे नेच्छति यो निरंतरं नरः सहावस्थितिमेष यत्नतः ।
पुरा श्रयेद्दक्षविनिर्मितां सतां मूर्तिं मतां तां वरधर्मसंस्कृताम्॥१८२॥

गतः । मूर्वेज तत्सर्वं ज्ञात्वा कोऽयमतिमूर्खशिशुः परमेतस्य कथमपि सांत्वनं तु कर्तव्य त्वन्विति विचार्योक्तं । रे आयुष्मन्, अधुना रामचंद्र इति शिष्टा रामे त्वामुपमानं कल्पयंति । उपमेयादुपमानं गुणाधिकमिति सार्वजनीनं । तत्कुतो ग्लायसि । हंहो किमेवं त्वन्विति स्वस्थः सन्पुनर्वर्धते । जलध्यात्ममत्वात् । पुनःपुनराकल्पमेतदेवेति । जलधिः समुद्रः, जडधीश्च ॥ १७९ ॥

क्रमप्राप्तमर्चनमाह । गो इति । यथा गवामंगेषु स्थितोऽमृतरसस्तासां तुष्टये पुष्टये च न भवति । तं ताभ्यो दुग्ध्वा भाजनगतं कृत्वा ताभ्यः पायितश्चेत्तुष्टिपुष्टिदो भवति । तथाऽमृतरसो ब्रह्मरसो गोऽतः मनआदिष्विंद्रियेष्वभिव्यज्यमानोऽस्त्येव । परमसौ तत्तुष्टये पुष्टये न भवति । तर्हि सभाज्यते पूज्यतेऽस्मिन्निति सभाजनं पूजाधिकरणं प्रतिमादि तत्रावाह्य सेवितश्चेत्तुष्टिपुष्टिद इति ॥ १८० ॥

भगवत्पूजां विहाय द्रव्यार्थं प्रयतमानान्निंदति । नैरंतर्येणेति । अखंडतया । स्वलाभः आत्मलाभो, द्रव्यलाभश्च । कथं नैरंतर्येणात्र द्रव्यलाभ इति चेत् ' श्रीः राः मा राः धनम् ' इति । एवं च धनमयमपि श्रीरामाराधनं विहाय धनार्थं ये नराः सेव्यंते ते तु न राः द्रव्यं न भवति । अधन्याश्च । मत्तु (!) तेषां धन्यता नास्ति । धन्या धनंहतवश्च न भवंति । आराधनमपि तेषामतिदुष्करं ॥ १८१ ॥

नारायण इति । दक्षेण चतुरेण शिल्पिना निर्मितां सतां विदुषां मतां । यथोक्तलक्षणसंपन्नत्वात् । वरेण धर्मेण प्रतिष्ठाविधिना संस्कृतां मूर्तिं प्रतिमां श्रयेत् । अर्चनं कुर्यादिति यावत् । यथा दक्षेण प्रजापतिना उत्पादितां मूर्तिं नाम कन्यां वरः पतिर्यो धर्म एतन्नामा ऋषिस्तेन संस्कृतां विधिवत्पाणिगृहीतामाश्रित्य नरस्य नारायणेन सहावस्थानं तथा । ' धर्मस्य दक्षदुहितरि मूर्तौ नरनारायणौ यमजौ जातौ ' इति भागवतादौ ॥ १८२ ॥

स्रग्गंधसुंदरीगीतं नैव श्रीफलमिष्यते ।
तदेव श्रीफलं येन पूज्यते गिरिजापतिः ॥ १८३ ॥
कुंदात्सौगंधिकाद्या न वहति तुलसी गंधमेषा तथापि
प्रेष्ठा दृष्टा मुकुंदं प्रति कृति यदहो पत्रमात्रेण यस्याः ।
सोऽमुष्मै स्वात्मभावं प्रदिशति यमिनां दुर्लभं यत्सदोद्य-
त्कृष्णं कृष्णप्रियार्थं त्यजति न सुरसाऽद्यापि वृंदावनं या॥१८४॥
तुलसी रामचंद्रस्य प्रेयसीति किमु ब्रुवे ॥
यदस्याः पश्य दासोऽपि प्राणप्रियतमोऽभवत् ॥१८५॥ युग्मं ॥
यस्त्वमार्गमपोह्यास्ते स भातु धृतशेखरः ।
पश्यापामार्गपत्रं हि हरिर्मूर्ध्नाऽभिनंदति ॥ १८६ ॥
रामाग्रतो विरचयन्सह गीतनृत्यं
नित्यं नयेदुपनतं पुरुषः प्रदोषम् ।

किं च सत्यपि द्रव्ये तस्य फलं भगवत्पूजनमेवेत्याह । **स्रग्गंधेति** । श्रीफलं लक्ष्मीफलं, बिल्वं च ॥ १८३ ॥

प्रसंगात्पूजासाधनेषु प्राधान्यतया तुलसीं वर्णयति द्वाभ्यां । **कुंदादिति** । **तुलसीति च** । तुलसी कुंदादिभ्योऽधिकगंधा यद्यपि न भवति तथापि मुकुंदस्य किंपनाम प्रेयसी । यस्याः पत्रमात्रेण दलमात्रेण, लेख्यमात्रेण च । स्वात्मभावं कृष्णः समर्पकाय प्रयच्छति । एतावत्प्रेष्ठत्वं कुत इति चेत् । पुरा किल कृष्णस्य वृंदावने गोपीभिर्विहारः परमः प्रेष्ठोऽभूत् । युगे ते तु भगवान्गोप्यश्च गताः । यदि पुनर्भगवंतं प्रति वृंदावनविहारेच्छा स्यात्तदा तत्र तं रमयितुं कापि नास्तीति कृत्वा यत्र यत्र वृंदावननाममात्रं तत्र तत्र सुरसा सत्यद्यापि तन्न त्यजति । इत्थं भगवदुपरि तस्या महानुपकारभारस्तेन यस्याः पत्रमात्रेणापि पत्रार्पकमुद्धरति । सुरसा सशृंगाररसा, तुलसी च । वृंदावनं प्रसिद्धं, इष्टकादिना निर्मितं तुलसीनिवासस्थानं च ॥ १८४ ॥

किं च । **तुलसीति** । अस्या दासस्तुलसीदासः, तन्नामा कश्चिद्वाराणसीस्थो महाभगवद्भक्तश्च । भगवान्रामभद्र. साक्षादेन सह शारिकाक्रीडनं कुर्वन्नभूदिति आबालवृद्धं प्रसिद्धिः ॥ १८५ ॥

प्रसंगात्पूजासाधनमपामार्गं वर्णयति । **यस्त्विति** । योऽमार्गमपोह्यास्ते तेनात्र शेखरं धृत्वा वर्तितव्यं । निःशंकतयेति यावत् । सोऽत्यंतं साधीयानिति । पश्य यस्य पत्रं दलं, लिखितं च । हरिर्मूर्ध्नाभिनंदति । अपोहितोऽमार्गो येन सोऽपामार्गः, [अपामार्गः ' अघाडा ' इति प्रसिद्धश्च] ॥ १८६ ॥

किं च भगवदग्रे नृत्यगीतादिकमपि कार्यमित्याह । **रामाग्रत इति** । रामाग्र-

संशिक्षयन्निति जनान्भगवान्महेशः
शक्रादिभिः किमिव नत्यति भृत्यवर्गैः ॥ १८७ ॥
दानोदकार्द्रः सततं दधद्धरिमहादरम्।
करः कटकशोभाढ्यः स वै नागास्थितो मतः ॥ १८८ ॥
भगवति परमेश्वरे निवेशो भवतु ममेति यदीहसे तदाशु।
रचय मनस एव सुष्ठुभावं सुमनस ईशतनौ हि निर्विशंति ॥१८९॥
धन्यानहं तु कथयामि कुजन्मिपादा-
न्क्षेत्रं गता (घ) न्घनरसाप्लुतिमादधाना(नाः)न्।
पाश्चात्यया ससुमनस्कतया सशोभा
ये स्वात्मनः सफलयंति हरीभवंतः ॥ १९० ॥
सत्तारकं नादि नांतं यस्यांतर्वर्तते स्थितिः।
अतो नयन ते सख्यं भवेन्मुख्यं मुरारिणा ॥ १९१ ॥

तः श्रीरघुपतेरग्रतः भक्तैः सह संभूय नृत्यं गीतं च कृत्वा नित्यमुपनतमुत्पन्नं प्रदोषं प्रकृष्टदोषं नयहरीकुर्यादिति शिक्षयन्भगवान्भवो रामाग्रतो गीर्यग्रतो नृत्यं कुर्न्नित्यमुपनतमागत प्रदोषं कालविशेषं नयति क्रमयति । रामा स्त्री, रामचंद्रश्च । [रामाया अग्रतः, रामस्य अग्रतश्च] ॥ १८७ ॥

हरेः पूजनेनैव करस्य निरपराधत्वमित्याह । दानेति । दानार्थमुदकेनार्द्रः। हरौ महान्तमादरं दधानः। कटकस्य करभूषणस्य शोभयाढ्यः। स न आगः अपराधे स्थितः। दानोदकेन मदधारया। हरेः सिंहान्महांतं दरं भयं। कटावेव कटकौ करटौ तच्छोभयाढ्यः। करः शुंडादंड.। नागस्थितः गजस्थितः। हरिपूजनमंतरेण। 'शार्ङ्गौ करौ नो कुरुतः सपर्यां हरेर्लसत्काचनकंकणौ च' इति शुकेन गर्हितत्वात् ॥ १८८ ॥

पुष्पं वर्णयति। भगवतीति। सुमनसः पुष्पाणि, साधवश्च ॥ १८९ ॥

भगवदावासत्वाल्लिंगनिरीक्षणादेरप्याराधनहेतुत्वात्तदुपयुक्तावयवानुद्दिश्याह। भगवद्यात्रार्थं यौ पादौ पुण्यक्षेत्राणि न गच्छतस्तौ निंदन्नाह। धन्यानिति। कुजन्मिपादाः वृक्षमूलानि। क्षेत्रं काश्यादि, केदारं च। घनरसाप्लुतं तीर्थस्नानं, जलार्द्रभाव च। सुष्ठु मनः सुमनस्तेन सहितः ससुमनस्कस्तद्भावस्तत्ता तया, सुमनोभिः पुष्पैः सहिताश्च। सफलयन्ति कृतार्थीकुर्वंति, फलसहितान्कुर्वंति च। हरीभूता, हरितरूपाश्च ॥ १९० ॥

सत्तारकमिति। हे नयन, त्वं। सती तारका यस्य तत्। हरिरपि सत्तारकः। त्वं नादि। नकारः आदिर्यस्य तत्, आदिरहितश्च। त्वं नांत। नकारांतं, सोऽंतरहितश्च। 'य' स्य यकारस्यांतर्मध्ये स्थितिरस्ति त्वयि, यस्य हरेरंतर्यामित्वेन स्थितिः।

पृथुरुच्चपदे सहसा कथमारोक्ष्याम्यहं विनापचितिम् ।
इति मधुवनसेवनतो व्यधादुदारः सदात्मनोऽपचितिम् ॥१९२॥

॥ अथ वंदनं ॥ सर्वांगेषु वरांगता तव कृता नैतावता सार्थता
गुह्यं देशमपीह शब्दनिपुणाः स्त्रीणां वरांगं जगुः ।
तस्माच्छ्रीरघुनंदनस्य चरणं ब्रह्मादिवंद्यं मुहु-
र्नत्वा याहि वरांगतां मम सखे मूर्धन्सतां संमताम् ॥१९३॥

भूषणोत्तमकिरीटकलाभादुद्धतत्वमिह मा वह मूर्धन् ।
यन्मुकुंदपदपंकजयुग्मं सर्वदैव नमति स्म किरीटी ॥ १९४ ॥

अक्रूरोऽहमपि प्रसंगवशतो भाता मम क्रूरता
श्रीमद्गोकुलवासिनां भगवतः प्राणप्रियप्राणिनाम् ।
हेतोस्तस्य हरिर्ममोपरि पुनारुष्टस्तु न स्यादिति
प्रामाशंकतया क्षमापनकृते श्रीशं ववंदे मुहुः ॥ १९५ ॥

समानशीलत्वेन सख्यं भवति । त्वमेकदा भगवद्विग्रहं पश्य । ततस्तव तेन विना न कल्प्यंतेति तात्पर्यं ॥ १९१ ॥

यः पृथुराजा प्राधान्येन पूजां कृतवांस्तदुक्तमेवेत्याह । **पृथुरिति** । यश्च पृथुः पीवरतनुस्तेनोच्चैः पटुभिरपि दुरारोहे पदे सहसा गन्तुं कथं शक्यते विना देहस्य कार्श्यं । तदर्थं स पृथुरिति कृत्वा उदारः सन्मतामात्मा कः हरिस्तस्यापचितिं पूजां व्यधात् । उदार इत्यनेन शरीरकृशीकरणे उत्साहोऽभिधीयते । स भगवन्मंदिर-समार्जनसेचनोपलेपनजलाहरणपुष्पगंधादिसंपादनं स्वयमेव राजा संश्चक्रे । अथ च कार्श्यमापादितवान् । मधुवनं वृंदावनं तत्र स आसीदिति कूर्मपुराणे प्रसिद्धं । अन्यच्च । मधु क्षौद्रं वनमुदकं च । तस्य सेवनात्मनो वर्तमानस्य देहस्या-पचितिरपचयो भवति । तथा च वैद्याः ' शिशिरांबु पिबेन्मधुसंयुक्तं गणनाथो-ऽपि भवेत्किल शीर्णशोफ ' इति ॥ १९२ ॥

अथ वंदनं वर्णयति । **सर्वांगेष्विति** । 'वरांगं मूर्धगुह्ययोः' इत्यमरः ॥१९३॥

भूषणेति । सर्वेष्ववयवेषु ममैव किरीटमिति गर्वं मा वह । किं तु हरिचरणं प्रति नम । यन्नित्यदा किरीट्यपि अर्जुनोऽपि नमति स्म ॥ १९४ ॥

अक्रूरोऽपि स्थानतया वंदनभक्तिमेव चकार तदुक्तमित्याह । **अक्रूरोहमिति** । भाता भासते स्म । अपराधक्षमापनं हि यथा दंडपातपीडनेन भवति तथा नान्येनोपायेन ॥ १९५ ॥

॥ अथ दास्यं ॥

ज्ञानेन मुक्तिः किल तत्तु सत्वतस्तत्सिद्धये भ्राम्यसि रे वृथा कुतः।
त्वं नित्यदासत्वमुपाश्रय प्रभोस्तस्मिंस्तु सत्वं किमु नास्ति नित्यदा
॥ १९६ ॥

ज्ञानादेव तु मुक्तिरेवमवदन्वेदांतिनस्तत्पुनः
श्रद्धावाँल्लभते न चान्य इति हि श्रीवासुदेवो जगौ।
सा सत्वोदय एव तच्च ललना अप्याहुरेतत्कृते
नैवान्यत्कुरु हे सखे भव सदासत्वोदयः श्रीपतौ ॥ १९७ ॥

सोऽहं सोऽहमिति स्थितिं स्पृहयसे चेत्तर्हि सर्वात्मना
भ्रातः श्रीखगगामिनो भगवतो दासोऽहमित्थं स्मर।
अभ्यासाद्दृशमाद्दतोद्विगतदाकारो भवार्थादथ
स्यात्ते किं न मनोरथः सुफलितोऽतोऽन्यथा मा कृथाः ॥ १९८॥

स्वानंदभाक् श्रीरघुनंदनस्य दास्यान्नरः स्याद्विपयाकुलोऽपि।
यदंजनानंदपदं हनूमान्श्रीरंजनानंदपदं बभूव ॥ १९९ ॥

कुतः श्रियै त्वं यतसे निकामं श्रीरामदासो भव मानव त्वम्।
श्रीरामदासस्य पराङ्मुखस्य सदानपायिन्युपतिष्ठते श्रीः ॥ २०० ॥

अथ दास्यमाह। **ज्ञानेनेति**। नित्यं यदासत्व तन्नित्यदासत्व। तत् ध्येये नित्य-दा सर्वदा सत्वं नास्तीति न। तस्माद्रामदास्येनैव सुगमा मुक्तिरिति ॥ १९६ ॥

ज्ञानादेवेति। 'ज्ञानादेव तु कैवल्यं'। 'श्रद्धावाँल्लभते ज्ञानमिति' प्रमा-णद्वयमुक्तं। 'सत्वं श्रद्धा' इत्यत्र प्रमाणमभिप्रेत्याह। ललना इति। सत्वे गर्भे सत्येव श्रद्धा दोहद। 'दोहद दोहल श्रद्धा' इति यादवः। सदासत्वोदयः। दासत्वस्य दास्यस्योदयस्तेन सहितः सदासत्वोदयः। तत्र सदा सर्वदा सत्वो-दयोऽस्त्येवेति ॥ १९७ ॥

सोहं सोहमिति। खगगामिनो गरुडगामिनो दासोऽहमिति स्मरणाभ्यासे दृढे सति विना गरुडगामिनं विगतो गरुडगामी तेन सह तदाकारो भव। समुद्रे गंगाबुवत्। विगतो दाकारो यस्मादिति च। एवं च दासोऽहमिति स्मरणाद्दाकारो गत-श्चेत्सोऽहमित्येवावतिष्ठत इति यतवार्थाभीष्ट तदर्थसिद्ध्यतामिति ॥ १९८ ॥

स्वानंदेति। अंजनाया एतन्नाम्न्या मातुरानंदस्थान, अजनेन विषयसंबंधेना-नंदस्तत्पदं च ॥ १९९ ॥

धनाद्यर्थोऽपि श्रीरामदास्येनातिसुलभ इत्याह। **कुत इति**। त्वं श्रियै यतसे। श्रीस्तु त्वां प्रति पराङ्मुखी। रामदासस्तु श्रियं प्रति पराङ्मुखो भवति। श्रीस्त्वन-पायिनी तं प्रति सम्मुखी उपतिष्ठते। यथा 'श्रीरामदास' इति पराङ्मुखं चेत्

निष्कारणं सेवनमीहमानो जनस्तनोत्यस्य मनोविनोदम् ।
तथा धनोपाधि न होति युक्तं वित्तापहार्यव्यय एष हीशः ॥२०१॥

श्रीरामं न विना गती गविकुले, तत्पक्षपाता ध्रुवं
दृष्टो वालिसुकंठयोः स कलहे, संजातमात्रस्त्वहम- ।
तस्यार्कस्य वहेलनं विहितवांस्तं स्वापराधं प्रभु-
र्दास्येनैव सहेत नान्यत इति श्रीरामदासोऽभवत् ॥ २०२ ॥

अस्त्येषा परिपाटिका सुमनसां यः स्यात्पितुः पोषक-
स्तत्पुत्रोऽपि करोतु निष्कपटतस्तस्यैव दास्यं विभोः ।
वायोनंदन एष आशुगभृतं पश्यन् जगन्मंडले
त्वेकं श्रीरघुनायकं सुचरितस्तत्तस्य दासोऽभवत् ॥ २०३ ॥

दासश्चेत्परमेश्वरस्य भविता तर्ह्येव धीमानसौ
दासो यो हि स एव धीवर इति स्पष्टं जगुः शाब्दिकाः ।
पश्याम्यप्यमनास्थिर्तिं पुनरसावत्रेह धत्तेतरा-
मेव स्वात्मनि चिंतयन् पवनजः श्रीरामदासोऽभवत् ॥ २०४ ॥

न स्वस्मिन्विपरीतभाव उदयेद्योऽनर्थकारी कदा-
प्येवं श्रीरघुनंदनं परमया भक्त्या भजेयं सदा ।
इत्येवं सुकृता कृती दृढमतिः सर्वात्मना यः सदा
दासः सत्रघुनंदनस्य हनुमान्वन्योऽपि धन्योऽभवत् ॥ २०५ ॥

'सदामरार्श्रीः' इत्यक्षराण्युपरिष्ठिन । सदा अम । अनपायिनी श्रीरित्यर्थः । 'सबिंदुकाबिंदुकयोः सविसर्गाविसर्गयोः' इत्येतस्मात् । पक्ष सविसर्गत्वमेष्टव्यं ॥ २०० ॥

अहेतुकं दास्यमेव भगवतेऽपि रोचत इत्याह । **निष्कारणमिति** । वित्तापं **यतो** तापं हराति, वित्त चापहरति । अव्ययो नाशरहितः, कृपणश्च ॥ २०१ ॥

हनुमान् प्राधान्येन दास्यमेव चकार तदुक्तमित्याह । **श्रीराममिति** । सुकंठः सुग्रीवः । **वहेलनमवहेलनमनादरं** ॥ २०२ ॥

अस्त्येषेति । आशुगो बाणः, वायुश्च । व बिभर्ति धारयति, पोषयति च ॥२०३॥

दासश्चेदिति । अमृतार्थिनि मेनारिथानि, जलाशये स्थिति च । धीवरा हि सर्वदा जलाशय एव तिष्ठति । ['कैवर्ते दासधीवरौ ' इत्यमर.] ॥ २०४ ॥

न स्वस्मिन्निति । विपरीतभावो यत्र भक्तौ कदाऽपि नोत्पद्येत तथाऽहं भजेयं । यो हि सदा दासोऽहमिति ब्रवीति स कदापि स्वामिभाव नापद्यते । कदाचिदुत्पन्नोऽपि सोऽनर्थकारी न भवति । अनर्थकारी स्वार्थहानिकरः । उभयत्र समान दासरूपोऽर्थ, शब्दाभिधेय च । तादृशभक्तिस्तु दास्यमेव । न यननादि ।

॥ अथ सख्यं ॥ क्षमा दया सत्यमुदारभावो संगो विरागः समता प्रबोधः।
एते गुणा यस्य हरेः सखाऽसौ शीले समाने हि वदंति सख्यम्
॥ २०६ ॥

मैत्री चेद्विहिता समं भगवता स्वात्मप्रियावाप्तये
स्यादेवेत्यनुभूतमस्ति सकलं पूर्वेऽवतारे विभोः।
शक्रांशः स इति स्म बुद्धिनिपुणो मध्यः पृथायाः सुतः
सख्यं मुख्यतयाऽकरोदिव हरेः सर्वासु तद्भक्तिषु ॥ २०७ ॥

॥ अथात्मनिवेदनं ॥ श्रियस्ताः शतं या विरागादिनिष्ठा
अधिष्ठाय भाव्यं मयेतीहसे चेत्।
अहं श्रीश तेऽस्मीति नारायणाग्रे
सखा ब्रूहि कामं त्वमापूरयस्व ॥ २०८ ॥

धृता याऽल्पात्मत्वादहह विपुलाशा भगवता
गताशंकं योऽहं सपदि सफलां तां व्यरचयम्।

तथा हि सदादासो यस्तस्मिन्विपरीतभावे कादाचित्के उत्पन्नेऽपि अनर्थकस्तु भवति। 'सदादास' एतत्पदं वैपरीत्येन पठितमपि 'सदादास'रूपमेवार्थं वक्ति। कनकवत्। 'भजन'रूपायां तु भक्तौ वैपरीत्ये कृते 'नजभ' इत्यर्थांतरमनर्थापादकं भवति। वयं तु वन्याः ज्ञानशून्याः अतः सर्वतो मुख्यस्यार्यायामेव भक्तौ अभियोक्तव्यमिति ह- स एवाभवदिति तात्पर्यं ॥ २०५ ॥

अथ सख्यमाह। क्षमेति। क्षमादयो हि गुणा भगवति विलसंति। अतः कतिपयतादृशगुणवतामंतरेण सख्यं कथं स्यात् ॥ २०६ ॥

अर्जुनो मुख्यत्वेन सख्यं कृतवानित्युक्तमित्याह। मैत्रीति। पूर्वेऽवतारे रामावतारे तावच्छक्रो वालिरूपांशेनासीत्। कृष्णावतारे पार्थरूपांशेन। तत्रार्जुनो विचारितवानात्मप्रियावाप्तिरपेक्ष्यते चेद्भगवता मैत्री कार्या। यथा सुग्रीवेण मैत्री कृताऽभूत्तेन तस्यात्मप्रियावाप्तिरभूत्स्वस्त्रीलाभोऽभूत्। तदपहारकवालिघातेन। इदं सर्वं मया पूर्वेऽवतारेऽनुभूतमतः सैव कर्तव्येति निश्चित्य तामेव कृतवान् ॥ २०७ ॥

आत्मनिवेदनमाह। श्रिय इति। वैराग्यज्ञानादिनिष्ठाः याः सर्वाः शोभास्ता अधिष्ठाय मया भाव्यमितीच्छा चेद्भगवते आत्मनिवेदनं कुरु। तत्प्रकारमाह। अहमित्यादि। एवमात्मनिवेदने कृते तत्र तव कामः सिद्ध एव। 'अहं श्रीश तेऽस्मि' इति वचने 'श्रीणां शतं तत्राहमस्मि' इत्यर्थांतरमुपलभ्यत एवेति ॥२०८॥

यद्बलिनाऽऽत्मार्पणं कृतं भगवते तदुक्तमित्याह। धृतेति। भगवताल्पात्मत्वाद्वामनत्वाद्विपुलाशा महती आशा, पृथ्व्या आशा च। धृता। यो हि अल्पो भव-

महाभूतस्यास्य त्रिभुवनगुरोः किं बलिरयं
निहन्यां तन्वाशामिति स सहसाऽऽत्मानमददात् ॥ २०९ ॥

नाचर स्वहितजातघातकं पातकं तु निरये निपातकम् ।
शंभवे स्पृहय मानसानिशं शं भवेऽपि भवतो भवेद्ध्रुवम् ॥ २१० ॥

आशाविरहितो यस्तु नाशस्तस्य न विद्यते ।
यतो न संति यस्याशा अनाशः सोऽभिधीयते ॥ २११ ॥

आशाविरहितो यस्तु स मुक्त इति तर्कये ।
आशा अपगता यस्य सोऽपाशः सद्भिरीर्यते ॥ २१२ ॥

याचनायां प्रवृत्तस्य का का नाम न दुर्दशा ।
चेतश्चेत्क्रियते यस्यां यातनैवोपतिष्ठते ॥ २१३ ॥

आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
यदाशासहितस्तांतो निराशः शांत उच्यते ॥ २१४ ॥

स्त्री सतीयं ममास्त्रीति प्रतिभाति विनिश्चितम् ।
भवंति मूर्छिताः शूरा अपि यद्गवलक्षिताः ॥ २१५ ॥

नि स बह्वाशां करोतीति युक्तं । तामहं सफलितवान् । अधुना महाभूतेन तेन तदनुरूपा तन्वाशा अल्पाशा, देहस्य मम आशा च । कृता । तामहं किं विहन्यामिति आत्मार्पणं कृतवान् ॥ २०९ ॥

सर्वथा हेयान्याह । नेति । भवेऽपि शं सुखं भवेत् ॥ २१० ॥

आशेति । न संति आशा यस्य सोऽनाशः, नास्ति नाशो यस्य सोऽपि च स एवेति ॥ २११ ॥

आशेति । अपगता आशा यस्य सोऽपाशः । न संति पाशा यस्य सोऽप्यपाशः । यश्च पाशरहितः स मुक्त एव ॥ २१२ ॥

याचनायामिति । याचना कार्येति मनस्यानीतं चेद्यातनैव उपतिष्ठते । 'याचना' शब्दे 'च' चकारस्थाने 'त' तकारः कृतश्चेद्यातनैवेति ॥ २१३ ॥

आशेति । तांतो ग्लानिमापन्नः । तमु ग्लानौ । आशासहित इति शब्दस्तकारांतः । निराश इति शब्दस्तु शांतः ॥ २१४ ॥

' न तथाऽस्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः । योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ' इति भागवतोक्तेः स्त्रीणां च हेयत्वमाह । स्त्रीति । अस्त्रमस्ति यस्य सोऽस्त्री । यस्या गावौ नेत्रे ताभ्यां लक्षिता विलोकिताः । यस्य गावः बाणास्तैर्लक्ष्यीकृताः । ' गोस्तद्धितलुकि ' इति गोशब्दाट्टच् ॥ २१५ ॥

यद्धस्तुलाप्रसंगात्सद्यः प्रज्ञां हरत्यहो तुंडी ।
तस्याः साक्षात्संगः किं किं न हरेदिदं न जानीमः ॥२१६॥

यत्संगेनैव जघन्यकर्मवशतोऽधःपातमेति स्वयं
सद्यः संगभृतां तनोति महतां पुंसां च्युतिं तेजसाम् ।
इत्थं नित्यममंगलं समुदितानंगं कुरंगीदृशा-
मंगं तत्र नु संगमः सुमनसां मा भूत्प्रसंगादपि ॥ २१७ ॥

मुखेन रम्या याः कांता निरयं रेफांतराश्च याः ।
नरका इति ता मन्ये तासु सज्जेत कः पुमान् ॥ २१८ ॥

हा हंत संहारमुरोजमंडलं स्त्रियाः क्रमे लोचनयोश्च रौरवम् ।
पश्यन्ननास्यां रमतेतरां जनो मनोभवो हंत दुरंतविक्रमः ॥ २१९ ॥

एकांतेऽकगता स्वविभ्रमभरं संदर्शयंती मुहुः
सीत्कारं नखलेखने विदधती व्यक्तानुरक्ता सती ।

यद्धस्तेति । स्पष्टं । 'सद्यःप्रज्ञाहरी तुंडी सद्यःप्रज्ञाकरी वचा' इति ॥२१६॥

स्त्रीणामंगं परममंगलमित्याह । यत्संगेति । जघन्यकर्म नीचं कर्म, मैथुनं च । अधःपातो नरकावाप्तिः, रतिप्रयोगार्थे अधःपतनं च । संगः सहवासः, समागमश्च । तेजो माहात्म्यं, रेतश्च । इह केनापि निंद्यं कर्म कृतं चेत्तस्याधःपातरूपं फलं प्रेत्य भवति । अस्य तु अत्रैव । महादुर्जनसहवासः कृतश्चेत्कियता कालेन सतेजश्च्युतये भवति । इदं तु सद्य एवेति ॥ २१७ ॥

स्त्रियः केवलं नरकरूपा इत्याह । मुखेनेति । या मुखेन रम्याः रमणीयाः । यद्वा । मुखे नकारेण रम्याः । स्वापेक्षितसुखविषयेऽपि या नकारमेव प्रयुंजते । रेफः कुटिलमंतरं मनो यासां । बहिः साध्वीभावं दर्शयंत्योऽपि अंतः केनापि पुरुषविशेषेण संगता इति भावः । तादृश्यः कांता 'नरका' एव । शब्दतोऽपि या मुखे आदौ नकारेण रम्याः । रेफो रवर्णोऽतरे मध्ये यासां । याः कांताः ककारांताः । एवं च नरक इति सिध्यति ॥ २१८ ॥

हा हंतेति । संहारं सम्यग्हारयुक्तं, संहारनामा नरकविशेषः । रुरोः कृष्णसारस्यायं रौरवं, एतन्नामा नरकविशेषश्च । 'महारौरवरौरवाः' । 'संहारः कालसूत्रं च' इत्यमरः । चकारात्कालसूत्रं कंठं ॥ २१९ ॥

कांतासंगजन्यं सुखं क्षणिकं तदंतेऽतीव क्लेशदमित्याह । एकांत इति । इयं रामा एकांतेऽकगता सखीजनासंगता वा । स्वस्य विभ्रमो विलासः सस्मितनयनचमत्कारादिस्तमादौ दर्शयति । ततोऽकुटिलकामेन कांतेन स्तनपीडनचुंबनादिबाह्यसुरत आरब्धे सीत्कारं तनोति । ततो बाह्यरतेनानुरागं गता सती मधुरस्वादु मादकं च यद्वदनं तत्र य आवेशस्तेन कांतं रमयंती सती क्षणमानंदं ज-

आनंदं जनयेत्क्षणं मधुरतावेशेन पामेव रे
रामेयं पुनरंततः किमपि यत्कुर्वीत तच्चिंतय ॥ २२० ॥
नूनमुन्नतपयोधरो भवेत्कारणं घनरसस्य भूयसः ।
तेन पूर्णतमता जलाशये तत्र विप्लुततया निमज्जनम् ॥ २२१॥
यो रामभजने सक्तः स रामां दूरतस्त्यजेत् ।
रामाभक्तिर्यतो वक्ति भक्त्यभावं रघूत्तमे ॥ २२२ ॥
उद्वाहः प्रथमार्तवोत्सवविधिर्गर्भाहितिः पुंसवः
सीमंतोन्नयनं प्रसूतिरसकृज्जातक्रियाश्चाखिलाः ।
आकल्पा मणिमौक्तिकादिखचिता वासांसि सूक्ष्मोत्तमा-
न्येवं वै पुरुषार्थहानिकरणे सृष्टाः स्त्रियो वेधसा ॥ २२३ ॥
लोके प्रथमताभाजः कांता रसहितांतराः ।
तारका इति ता मन्ये दुस्तरे भवसागरे ॥ २२४ ॥

नयति । न तु चिरं । परमंते परमसंतापकारिणी भवेदिति चिंतय । कथं । यथा पामा । सास्यंकगता प्रायेणास्ते । तत्कंडूयनं लज्जावशाज्जनसमक्षं न भवति । स्वयमेकांते यदा एक एवावतिष्ठते तदा सा स्वविभ्रमं कंड्वातिशयं दर्शयति । ततो नखैर्लेखने खर्जने आरब्धे सीत्कारो भवति । ततो व्यक्तमनुगतं रक्तं यस्यां सा । किंचिद्रक्तोद्गमे जाते मधुरता पुनः पुनः खर्जनविषयिका रुचिस्तया य आवेश उत्साहस्तेन क्षणं सुखं स्यात्परमनंतरं भगभगायितः संतापो भवति तथा ॥२२०॥

स्त्रीणां प्रसंगेन निमज्जंतीति युक्तमित्याह । नूनमिति । उन्नतं स्तनमंडलं सांद्रशृंगाररसस्य कारणं भवति । ततो जडानां मूढानामाशये तेन पूर्णतमता तत्र विप्लुतता व्यसनिता तया निमग्नो भवति । यथा उन्नतमेघोदयो बहुजलस्य कारणं । तेन जलाशयानां पूर्णता । तत्र विगतं प्लुतं प्लवनं जलतरणपाटवं यस्मात्तत्तया निमज्जनं युक्तमेव । 'प्लुङ्' गतावित्यस्य धातोः 'उडुपं तु प्लवः कोलः' इत्यादौ जलतरणरूपार्थदर्शनाद्भावे क्तः । 'विप्लुतो व्यसनविह्वलः' इति हेमचंद्रः ॥२२१॥

य इति । रामाभक्तिरित्युक्ते रामेऽभक्तिः प्रतीयते ॥ २२२ ॥

उद्वाह इति । आकल्पा भूषाः । पुरुषार्थो जन्ममरणातीतभवनं, पुरुषद्रव्यं च ॥ २२३ ॥

प्रसंगादुत्तमस्त्रीलक्षणं तदुपादेयत्वं चाह । लोक इति । प्रथमता श्रेष्ठत्वं । या लोकेन साध्वीयमित्युच्यते । रसो हितं च भर्तृविषयकमंतरं यासां त इत्यः । मदालसा चूडालाप्रभृतयः संसारसागरे तारका भवंति । याभिः स्वकांता ब्रह्मभावमापिताः । तारणस्योत्सर्गतः पुंधर्मतया पुंस्त्वनिर्देशः । शब्दतोऽपि याः प्रथमयादौ 'ता' ताकारं भजंति, 'रेण' रेफेण सहितमंतरं यासां, याः कांताश्च ककारांता । एवं चादौ 'ता', मध्ये 'र', अंते 'क' इति तारकपदं निष्पद्यते ॥२२४॥

परमैव या स्वभावादपकारं प्रापिता यद्यपि ।
सा किं स्वाश्रस्थित्या दैन्यापादनकरी भवेत्पुंसः ॥ २२५ ॥
पुत्रदारादिसंबंधोऽमृतश्च्युदिव भासते ।
तत्प्रसंगः पुनः पुंसां सेहुंड इव तापदः ॥ २२६ ॥
मोदिष्यसे मनश्चेत्स्यात्सदामोदरसद्रवम् ।
रोदिष्यसि त्वं हृदयदारकार्तस्वरो ध्रुवम् ॥ २२७ ॥
स्यात्पुंसां तु यथा यथाऽधिकतरो योषित्कुमारादिषू-
ल्लेखस्तत्र तथा तथा नवनवा प्रादुर्भवेन्माधुरी ।
तत्पश्चादनुरक्तता न यदहो संतापयुग्जीवनम्
प्रेष्ठं तत्र निदर्शनार्थमधमां पामां समालोकये ॥ २२८ ॥
पुरुषझषः संसाराकूपारप्रसृतकामिनीजाले ।
पतितोऽपि बलान्निरियाद्बालिशबेधः परं विनाशाय ॥ २२९ ॥

परमैवेति । या स्वभावेन परमा सा ऽपकारं प्रापिताऽपि भर्तुर्दैन्यापादनकरी न भवति । उत्तमत्वात् । 'परमा' हि अपकारं पकाराभावं प्रापिताऽपि 'रमा'एव भवति । या रमा सा किं दैन्यापादनकरी ॥ २२५ ॥

पुत्रेति । अमृतं सुधा श्च्योतति तत् । तत्रातीवासक्तिश्चेत्तापाय । यथा सेहुंडो वृक्षविशेषः । 'थोर' इति भाषाया । तत्संबंधः । अमृतं क्षीरं स्रवति । तत्रात्यंतं प्रसंगश्चेत्तापाय ॥ २२६ ॥

मोदिष्यस इति । दामोदरस्य यः सद्रवः उत्तमशब्दः वेदरूपः रामकृष्णादिनामरूपो वा तेन सहितं यन्मनस्तत्सदामोदरसद्रवं । हृदये दाराः कार्तस्वरं च यस्य सः, हृदयदारका आर्तस्वरा यस्येति च ॥ २२७ ॥

स्यात्पुंसामिति । योषिदादिषु यथा यथाऽधिकमधिकमुल्लेखः परिचयस्तथा तथा तत्र माधुरी रुचिरुत्पद्यते । ततोऽनंतरमनुरक्तता भवति । सा च कीदृशी । यत्र संतापयुक्तमपि जीवनं प्रेष्ठं भवति । यदीयमरणेन संतापोऽपि माभूदितःपरमिति निर्वेदो न भवति । यथा पामायामुल्लेखः उल्लेखनं च । ततः माधुरी सुखास्वादः । ततोऽनुरक्तता अनुगतरुधिरता । तत्र संतापयुक्तमपि उष्णमपि जीवनं जलं प्रेष्ठं भवति ॥ २२८ ॥

पुरुष इति । अकूपारः समुद्रः । झषः मत्स्यः । जालके पतितमत्स्यानां मध्ये कश्चिद्बलेन बहिर्निरेति । बालिशोऽज्ञः, बलिशस्यायं बालिशः । डलयोरैक्यं । कदाचित्प्रियामपि स्त्रियं त्यक्त्वा कश्चिदन्यत्र बालिशं त्यक्तुं न शक्नुयात् । यथा मत्स्यो जालाद्बलेन निरियात् । परं बडिशेन विद्धो म्रियेतैवेति ॥ २२९ ॥

वित्तं वित्तभ्रमकरं जिज्ञासो मा स्म संग्रहीः ।
वित्तस्य तस्य तु त्यागे नूनं विदुपलभ्यते ॥ २३० ॥
कोऽयं हंत महामोहग्रहग्रस्तोऽखिलो जनः ।
अर्थस्यार्थे कदर्थः सन् परमार्थं त्यजत्यहो ॥ २३१ ॥
मधुपोऽपि कुजन्मिसंगतोऽपि मा विजहाद्यदसौ सुवर्णगंधम् ।
अमुना किमुनामना (?) त्तगंधाः शतधाऽमी सुमनोगणाः क्रियेरन् ॥२३२॥
अविवादि धनं यत्तु नैव स्यात्तद्विबाधनम् ।
यन्निकारेण मिलितं तद्धनं निधनं भवेत् ॥ २३३ ॥
रे नानारामाणां मुक्यमधूनि सौम्य पाद्मकोशेषु ।
लंपटतया द्विरेफो भ्रमरवदिह बत नरोऽपि सन्मा भूः ॥२३४॥
स्रष्टा सर्वस्वहान्यै स्वत इव जगतो निर्ममौ (मे) वस्तुनी द्वे
शस्त्रीस्येकं तथान्यन्निधनमिति ततः शंकितः को नु चैते ।

द्रव्यं हेयमित्याह । वित्तमिति । हे जिज्ञासो, वित्तं मा संग्रहीस्तत्संग्रहं मा कुरु । यद्वित्तस्य तस्य त्यागे दाने ' वित् ' ज्ञानमुत्पद्यते । ' धनं तु धर्मैकफलम् ' इति भागवतात्वित्तशब्दसंबंधिनस्तकारस्य त्यागे ' वित् ' इत्येवावतिष्ठत इति ॥ २३० ॥

कोयमिति । स्पष्टं ॥ २३१ ॥

मधुप इति । मधुपो मद्यपो, भृंगश्च । कुजन्मिनो नीचाः, वृक्षाश्च । सुवर्णगंधं स्वर्णलेशं, स्वर्णचंपकगंधं च । आत्तगंधाः पराभूताः, गृहीतगंधाश्च । सुमनोगणाः साधवः, पुष्पाणि च ॥ २३२ ॥

धनमपि न्यायोपार्जितमुत्तममित्याह । अविवादीति । अस्ति विवादो यत्र तद्विवादि । तद्धनं विबाधनं न भवति । यत्तु निकारेण शाठ्येन मिलितं तन्निधनं मरणहेतुः । शब्दतश्च ' अविवा ' इत्यानुपूर्वी आदिर्यस्य तदविवाधन । बवयोरभेदादविबाधनं । निकारेण यत्संगतं तद्धन निधनं ॥ २३३ ॥

उक्तस्त्रीधनयोरासक्त्या त्वं निंद्यो माभूरित्याह । रे इति । अनेकस्त्रीमुखसंबंधिमधूनि लब्ध्वा कोशेषु च लंपटो भूत्वा भ्रमर इव द्विरेफः द्वाभ्यां कारणाभ्यां रेफः कुत्सितो मा भूः । नरः सन् नाना ये आरामास्तत्संबंधि मधूनि पुष्परसे पद्म नाभिमे पद्मास्तं च ते कोशाः कोरकाणि तेषु च लपटः सन्भ्रमरो द्विरफो भवतीति युक्तं । यतो भ्रमतीति भ्रमरोऽज्ञानी इतिपक्षस्त्वन् । रेफद्वयविशिष्टश्च । न तु नरो ज्ञानयाऽवर्णरहितश्च ॥ २३४ ॥

स्त्रीधनप्रसंगेन सर्वस्वहानिर्भवतीत्याह । स्रष्टेति । विश्वकर्तेदं जगत्स्वत एव संहरणाय कल्पतामिति वस्तुद्वयं निर्मितवान् । एका शस्त्री । अन्यन्निधनं । इस्यते

स्वीकुर्वीतेति वर्णं प्रथममथ तयोः कोविदो गोपनार्थं
त्रिच्छिद्यापातरम्यैर्मधुरिमजनितै रंजयामास भूयः ॥ २३५ ॥
तत्राशेषा विदग्धा अपि बत विविधापातमाधुर्यलुब्धाः
स्निग्धाः संतो रमंते कलयति कुशलः कोऽपि नैतत्स्वभावम् ।
विच्छिन्नं वर्णयुग्मं तदिह शनिरभूद्दृष्टिमार्गे गतोऽसौ
कीदृक्षोऽस्तीति पूर्णं विमृश मम सखेऽद्यापि बुध्यस्व नूनम् ।२३६॥युग्मम्
सृष्ट्वा पक्षिमृगादिकानि विविधानीशः पुराण्यात्मना-
तुष्टस्तेरुचितांतरोऽथ पुरुषः सृष्टोऽभवत्तुष्टये ।
सोऽयं चेन्निजलिंगहायमहह स्यादीसमेतांतर-
स्तुष्ट्यै स्यात्कथमीश्वरस्य परमामोदाद्गमोल्लासिनः ॥ २३७ ॥

हिंस्यतेऽनया शस्त्री तरवारिः । निहन्यतेऽनेन निधनं । एतयोरुभयोराकलनया स्वत एव नाशो भविष्यतीति । अथ शंकित एते दारुणे को नाम ज्ञातांगीकुर्यादिति । ततः स तत्प्रज्ञानभंगायादिमं वर्णमपहृतवान् । ततो जातेयं 'स्त्रीधनम्' इति । तत्राप्यापातमाधुर्यरूपेण रागेण रंजितवान् । येन सर्वथा तत्स्वभावो नाविरभूदिति । तत इमे सर्वे चतुरा अपि तन्माधुर्येण मोहं गताः सक्ता भवंति । परं कोऽपि निपुण एतयोर्वास्तवघातुकं पूर्वस्वभावं न वेत्ति । स वाचाविरूपेण कदापि न ज्ञातुं शक्येत । माधुर्यरंजितत्वात् । अतस्तज्जिज्ञासा चेत्तयोर्वर्णावपहृत्य निहितौ तत्र रंजना नास्तीति तत्रैतयोर्वास्तवस्वभावज्ञानं स्यात् । अतस्तदवलोकय । स च 'शनिः' । स दृष्टौ संगतः सर्वस्वहान्यै भवतीति सार्वजनीनं । तद्वदेते अपीति ज्ञात्वा तत्र प्रसंगं माकार्षीरिति तात्पर्यं ॥ २३५ ॥ २३६ ॥

सृष्ट्वेति । परमेश्वरो हि नानाविधान्प्राणिनः सृष्ट्वाऽपि नातुष्यत् । ततः उचितं स्वनिरीक्षणयोग्यमंतरं बुद्धिर्यस्य तं पुरुषं सृष्ट्वा तुष्टोऽभवत् । तथा च भागवतं 'सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान् । तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः' इति । यदि स पुरुषः स्वीयमुचितांतरस्वरूपं निजलिंगं हित्वा 'ई' समेतांतरः स्यात् । ईः कामः, ईः श्रीरिताभ्यां समेतांतरस्तर्हि परमामोदोद्गमोल्लासिन आनंदरूपस्य तस्य तुष्ट्यै किं स्यात् । यदर्थमनेनोत्पादितस्तदकर्ताऽयमिति । शब्दतोऽपि पुरुषो हि उचितांतरः । 'उ'ना उकारेण चितं अंतरं मध्यं यस्य । 'पुरुष' इत्यत्र मध्यमवर्णे रेफे 'उ'कारः संगतोऽस्ति । तदुचितांतरत्वं विहाय 'ई'कारेण समेतः स्याच्चेत् 'पुरुष' इत्यस्य 'पुरीष' इति जायते । यच्च पुरीषं तत्परमामोदैकरसस्य सुगंधैः समाहितस्य तुष्ट्यै कथं स्यात् । स तन्मनसा न स्मरति । न च पश्यति । न शृणोतीति ॥ २३७ ॥

अक्षाक्षवशतो तात या महानर्थकारिणी ।
यया विनष्टसर्वस्वा युधिष्ठिरनलादयः ॥ २३८ ॥

जगत्यामत्र जनता मता का मरणोन्मुखी ।
प्रश्नस्यास्येयमेवैतदुत्तराय प्रजायते ॥ २३९ ॥

वृथैव रे कामरतोऽसि शत्रुं दुरासदं तं भगवानवादीत्।
जनो महाराष्ट्रगतोऽपि न त्वां किमाक्षिपत्येष कृपार्द्रचित्तः ॥ २४० ॥

रागो न्यक्कृयतामये द्विजनिना दोषस्थितेर्ज्ञापकः
पश्यास्य क्षणिकप्रसंगवशतः सन्मार्गवर्त्यप्यसौ ।
आदित्यो मधुपोपचुंबितमहापद्मिन्यभीष्टाय य-
त्कोशेषु स्वयमर्पयन् श्रियमयं न प्रेक्ष्यतां गाहते ॥ २४१ ॥

कामः क्रोधश्च लोभस्त्रयमपि परमं कष्टमाहुस्तथापि
ह्यावाद्यौ तत्र सौम्यौ कथमपि हि परं त्वंतजोऽत्यंतचंडः ।
यत्स्यातां पंगुलौ द्वौ रतिरसविरतावादिमोऽन्यो विरोधि-
ध्वंसे त्वेतस्य लाभादुपरि पदचतुष्कप्रतिष्ठा हि दृष्टा ॥ २४२ ॥

इंद्रियवशो माभूरित्याह । त्यजेति । अक्षाणि इंद्रियाणि । अक्षाः पाशाश्च । यया अक्षवशतया द्यूतं कृत्वा सर्वस्वं हारितवंत इति ॥ २३८ ॥

जगत्यामिति । प्रश्नः । का जनता मरणोन्मुखी मता । उत्तरं । कामरणोन्मुखी । कामरणः वेश्याभिः सुरतोत्सवः । जनता जनसमूहः ॥ २३९ ॥

वृथैवेति । 'नहि शत्रुं महाबाहो कामरूपं दुरासदं' इति गीतासु । आक्षिपति निषेधति । वृथैव रे का(कां) मरतोसि । महाराष्ट्रभाषानुकरणमिदं २४०

राग इति । द्विजनिना त्रैवर्ण्येन । रागः कामः । तिरस्क्रियतां । यस्माद्दोषस्थितेर्ज्ञापकः सः । तदेवाह । यस्य क्षणं प्रसंगेन सन्मार्गवर्ती त्र्यात्मा वैदिकोऽपि मद्यपाना गणेशुंबितामपि पद्मिनीमुत्तमवेश्यां वशयितुं तत्कोशगृहे स्वसंपत्तीरर्पयेत् । जनैरस्य पापिनः मुखमपि नावलोक्यते तादृग्भवति । यथा सन्मार्गे आकाशस्तद्वर्ती त्र्यात्मा सूर्यः । मधुपा भृंगाः । पद्मिनी कमलिनी । कोशः कोरकः । श्रीः शोभा । अप्रेक्ष्यता । 'नेक्षेदुद्यंतमादित्यं' इति स्मृतेः । एतत्केनेति चेत्क्षणं रागप्रसंगेन । स च द्विजकृता निनादा यत्र तस्या उषःस्थितेः प्रातःकालावस्थितेर्ज्ञापकः ॥ २४१ ॥

काम इति । कामः सुरतावसाने पंगुलः । क्रोधः प्रतिरोधिनाशे पंगुलः । लोभस्तु तत्तल्लाभेऽपि पंगुलो न भवति । किं तु पदचतुष्टयमग्रत एव । यथा 'लाभः, लीभः, लूभः, लेभः, लोभः' । लाभोपर्येतस्य मात्रेत्यपि बोध्यं ॥ २४२ ॥

देहदारकदारादौ यावन्मोहाकुलः पुमान् ।
तावन्न चित्तविषयतर्कसंपर्कवर्जितः ॥ २४३ ॥
नरकोपास्थितिं नाम नाम्यां मन्यामहे वयम् ।
या चैषा दृश्यतेऽमुष्मिन्नरे कोपस्य रे स्थितिः ॥ २४४ ॥
बिंदुमात्रेण यो हि स्यादंतरे समदः पुमान् ।
स मंद एवेत्येतस्मिन्न कस्याप्यस्ति संशयः ॥ २४५ ॥
मत्सरः समुपादेयो यागेऽभ्युदयकारणात् ।
पणनात्तु पुनर्मृत्युहेतुर्मोहाभ्यहानिकृत् ॥ २४६ ॥
अनेकधातुश्रेष्ठं यत्कल्याणं संगृहाण रे ।
कल्याणसंग्रहे तात नैव दुर्गतिभाक् नरः ॥ २४७ ॥
यस्तु निरयं शमापन्नः सचन्नोत्सृज्य लोलताम् ।
स नैव सुखमापन्न इति कः पंडितो वदेत् ॥ २४८ ॥
शमस्य साधनं तात कर्तुं यदि न शक्यते ।
शमो भविष्यति शनैः शमलं त्वमलं कुरु ॥ २४९ ॥

देहदारकेति । दारका अपत्यानि । मोहेनाकुलः, मायाः संपत्तेर्विषये ये ऊ-
ह स्तर्का... कल्पश्च ॥ २४३ ॥

नरकोपेति । नरे मनुजे या कोपस्थितिरवस्थानं सैव नरकोपस्थितिः ॥ २४४ ॥

बिंदुमात्रेणेति । अंतरे मनसि बिंदुमात्रेण समदः मदसहितः स मंद एव ।
अन्तरे मध्य ' म ' वर्णे बिंदुना युक्तत्वात् ॥ २४५ ॥

मत्सर इति । यागादौ मत्सर उपादेयो भवति । अमुना पशुनेष्टं मया ज्यो-
तिष्टोमेनेज्येनेति (?) पापकृन्न भवति । पणनं व्यवहारस्तं प्राप्य कृतश्चेदनिष्टहेतुः ।
यद्वा मत्सरः सोमवल्लीयाग उपादेयस्तस्य पणन विक्रयः कृतश्चेदनिष्टकृत् ।
' सोमविक्रेता हंतव्यो बहिष्कार्यो वा ' इति श्रौतसूत्रे प्रसिद्धं ॥ २४६ ॥

अथोपादेयमाह । अनेकेति । अनेकप्रकारेण यच्छ्रेष्ठं कल्याणं साधु कर्म
तत्संगृहाण । ' न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ' इति गीतोक्तेः ।
अनेकेषु धातुषु श्रेष्ठं कल्याण स्वर्णं । दुर्गतिं दारिद्र्यं, निरयं च ॥ २४७ ॥

सामान्यत उक्तं विशेषेणाह । यस्त्विति । शमं आपन्नः शमापन्नः, शं आप-
न्नश्च । शं सुखं ॥ २४८ ॥

शमस्येति । अरे त्वं शमलं पापं अलं कुरु मा कार्षीः । तेन शनैः शनैः
शमः स्यात् । शमलं अलं' लकाररहितं कृतं चेत् ' शम ' इति
भवति ॥ २४९ ॥

शमी क एवं परिपृच्छ्यमाने प्रश्नोऽयमेवोत्तरतां बिभर्ति ।
परीक्षिता यः परिहेलितोऽपि निर्भर्त्सयामास सुतं शपंतम् ॥ २५० ॥
नूनमविद्याविजयाजनितो देहोऽहमिति मदो भूयान् ।
तस्यैक एव सद्भिः प्रतिकूलो दृढतमो दमो दृष्टः ॥ २५१ ॥
यः सर्वदा संश्रितरामपादो दांतं तमेनं सहजं ब्रवीमि ।
यः केवलं स्याद्धठनिरुद्धशुक्रः स क्रांत एवेह भवेन्न दांतः ॥ २५२ ॥

स्याच्चेदुपरमः सौम्य भवतश्चित्तमंदिरे ।
स साक्षाच्छ्रीनिवासोऽयमिति निश्चिनुमो वयम् ॥ २५३ ॥
येषां सदासमाधानो दृश्यते ह्यंतराशयः ।
इंदिराधिपतिस्तत्र वसतीति प्रतीयते ॥ २५४ ॥
यस्यां तु दृश्यते श्रद्धा बुद्धिः सा सत्त्वभाविता ।
अदूरादेव बोधाख्यं तनयं जनयिष्यति ॥ २५५ ॥

शमी क इति । शमी शमयुक्तः क इति प्रश्ने इदमेवोत्तरं । **शमीकः** । एतन्नामा मुनिः । यस्य कृतसमाधेः कंठे परीक्षिता मृतसर्पकलेवरं प्रतिमुक्तं । निर्भर्त्सयामास । तपोव्ययो नास्माकं धर्मः किं तु शांतिरेवेति त्वया मूढेन तस्मै शापो दत्तस्तदसांप्रतमिति ॥ २५० ॥

दममाह । **नूनमिति** । देहोऽहमिति मदोऽविद्यैव विजया मदद्रव्यं । 'भांग' इति लोके । तज्जनितः । तस्य प्रतिकूलो दम एव बाह्येंद्रियनिग्रहः । स च परंपरया ज्ञानद्वारा तन्नाशको भवति । 'दम' इति 'मद' स्य प्रतिकूल एवेति ॥ २५१ ॥

य इति । 'हरेः प्रसादो येन स्यात्तादृश साधनं कुरु' । तच्च रामपदसेवनं । तत्र कृते दमः सहजः । संश्रितरामपादो हि दांत एव । तदकृत्वा केवलं हठेन शुक्रनिरोधः कृतः दमो न तेन । स क्रांत एव स्यात् । न दांतः । शुक्र इति पाठे । क्रांतः सर्वैराक्रांतः । दांतः दकारांतः । क्रांतः ककारांतः; क्रकारांतश्च ॥ २५२ ॥

स्याच्चेदिति । उपरम इंद्रियाणां भगवद्विषयव्यतिरिक्तविषयेषु निर्वेदः, उप समीपे रमा यस्य सः इति च ॥ २५३ ॥

येषामिति । सदा समाधानेन सहितः । दासी चासौ मा च दासमा । तस्या आधानं स्थितिस्तत्सहितः । हरेरावास विना श्रिय आवासो न संभवतीति ॥ २५४ ॥

यस्यामिति । श्रद्धा विश्वासः, दोहद च । तच्च सत्वं विना न संभवति । तस्मात्सा सत्वभाविता । सत्व गर्भ, सत्त्वगुणश्च ॥ २५५ ॥

आढ्योऽयमित्थं क्षितिपोऽयमित्थं किं भूयसा श्रीपतिरेष इत्थम् ।
अर्हन्ति वक्तुं विबुधा भवन्तं सखे यदि त्वं बहुलक्षमोऽसि ॥ २५६ ॥

यो वर्तते शुचित्वेन स वैश्वानर उच्यते ।
यो वर्ततेऽशुचित्वेन स वै श्वा नर उच्यते ॥ २५७ ॥

नूनं ब्रह्मभवः कृतोपनयनोऽनड्वाहमारूढवां-
स्तस्याप्यस्य महाशितुः शिरसि रे दोषाकरः संगतः ।
का वा कार्यतयोर्यदिष्टमिह यच्छ्रोत्रियराजेन त-
च्छ्रोतुं वेत्ति जनः कथं कथमपि प्राज्ञः समर्थोऽपि सन् ॥ २५८ ॥

यथा कथंचिद्वर्णस्य ग्रहणाद्वर्णसंग्रहः ।
विनाऽर्थलाभाद्वेदानां सामर्थ्यं तु न संभवेत् ॥ २५९ ॥

परमार्थस्य निदानं परमार्थं श्रुतिगतं समुत्सृज्य ।
अर्थकृते प्रतिसदनं श्रुतिमातरमहह नर्तयन्त्येते ॥ २६० ॥

वेदानधीत्य यो व्यर्थः स स एवेति तर्कये ।
तत्रैव यः समर्थः स स एवेति न को वदेत् ॥ २६१ ॥

आढ्योऽयमिति । बहुधा क्षमा यस्य सः । क्षान्तिमानित्यर्थः । बहुलक्षप्रमाणा सा धनसंख्या [illegible] आढ्यपक्षे । ननु किं धनसंपत्त्या यदि सत्ता नास्ति । बहुधा क्षमा भूमिर्यस्येति नृपपक्षे । ननु किमनयापि सत्तया बहु लक्षं वित्तापेक्षितिर्यस्याः सा तादृशी मा रमा यस्मिन् स इति श्रीपतिपक्षे ॥ २५६ ॥

श्लेषमाह । **यो इति** । शुचिः शुद्धः, अग्निश्च । वैश्वानरः अग्निः । यः अशुचिः स नरः श्वा कुक्कुरः । वै निश्चयेन ॥ २५७ ॥

वेदाध्ययनं कुर्वन्नाह । **नूनमिति** । ब्रह्मभवः ब्राह्मणः, शिवश्च । स हि ब्रह्मणो ललाटाज्जात इति प्रसिद्धम् । कृतं उपनयनं व्रतबंधस्तृतीयनेत्रं च । दोषाकरश्चन्द्रो, दोषपूर्णश्च ॥ २५८ ॥

यथा कथंचिदिति । वर्णानां वेदाक्षराणां गुरुमुखात्सम्यग्ग्रहणेन वर्णसंग्रहः । [illegible] । वेदपठनेन सामर्थ्यं तदर्थलाभं विना न स्यात् । वर्णा अक्षराणि, ब्राह्मणादयश्च । सामर्थ्यं शक्तिः, संप्राप्तार्थत्वं च । योऽर्थज्ञ इत्सकलं भद्रमश्नुते इति श्रुतेः ॥ २५९ ॥

परमार्थेति । परमार्थो मोक्षः, परमो निर्दोषो योऽर्थो वेदार्थश्च । अर्थकृते धनार्थं ता श्रुतिमातरमहह प्रतिगृहं नर्तयन्ति मूढाः ॥ २६० ॥

वेदानधीत्येति । व्यर्थः विगतो ज्ञातोऽर्थो येन स व्यर्थ एव । अकृतार्थ एव व्यर्थः । यः समर्थः समानोऽर्थो यस्य स स एवान्यर्थः ॥ २६१ ॥

वेदार्थज्ञो हि ना कस्य पृष्ठमारोक्ष्यतीति चेत् ।
पृच्छ्यते, पश्य तत्रासौ प्रश्न एवोत्तरायते ॥ २६२ ॥
विना शास्त्रं तु यद्धर्मं विनाशायैव केवलम् ।
अमाधवस्तु यः पंथाः स महातामसः स्मृतः ॥ २६३ ॥
धिगस्तु काव्यव्यासंगं मूलमासुरसंपदाम् ।
अतो भागवतं सत्त्वापादकं शीलयामहे ॥ २६४ ॥
काव्येनासुरसंपत्तिर्नाटके प्राकृतक्रमः ।
न रामताऽलंकारित्वे वरा भागवतस्थितिः ॥ २६५ ॥
बालकानां यथा माता तथा गीता हितावहा ।
अमेध्यहारिणी सद्यः स्वत्त्वयाऽमृतदायिनी ॥ २६६ ॥

वेदार्थज्ञ इति । वेदार्थज्ञो ना नरः कस्य पृष्ठं आरोक्ष्यतीति पृष्ठे नाकस्य पृष्ठमित्युत्तरं । नाकः स्वर्गः ॥ २६२ ॥

विना शास्त्रेति । अशास्त्रीयं यद्धर्मं तद्विनाशस्यास्त्रमेव । ' तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ' इति गीतोक्तेः । माधवेन रहितो यः पंथाः सोऽमाधवः । अमा अमावास्या तस्या धवः पतिः । अमा तमस्विनी तत्पतिरर्यान्महातामसः ॥ २६३ ॥

धिगस्त्विति । काव्यं कादंबर्यादि । तच्च आसुरसंपदो रजस्तमोमय्या मूलं । शृंगारादिपरत्वात् । काव्यः शुक्रस्तन्मूलकैवासुरसंपत् । भागवतं तु सत्त्वापादकं । सत्त्वं सत्वगुणः । साधुत्वं, दवत्वं च । शुद्धसत्त्वस्य भगवतस्तत्र वर्ण्यमानत्वात् । ॥ २६४ ॥

काव्येनेति । काव्येन कादंबर्यादिना, शुक्रेण च । आसुरसंपत्तिः ' ईश्वरोऽहमहं भोगी ' इत्यादि रूपा । नाटके प्राकृतक्रमो बालभाषाप्रचारः, प्राकृतजनप्रचारश्च । अलंकारशास्त्राभ्यासेनालंकारित्वे संपादिते रामत्वं नास्ति । लंकाया अरिः शत्रुस्तत्वे सति रामत्वं । अतो भागवतं स्थितिर्निष्ठा वरा । या हि भागवतस्थितिः सा भगवत एव स्थितिः । भगवत इयं भागवती सा चासौ स्थितिश्चेति विग्रहे ' स्त्रियाः पुंवत् ' इतिपुंवद्भावः । सा च साधारणी न । किं तु भागवतो महाभागवतस्तत्र स्थितिः । न त्वल्पभाग्यस्य ॥ २६५ ॥

बालकानामिति । बालकाः शिशवः, अज्ञाश्च । या माताऽमेध्यं मूत्रपुरीषादि हरति स्वयं निष्कासयति । स्वस्य हृदये तनयस्तने भवं यदमृतं दुग्धं तत्पाययित्री । अमेध्यं दोषजालं । स्वस्यात्मनो हरेर्हृद्यं प्रियममृतं मोक्षं भक्तिं वा ददाति ॥ २६६ ॥

ब्रह्मचर्यनिरतास्तपस्विनो दूरमुज्झितगृहा विवेकिनः ।
पव्रजंति सुरतार्थिनोऽपि तद्विस्मयाय विपुलाय जायते ॥ २६७ ॥

संपूर्णप्राणभृत्प्राणविश्राणनपरायणः ।
यथार्थं राजतेऽत्यर्थं सकलत्रः किलाश्रमः ॥ २६८ ॥

यो नित्यं मार्गणं बिभ्रत्स वै देही वरो मतः ।
यो नित्यं मार्गणं बिभ्रत्स वैदेहीवरो मतः ॥ २६९ ॥

विप्राः शांताश्च दांताः सकरुणमनसः सात्त्विकाः सत्यशीलाः
सप्रज्ञाश्चेति दृष्ट्वा निपुणतरमथाप्याश्रमं श्रीमतैषाम् ।
संन्यासः स्थापितोऽभूत्स यदि विधिवशाल्लभ्यते येन पुंसा
पुकाचारं विचारं स च रचयति चेद्धीयते किं स्वलाभः ॥ २७० ॥

सूत्रं शिखामप्यविहाय दंभात्तुरश्चतुर्थाश्रममाश्रितोऽपि ।
विधाय साहाय्यकमस्य कृष्णः क्षिप्रं सुभद्रावगमं तनोति ॥ २७१ ॥

कर्ममार्गे यथा शूद्रा एकगोत्रावलंबिनः ।
मोक्षमार्गेऽपि ते तद्वदेकगोत्रावलंबिनः ॥ २७२ ॥

नैष्ठिकं ब्रह्मचारिणं वर्णयति । **ब्रह्मचर्येति** । गृहं गेहं, भार्या च । सुरतं मैथुनं सुरता देवता च ॥ २६७ ॥

गृहस्थं वर्णयति । **संपूर्णेति** । विश्राणनं दानं । कलत्रेण सहितः, सकलास्त्रायत इति च ॥ २६८ ॥

यो नित्यमिति । मार्गणं याचकमतिथिं, बाणं च । स देही वरः श्रेष्ठः । स वैदेही सीता तस्या वरो रामः । बिभर्ति पोषयति, धारयति च ॥ २६९ ॥

सन्यासं वर्णयति । **विप्रा इति** । श्रीमता भगवता, केनचिदाचार्येण च । विप्रा योग्या इति कृत्वा । आश्रमं गृहस्थाश्रमेषु च । संन्यासश्चतुर्थाश्रमः, सम्यक्न्यासश्च । द्रव्याणीति स्थापितः । तस्यैतद्विषयेष्वनधिकारात् । स यस्य विधिवशाल्लब्धः । लब्ध्वे आचारं विचारं च करोति तस्य द्रव्यलाभः स्वरूपलाभश्च कदापि न हीयते । सम्यगाचारविचाराभावे तु निषेधितत्वात्संन्यासस्य भ्रष्टत्वात्स्वलाभाद्धीनो भवतीति ॥ २७० ॥

सन्यासं प्रशंसति । **सूत्रमिति** । सन्यासवेषमात्रमपि फलदं । किं पुनः सम्यक्तया । यथाऽर्जुनेन दंभसन्यासे क्रियमाणेऽपि भगवता साहाय्यं कृत्वा सुभद्राप्राप्तिः कारिता । अन्योऽपि नरः मानवः । सुभद्रं कल्याणं तदवगमश्च ॥ २७१ ॥

कर्ममार्ग इति । एकं काश्यपमेव गोत्रं येषां । तथा । एकं गोत्रं भगवन्नामैव साधनं । नान्यत् ॥ २७२ ॥

आदौ यत्परिशील्यते दृढतरं तच्चाग्रतो धावती-
त्यर्थो डिंडिमकर्णशृंगानिनदैर्लोकेषु संभावितः ।
तस्माद्वाञ्छसि सत्पदं यदि सखे मद्वाक्यमंगीकुरु
प्रेम्णा संश्रय सत्पदं भवमहाकूपारपारप्रदम् ॥ २७३ ॥
दोषोद्रेकभवे प्रभूततमसि व्याप्ते द्विजानां व्रजो
मूढो नष्टसुदृक् समीपगमपि स्थाणुं परं स्वाश्रयम्- ।
द्रष्टुं न क्षमते, चरंति परितो यच्चात्मघोषद्विषो
हंसस्तत्र यदृच्छया समुदितश्चेत्स्यात्समृद्धं हितम् ॥ २७४ ॥
शुचिमानसावगम इह हंससमागमवशाद्द्विजेंद्राणाम् ।
तदमृततमाः शांताः संतो विहरंति कुवलयेऽथ सुखम् ॥ २७५ ॥
स्रग्गंधाद्युपभोगेषु विरक्तस्य वने सतः ।
नरस्य रामावाप्तिस्तु नूनं हंससमागमात् ॥ २७६ ॥
सृष्टिं वर्णमयीं स लेखकपतिः पश्यन्सदा दृष्टवा-
नवस्थं सदपीदमक्षरमसंवेशेन बाह्ये स्थितम् ।
वर्णास्तेन विना भवेयुरिह हानर्थाकुलाः केवलं
तस्माद्धंसपदं कृपापरवशस्तल्लब्धये निर्ममो (मे) ॥ २७७ ॥

उक्तज्ञानभक्ति[illegible] । आदाविति । सत्पदं ब्रह्मपदं, साधुचरणं च । [illegible] ॥ २७३ ॥

दोषोद्रेक इति । इदं पद्यं पूर्वं (पृ० ६० प० ३७) व्याख्यातं । हंसः परमहंसः साधुः, सूर्यश्च ॥ २७४ ॥

शुचिमानसेति । द्विजेन्द्राणां [illegible] च । [illegible] रणता, शुचि [illegible] मनोहरं । [illegible] जलं, स्वरूपलाभश्च । कुवलये [illegible] च । [illegible] नात-करणशुद्धिद्वारा ज्ञान[illegible] । [illegible] गममंतरेण न [illegible] स्यादिति ॥ २७५ ॥

स्रगिति । यथा नलस्य [illegible] दमयंती[illegible] नरस्य रामस्य भगवतः प्राप्तिर्हंससमागमादित्यर्थः ॥ २७६ ॥

सृष्टिमिति । [illegible] द्विजाद[illegible] प्रधाना सृष्टिः कृता [illegible] । अन्यमो-[illegible] । सृष्टिर्हि परब्रह्मणि एकदेशे [illegible] । वर्णाना [illegible] मस्या[illegible] गताः

प्रमादाद्विस्मृतं यत्तद्बाह्येऽवस्थितमक्षरम् ।
अनायासेन तल्लब्ध्यै नान्यद्धंसपदं विना ॥ २७८ ॥
सत्यपि व्यापके दिव्ये परमे तीव्रतेजसि ।
स्यात्ते पाकस्य संसिद्ध्यै सन्मण्यादितमेव तत ॥ २७९ ॥
कौटिल्यं स्वगतं स्वबंधकमिदं युक्तं पुनर्मुक्तये
सांद्रानंदकदंबकाग्मिसुरताविर्भावकर्तुः परः ।
संगः स्यात्पुरुषोत्तमस्य निभृतानंगप्रसंगाच्च किं
स्पष्टं दृष्टमिदं कचेषु कुचयोः कामं कुरंगीदृशाम् ॥ २८० ॥
स्तोतुं कथं नु कल्पेय संगं सुमनसामहम् ।
मलिनोऽपि गतो येन मधुसूदनतामलिः ॥ २८१ ॥
स्वामोदहेतुसुमनःसमयं श्रितो यः
पश्चात्कृतः सपदि तेन भगप्रसंगः ।

स्युस्तस्मात्तल्लब्ध्यै साधुपदं निर्मितं । ततश्च तत्त्वमस्यादिवाक्योपदेशेनानुगृहीतेन सहैक्यपरा मुक्ताः स्युरिति । यथा कश्चिल्लेखकानां शिरोमणिरक्षरमयीं सूत्र पुस्तकं लिखित्वा पठति अहो [illegible] श्लोकादि तस्यैकस्याक्षरस्यासमावेशतः क-[illegible]पंक्त्यपेक्षया बाह्ये लिखति । ततो वर्णानां भेदेन वाक्यार्थो न संगतो भवेदिति तज्ज्ञानार्थं हंसपदं अंकनेन निर्माति । तेन च बाह्यस्थितस्याक्षरस्य प्राप्तिर्भवति ॥ २७७ ॥

प्रमादादिति । गतार्थमिदमुक्तश्लोकार्थेन ॥ २७८ ॥

सत्येति । यथा तीव्रेऽपि सूर्यतेजसि सति पाकसिद्धिर्न किं तु मध्ये सूर्यकांते कृते तज्जन्येन तेजसा । तथा ब्रह्मणि [illegible]ऽपि पाकः ब्रह्माकारेण परिपाको न भवति । मध्ये सता मणिना [illegible] भवति ॥ २७९ ॥

कौटिल्येति । कुत्र [illegible] कौटिल्यः । तद्वत् कौटिल्यं । कचे तु वक्रता न कौटिल्यं । [illegible] । कुचयोः कंचुकेन बंधः । कचानां मुक्तादामादिना [illegible] । उभयोर्बंधनयोर्मुक्तकारणं तु सुरतस्याविर्भावकर्तुः पुरुषोत्तमस्य रतिक्रीडादिरूप [illegible] । तथा भगवद्भक्तानामपि चेद्बद्धस्य तस्य मुक्तभावः । सुगमं [illegible] ॥ २८० ॥

स्तोतुमिति । सुमनसां साधूनां, पुष्पाणां च । मधुसूदनता भ्रमरत्वं, माधवत्वं च ॥ २८१ ॥

स्वामोदेति । स्वामोदः निजानंद, सुगंधश्च । तस्य हेतुः सुमनसां साधूनां समय आचारः । पुष्पसमयो वसंतश्च । भगप्रसंगः [illegible], **भगः** एतदाख्यदेवता तदुपलक्षिता फाल्गुनमासः । 'उत्तराफल्गुनीनां भगो देवता' इति ज्योतिष प्रसिद्धं । तल्लक्षणस्य [illegible] स विवक्षितः ।

सर्वत्र चात्र किल चैत्रविलासभाजः
श्रीमाधवः सविध एव भवत्यमुष्य ॥ २८२ ॥
अपत्रपा अपि प्रायः सर्वथाऽपि कुजन्मिनः ।
सुमनःसमयस्याश्चेद्धरीभूय स्फुरंत्यहो ॥ २८३ ॥
यस्तु द्विजेंद्रः कुटिलो मंतव्योऽपूर्ण एव सः ।
यस्तु पूर्णत्वमापन्नः स सद्वृत्तो हि दृश्यते ॥ २८४ ॥
पुण्यक्रियादौ फलनिःस्पृहत्वं बोधो विशुद्धोऽप्यथ भक्तियोगः ।
मोक्षः क्रमेणेति तु यत्र पंच सोऽयं पुमान् स्यादिति मे मनीषा २८५
यदृच्छालाभसंतुष्टाः परदारपराङ्मुखाः ।
स्वच्छंदचारिणः केचिद्द्विजा विष्णुपदानुगाः ॥ २८६ ॥
योगं यः प्रथयन्हरेरिह पुनर्भोगं महांतं स्वयं
वाञ्छेदेष हि शेष एव स पुनर्याता बताधोगतिम् ।

चैत्रसबंधी यो विलासः, चित्राणां लेख्यानामयं चैत्रः स चासौ विलासश्च । माधवो हरिर्वैशाखश्च । यथा यो वसंतमाश्रितस्तेन फाल्गुनः पश्चात्सारित एव । वसंतेऽपि चैत्रविलासं भुक्तवतो वैशाखः समीप एव । तथा सतामाचारमनुतिष्ठतो भ्रात्स्त्रीलोलुप्यमपसारितं स्यात्ततः सर्वत्र जगति चित्रतुल्यतां पश्यतो माधवः समीप एव । यथामृन्मयगजभानेऽपि मृद्बुद्धिस्तथा जगद्भानेऽपि चैतन्यबुद्धिर्यस्येति चित्रविलासत्वं ॥ २८२ ॥

अपत्रपा इति । कुजन्मिनो वृक्षाः । पत्ररक्षणमकुर्वंतो वसंतोपनतौ पूर्वपत्राणि पतंतीति । सुमनःसमय वसंतं प्राप्ताश्चेद्धरिनभां वहंतो विराजते । तथा पापयोनयोऽपि निर्लज्जा अपि साधूनामाचारमनुतिष्ठंतो हारस्वपा भवंतीति ॥ २८३ ॥

य इति । द्विजेंद्रो विप्रादिश्चंद्रश्च । कुटिलो दुर्वृत्तो, वक्रश्च । सद्वृत्तः सुशीलो, वर्तुलश्च ॥ २८४ ॥

पुण्येति । यत्र पुंसि पुण्यक्रियादौ फलनिःस्पृहत्वं विशुद्धो बोधो भक्तियोगो मोक्षश्चेति क्रमेण दृश्यंते स एव पुमान् । नान्यः । पुमानित्युक्ते पु. पवर्गो विद्यते यस्य स पुमान् । 'कुचुटुतुपु एते उदिताः' इति पाणिनीयानां संकेत । शब्दतोऽप्ययमर्थो भवति । स च उक्तपंचपदार्थसंसर्गे घटत एवेति । 'बोधोत्तरं भक्तियोगो ज्ञानी च भरतर्षभ' इति भगवदुक्तं ॥ २८५ ॥

यदृच्छेति । केचिदित्यनेन चटकादयः न कुक्कुटादयः । चटकादयः केचिद्गमत्वेनोत्पद्यंते मिथुनीभावश्च तयोरेव । नापि कुक्कुटादौ नियमः । विष्णुपद आकाश, हरिचरण च ॥ २८६ ॥

योगमिति । यो हरेर्योग कुर्वन्नपि महान्तं भोगं वाञ्छे स शेष एव । न तु मत्येन । प्रत्युताधोगतिं याता । किं च आनन्द विपुलो न अविमलो दुःखजाल

आकल्पं विपुलादिभारगहने स्थाता नभोमस्तु यः
सुव्यक्तं द्विजनायकः किल शुकः सोऽव्यक्तवाङ् मुक्तिभाक् ॥ २८७ ॥

रोमांचोऽगेषु कंपो वचनविरचनाऽपाटवं नेत्रचंद्र-
प्रावद्रावस्तमो द्रागपसरति चचिद्विद्रिकाच [?] स्यकस्मात्।
मन्येऽहं तस्य धन्येशितुरमलतपोयोगमासाद्य सद्यः
शीतोल्लासाधिवासोऽधिहृदयगगनं रामचंद्रोऽवतीर्णः ॥ २८८ ॥

श्रीरामाविर्भावो यत्र स इह दृश्यते महत्त्वेन।
यदनेकतारकत्वं पुनर्वसुत्वं च सर्वजनसिद्धम् ॥ २८९ ॥

जातुचिन्नैति विकृतिं कुसंगप्रभवैर्गुणैः।
सर्वत्र तु सदामोदमाधत्ते सुमनोगणः ॥ २९० ॥

प्रसिद्धः सुमनस्त्वेन सर्वदामोदसंभृतः।
स्वत्वं कुसुमवन्नैव शिरश्छेदेऽपि मुंचति ॥ २९१ ॥

तदेव गहनं कष्टं तत्र स्यात्। यथा हरेर्योगं शयनसंबंधिनं प्रयपन्महांतं भोगं सर्पदेहं वाञ्छति स शेष एव। अधोगतिं पातालमूलं गतः कल्पपर्यंतं च। विपुलायाः पृथिव्याः अधिको यो भारस्तदेव गहनं तत्र स्थितश्च। अथ यो हरेर्योगं भक्तियोगं प्रपन्नभोगः नास्ति भोगो यस्य। विषयपराङ्मुखः स द्विजनायकः सुव्यक्तं शुक एव। मुक्तिभाक् अव्यक्त भाति। यद्वा। अः वासुदेवः व्यक्तवाचि यस्य। कीर्तनपर इत्यर्थः। यथा हरेर्हरिद्वर्णस्य योगं प्रपन्नभोग आकाशगामी। द्विजनायकः पक्षींद्रः शुकः कीर एव। स च मुक्तिभाक् स्वच्छंदचारी, अव्यक्तवाक् च ॥ २८७ ॥

रोमांच इति। यस्य हृदये भानवा उल्लासस्थानं रामचंद्रस्तपोयोगमासाद्याव-तीर्णस्तस्य एतानि चिन्हानि भवति तदुक्तमेव। यतस्तपोयोगो माघयोगस्तमासाद्य यश्चंद्रः स शीतोल्लासाधिवासोऽत्यंत शीतं वर्षति। सहायैरैक्यात्। अत एव रोमांचः कंपो वचनापटुत्वं च संपद्यते। तमोऽज्ञानं, तामिस्रं च ॥ २८८ ॥

श्रीरामेति। यत्र पुंसि रामस्याविर्भावः स्फूर्तिः स महान्। अनेकेषां च तारको भवति। पुनः पुनर्वसु द्रव्य यस्मिन। समृद्ध इत्यर्थः। यथा यत्र नक्षत्रे रामावतारस्तन्महत्त्वेन दृश्यते। तत्पुनर्वसु नक्षत्र द्वितारकमिति ॥ २८९ ॥

जातुचिदिति। कुसंगो दुःसंग। विकृतिः शाठ्यादि, मृद्गंधश्च। सदामोदं सर्वदानंदं, उत्तमगंध च। सुमनसा साधुना, पुष्पाणां च। 'आमोदं कुसुमभवं मृदेव धत्ते मृद्गंधं न हि कुसुमानि धारयंति' इति ॥ २९० ॥

प्रसिद्ध इति। शिर आद्याक्षरं तस्य छेदेऽपि 'सिद्ध' इति कृत्वा न स्वत्वं गतं। यथा 'कुसुम' स्वशिरश्छेदेऽपि 'सुम'। तथापि न स्वत्वापगमः। 'कुसुमं सुम' इत्यमरः ॥ २९१ ॥

द्विजिह्वपीडिताश्चापि विक्रियां नैव तन्वते ।
परतापोपशमने गुरवोऽगुरवो जनाः ॥ २९२ ॥
लाभेषु नूनमखिलेषु वदंति संतो
मुख्यः कुलाभ इति तस्यकृतेऽपि नाशे ।
नैव त्यजति सहजप्रवणाः कुलीनाः
शुद्धात्मनः कुसुमवत्परमात्मभावम् ॥ २९३ ॥
उपसर्गप्रकारोऽपि निर्मितः संमुखे यदि ।
नैव स्वभाववैकल्यं वराणां जायते क्वचित् ॥ २९४ ॥
गतोऽपि द्विजराजो यः क्षयं वा वृद्धिमेव वा ।
नैव विष्णुपदं जह्यात्सचामृतकरः स्मृतः ॥ २९५ ॥
त्वद्दयप्रणिहितकृष्णो नित्यं यो विष्णुपदभजनधुर्यः ।
क्षपयन्स्ववपुर्विबुधान् पुष्णात्येनं द्विजेंद्र इति मन्ये॥२९६॥
शूरः स एव यो वै विष्णुपदस्थः प्रचंडकरपालः ।
नक्षत्रलोपकृद्यः सदा द्विजसंघदैन्यभंगकरः ॥ २९७ ॥

द्विजिह्वेति । द्विजिह्वाः सर्पाः, खलाश्च । गुरवो महान्तो जनाः । अगुरवो गुरवो वयमिति न मन्यमानाः, अगुरवश्चंदनाश्च । 'अगरु अगुरु' इत्युभयमपि कोशप्रसिद्धं ॥ २९२ ॥

लाभेष्विति । कुलाभः भूमिलाभः, 'कु' इति वर्णस्य लाभश्च । तस्यापहारे कृतेऽपि 'कुलीना' उच्चकुलोत्पन्ना न भवन्ति । 'लीना' एव स्युः । कुसुमस्यापि अपहारे ['कु' इत्यस्यापहारे] सुमनः ॥ २९३ ॥

उपसर्गेति । वरस्य समक्षं उपसर्गः उपद्रवः न्यक्कारादि तस्य प्रकारे निर्मितेऽपि न स्वभावं मुञ्चन्ति । 'वर' इत्यस्य पुरस्तादुपसर्गो यः 'प्र' कारस्तस्याभजनेऽपि 'प्रवरो' भवति । वरात्स्वतोऽप्यधिको भवति ॥ २९४ ॥

गत इति । द्विजराजो विप्रश्रेष्ठः, चन्द्रश्च । क्षयमाप्नोति, कलाक्षयं च । वृद्धिं भजति, कलावृद्धिं च । विष्णुपदं भगवच्चरणं, आकाशं च । अमृतं मोक्षः करे यस्येति, अमृतरूपाः करा यस्येति च ॥ २९५ ॥

त्वद्दयेति । यः कृष्णध्यानतत्परत्वेन हृद्गतभजनादिपरायणः स्ववपुश्चंदनवत्क्षपयन् विदुषः प्रीणयति स एव द्विजेन्द्रः । यथा चन्द्रः कृष्णं कालिमानं मण्डले दृश्यमानं यमकानिति वदति । आकाशे नक्षत्रजने धुर्यः कृष्णपक्षे स्वमंडलं क्षपयन्नमृतेन देवान्पुष्णाति । अत एव द्विजेन्द्रः । 'पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः' इति कालिदासः ॥ २९६ ॥ **शूर इति** ॥ २९७ ॥

कृतपर्यस्तिकाबंधो जलामृतविवेचने।
यः शुचिः स्वात्मना नित्यं स द्विजो हंस उच्यते ॥ २९८ ॥
यद्भिन्नकठिनविषयजरसं रसज्ञा रसाकुला दधते।
विशदस्वभावसुभगास्त एव मुख्या द्विजा विराजंते ॥ २९९ ॥
निजमहिममद न मनाग्ज्ञानघना आत्मना जना दधते।
यस्मात्कुकाऽपि हंसो हंसः सन्नप्यहंम इति मनुते ॥ ३०० ॥
या साध्वसंगता युक्तं जनता साध्वसं गता।
या साधुसंगता चित्रं जनता साऽध्वसंगता ॥ ३०१ ॥
उत्तममूर्धन्देऽस्मिन् जगतीतलभूषणायिते पुरुषे।
उपकारित्वं मुख्यं सन्दं किल तदनुरूपयुक्तत्वम ॥ ३०२ ॥
संप्रार्थितो भव्यजनो न कान्तः
स्वात्मप्रसादकिंचिन्नरस्य तथापि।

कृतेति। [illegible] तदुपयोग्य। शुचि पवित्रः, शु[illegible] [illegible] ,प्राग[illegible] ॥ २९८ ॥

यद्भिन्नेति। [illegible] मुख्याः। के। यैर्भिन्ना-श्चर्विता ये कठिन[illegible] [illegible] रसज्ञा जिह्वा दधते बिभर्ति। 'दध धारणे' [illegible] शुभ्रा [illegible] समानत्वेन सुभगास्तथा यैर्भिन्नाः स्फुटता [illegible] [illegible] रसज्ञा [illegible] दधते [illegible] [illegible] ॥ २९९

निजेति। [illegible] हंसः सन्नपि तत्त्वगर्वं न भजते। [illegible] 'अहंमः' साऽहं साऽहमिति मनुते। न 'हंसो हंस' इति ॥ ३०० ॥

येति। या जनता [illegible] [illegible] युक्तं। परं तु या साधुसंगता [illegible] चित्रं। 'सा अध्वसंगता' सन्मार्गसंगमेति विरोधपरिहार ॥ ३०१ ॥

उत्तमेति। पुरुषो हि परमेश्वरेण यः [illegible] स उत्तममूर्धन्य इति [illegible]। कस्मात्पश्य। उत्तमोऽपि मूर्धन्यः [illegible] [illegible]। [illegible] स्पष्ट। किं। मुख्य-मुपकारित्वं। तेन उपकार एव कार्यं इति। कस्मात् [illegible] मुख्यमाद्याक्षरं 'उप' कार-युक्त उकारयुक्त पकारयुक्त [illegible]। [illegible] मुख्यता [illegible]। तच्च तदनंतरं न तु मुख्य। [illegible] 'तु' इत्यक्षरादनन्तरमेव 'त्व' [illegible] युक्त-त्व दृश्यते। तस्मादुक्त[illegible] ॥ ३०२ ॥

संप्रार्थित इति। यो हि भव्य उत्तमो जन [illegible] प्रार्थितस्तस्य

भ्राम्यन्स्वयं स्पर्शनमल्पशोऽपयं-
स्तोषं स जोषं तनुयाद्विशेषतः ॥ ३०३ ॥
नूनं भवांघ्रिगलितं बहुलोहजातं
क्वापि गतं किल यदंतरनंतदेवे ।
यस्माच्च्युतानि सहसा वसुदेवकारा-
गारे स्वयं निगडतालकशृंखलानि ॥ ३०४ ॥
जानद्भिः परमं ज्योतिः संलग्नधिषणैरपि ।
किं नाद्रियंत सद्योगकरणं चोत्तमा तिथिः ॥ ३०५ ॥
जानंति ये परं ज्योतिस्ते तु धन्यतरा नराः ।
येषां लीलावतीमध्ये पश्य व्यासोऽप्यवस्थितः ॥ ३०६ ॥
जातस्त्वात्मपरीपाको नन्वपामार्गशेखरः ।
रंजनायेह जायेत नाप्रत्यकप्रवणात्मनाम् ॥ ३०७ ॥

कालवशात्पवनाभावोऽस्त्यधुना पूर्ववत्समृद्धता यद्यपि नास्ति तथापि यत्र क्वापि स्वयं भ्रमन् किंचित्सपाशान्तर्मात्रं स्पर्शनं दानं ददतीय कुर्यादेवेति । एतच्च युक्तमेव । यो हि 'भव्यजन' स्तस्य पूर्वभावस्थितिः पूर्वो यो 'भ' कारस्तदवस्थानं न चेद् 'व्यजनो' जातः । यश्च व्यजनं स स्वयं भ्राम्यन्नल्पशः स्पर्शनं वायुं ददातीत्यन्वयः । व्यजनस्य पुस्तकं कोशान्तरं दृष्टं ॥ ३०३ ॥

नूनमिति । यदंतर्भगवानाविर्भूतस्तस्य बहव ऊहापोहा न संति । लोहाना जातं लोहजातं तच्च तच्च तल्लोहजातं । तालक 'कुलुप' इति लोके । शृंखलं 'कडी' इति ॥ ३०४ ॥

जानद्भिरिति । परमात्मज्ञानपूर्वकं सति ब्रह्मणि लग्ना धिषणा येषां तैः । ब्रह्मनिष्ठा अपि उत्तमं योगमनुष्ठानं, करणं वर्णाश्रमकर्माणि, उत्तमातिथिपूजनं च न त्यजंति । पूर्वोक्तानि [illegible] । न तु निषिद्धानि । यथा दैवज्ञा गमनादि-मुहूर्तदाने लग्नमात्र [illegible] । तत्र सति समय नक्षत्रयोगकरणतिथ्यादिगुण-मानामादरं न कुर्वंतीति न ॥ ३०५ ॥

जानंतीति । [illegible] (लीलावतीनामा) ग्रंथश्च । व्यासो वे-दव्यासः, वृत्तादीनां विस्तारश्च । एतन्नाम पुनर्माना [illegible] तु पवित्र एव । परमात्मस्वरूपज्ञानं [illegible] इति ज्ञानपवित्रीकृत्य तत्र व्यासं प्रतिष्ठितो भवति ॥ ३०६ ॥

जात इति । अपामार्गशेखरः । अपामार्गः, तन्मार्गस्य स्तेषां मध्ये शेखर इव । यो जातस्वात्मपरीपाकः । अप्रत्यक्प्रवणात्मना विषयिजनानां रंजनाय न स्यात् । परिपक्वा अपामार्गमंजरी प्रतिलोमस्पर्शफलदता ददातीति ॥ ३०७ ॥

सन्नाथमंडलस्था भजंत इह जंतवोऽमृतं संतः।
यद्विपयमाननस्था दुरंतमत्युं तदप्युचितमेतत् ॥ ३०८ ॥
निलयः कष्टाय स इव, वनिता स्वहिताय जायते सेव।
यं प्रति किल स्वलौल्यं तदिव स हि जनो विराजते विरलः॥३०९॥
बहुतरगहिते रसातल इतिष्ठंते हि सुमनसस्तपसि।
कांतारैजनवेगं विपह्य सद्रसफलास्तु विरलाः स्युः ॥ ३१० ॥
पंकोद्भूती रजोभिः कलुपितहृदयः कंटकावद्धसंग-
श्चेत्सूर्यात्तप्रमादो भ्रमरहित इह स्यात्सदामोदपूर्णः।

सन्नाथेति । सतां नाथाः साधुश्रेष्ठास्तेषां मण्डले [illegible] जन्तवोऽमृतं मोक्षं भजन्ते । यदि च विषयाणां मानने सत्कारे स्थिता दुरन्तमृत्युं [illegible] युक्तं । सतां नक्षत्राणां नाथश्चन्द्रः । अमृतं सुधा । विषं गरलं । [illegible] । [illegible] मुखे स्थिताः ॥ ३०८ ॥

निलय इति । निलयो गृहं । [illegible] नरकः । वनिता [illegible] [illegible] स्त्री । स्वस्य मनो लौल्य-मा [illegible] च ॥ ३०९ ॥

बहुतरेति । कर्मभूमि [illegible] अन्यत्र जन्म [illegible] रसातले तपसि तपोविषये सुमनसः [illegible] उत्तिष्ठन्ते । 'उदोऽनूर्ध्वकर्मणि' इत्या-त्मनेपदं । उत्थिता भवन्ति । [illegible] कान्ताः स्त्रियः, [illegible], अन्ना-द्यनुजीवन इति च, [illegible] विपह्य सहमाना [illegible] तादृशा विरलाः । तथा च गीतायां 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्ध-ये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः' इति । [illegible] यथा 'वहु' [illegible] 'रसातले' इति [illegible] । [illegible] पुष्पाणि बहु यथा स्यात्तथा उत्तिष्ठन्ते । [illegible] वेगं विपह्य [illegible] इति ॥ ३१० ॥

पंकेति । [illegible] [illegible] पूर्णः स्यात् । [illegible] । [illegible] कण्टका [illegible] । [illegible] । तस्य [illegible] पूर्णो

तं धत्ते वासुदेवो निजकरकमले पद्मवत्सादरं तत्-
किं वाच्यं तत्र लक्ष्मीर्निवसति निभृतं नित्यदा निर्व्यलीकम् ॥३११॥

यः प्रीतिमानपि सदैव कलि...
संकीर्तयन्नटति कृष्णयशः पवित्रम् ।
स ब्रह्मभूत इति सुप्रथितस्त्रिलोक्यां
दृष्टा करोऽस्य सततं महती प्रतिष्ठा ॥ ३१२ ॥

वीणाया अपि भुवनत्रयश्रियोऽपि
मायाया अपि निपुणं गुणान्महत्याः ।
ध्न्वानः समभि...धान आजिहानो
दिव्यात्मा विहरति नारदो जगत्सु ॥ ३१३ ॥

प्रल्हादप्रमुखा हि भागवतयो विष्णोर्गुणग्राहिणो-
ऽभवन्नारदसंगजं फल... प्रसं... ।
तावत्स्मृतिमार्गमागतमिदं यत्... सर्वतो
गायन्विष्णुगुणान्स ह व्रजति ... मुदिताः ॥ ३१४ ॥

हीनजातिरपि य... ।
इत्यवेक्ष्य बदरीफलं मुनि... ॥ ३१५ ॥

कृष्णं द्वैपायनं ... ।
पुराण... ॥ ३१६ ॥

...मोक्षलक्षणा...
...॥३११॥

... नारदं । य इति । क-
... , महतीनाम्न्या वी-
णायाः ... ॥ ३१२ ॥

वीणायाइति । ... , महत्या बृहत्या त्रिभु-
वनश्रिय... गुणान्हेतोर्दिव्यविषय-
... ॥ ३१३ ॥

प्रल्हादेति । पर्वतो ... नारद... । ... प्रल्हादि-
गुणा... इति । ...
... ॥ ३१४ ॥

व्यासं ... हीनजाति... ॥ ३१५ ॥

कृष्णमिति । ... यस्य तस्य
... महाभारतेन

यद्ब्रह्मसूत्राणि विधाय कंठे सपद्ययं ब्राह्मणभावमेति ।
वेदोपदेष्टारमिमं पुराणाचार्यं मुहुर्व्यासमहं नमामि ॥ ३१७ ॥

आशावसाना लोकेषु निजगुह्यप्रकाशकाः ।
उपहासास्पदं प्रायो नूनमेकं शुकं विना ॥ ३१८ ॥

द्विजेषु शुक एवेह मुनीनां सुमनःस्थितम् ।
रसमास्वादमास्वादं सुखं चरति सर्वतः ॥ ३१९ ॥

द्राक्षानिंबफणिज्जेषु यस्य साधारणी रुचिः ।
तादृशः शुक एवेह द्विजेंद्रेषु विलोक्यते ॥ ३२० ॥

सदुपासनसंपन्ना कृतस्वारिपरिक्षया ।
अबला शबरी नूनं शरधारी परः पुमान् ॥ ३२१ ॥

शबरी कोलवितरणादपि भवजलधेमहोर्मिघोरस्य- ।
पारं परं गतवती, येन स लाघवसमाश्रयो जयति ॥ ३२२ ॥

मोदते । महान् [illegible] मार्गः स एव तमस्तस्य तमसो दिनं दिवसरूपं । पुराणवक्तारं पुरुषं, अनादिं च । नरे मनुष्ये, पार्थे च । ब्रम्हविद्या ब्रम्हसूत्ररूपा, गीतारूपा च ॥ ३१६ ॥

यद्ब्रह्मेति । [illegible]ब्रम्हसूत्राणि ' अथातो ब्रम्हजिज्ञासा ' इत्यादीनि, यज्ञोपवीतानि च । ब्राम्हणत्वं, ब्रम्ह[illegible] च । वेदविभाजक वेदमध्यापयंतं च । पुराणाचार्यं पुराणवक्तारं ॥ ३१७ ॥

शुकं वर्णयति त्रिभिः । आशेति । आशा दिशो वसाना दिगंबराः, आशाकुल[illegible] । निजगु[illegible], [illegible]रंशा च । शुकस्तु आशानामवसानं यस्य तादृशः ॥ ३१८ ॥

द्विजेष्विति । मुनीनां ऋषीणां, अगस्तिवृक्षाणां च । शुद्धांतःकरणगतं ब्रम्हरसं, पुष्परसं च ॥ ३१९ ॥

द्राक्षेति । फणिज्जः [illegible] । ' मिरची ' [illegible] लोके । कमपि रसविशेषं नवेत्ति ॥ ३२० ॥

शबरीं वर्णयति द्विभिः । सदुपासनेनेति । उपासनं उपासना, शरा[illegible]स्य । अरिः कामादिः, [illegible] । अबला स्त्री । बलमिति बलं । न बलं अबला च । शबरी ' ब ' कारहीना चेत ' शरी ' भवति । स च राम एवेति ॥ ३२१ ॥

शबरीति । कोल [illegible] वितरणं दानं । लाघव लघुत्व, राघवश्च । महतो भवजलधेः पार[illegible] चर्मा[illegible]नवृद्धांशविदलानि [illegible] ' टोकराद्वयेन ' गन्तुमशक्य तथापि गता । [illegible] लाघवसमाश्रयः । योऽयमीव लघुस्तूलप्राय-स्तेन शबरी[illegible] गता । [illegible] ॥ ३२२ ॥

आत्यंतिकं स्वकुशलं परिलिप्समानाः
सेवंत एव सुजना बहुशोऽपि रामम् ।
सर्वेषु तेषु रघुनाथगृहीतसेवा
सैकैव भाति शबरी परिशुद्धभावा ॥ ३२३ ॥
महाकपिः श्रीरामांघ्रिसरसीरुहतत्परः ।
विलोपितांतको यस्मात्तस्माद्वाच्यो महाकविः ॥ ३२४ ।
सत्त्वं सुखे संजयतीति हि स्मृति-
र्श्रेष्मित्यदा सत्त्वमथानिशं सुखम् ।
इतीव विद्वान्पवनस्य नंदन-
स्वमित्यदासत्त्वमसौ दृढं दधौ ॥ ३२५ ॥
विभीषणो राक्षसवंशदीपकः सभाजनोद्दामदशास्यदूषकः ।
सर्वोत्तमस्नेहभरेण पूरितश्चिरं ज्वलत्यत्र परं निरंजनः ॥ ३२६ ॥
अहो सदारामपदं श्रितस्य कुजन्मनः सद्रससंप्लुतस्य ।
समग्रवेस्सत्सुमनस्कताऽस्य निदर्शनार्थं यवनः कबीरः ॥ ३२७ ॥

आत्यंतिकमिति । सेवा परिचर्या । ' मुष्टिप्रमाणं बदरं सेवमित्यभिधीयते ' इति **भोजनकुतूहले** वचनात् । सेवानि बदराणि ॥ ३२३ ॥

महेति । विलापितोऽतको येन स महाकपिर्हनूमान्महाकविरित्युच्यते । ' वि 'ना विकारेण लोपितः अंतोऽपवर्गो 'पि'कारो यस्य स तादृश एव भवति ॥ ३२४ ॥

सत्त्वमिति । स्मृतिर्भगवतो गीतारूपा । ' सत्त्वं सुखे संजयति रजः कर्माणि भारत ' इति । नित्यं यद्दासत्वं दास्यं तन्नित्यदासत्वं । नित्यदासत्वमंगीकृतं चेत्तत्र नित्यदा सर्वदा सत्वमस्त्येव । नित्यदा हि सत्त्वेऽनिशं सुखं । यतः ' सत्त्वं सुखे संजयति ' इति भगवानेवाहेति ॥ ३२५ ॥

विभीषणं स्तौति । विभीषण इति । दीपकवत्प्रकाशयति । सभाजनेषु उद्दामो यो दशास्यो रावणस्तं दूषयति । रामो हि साक्षान्नारायणस्तेन सह विरोधं मा कार्षीरिति सभायां येन रावणं प्रति बोधः कृतः । भाजनं पात्रं तेन सह या उद्दामदशा महती वर्तिस्तस्या आस्यं मुखं दूषयति । सर्वोत्तमो रामस्तत्र यः स्नेहस्तस्य भरेण पूरितः । सर्वोत्कृष्टो यः स्नेहस्तैलं च । अत एव निरंजनो विषयवासनाशून्यः, कज्जलरहितश्च । निकृष्टतैले च कज्जलं बहु स्यात् ॥ ३२६ ॥

द्वाभ्यां **कबीराख्यं** भगवद्भक्तं वर्णयति । **अहो इति** । ननु आरामः उद्यानं तत्पदं, सदा रामस्य चरणं च । **कुजन्मनः** वृक्षस्य, नीचयोनिजननस्य च । सतोत्तमेन रसेन जलेन, ब्रह्मानंदेन च । सत्सु सुमनसः पुष्पाणि यस्य तस्य भावः सुमनस्कता, उत्तमसाधुता च ॥ ३२७ ॥ ०र्शनं स्पष्टं० इति [illegible] ॥

यो ह्यादिमवर्णोत्तररसंगतोऽसौ कुजन्म्यपि कबीरः ।
सुमनःसहस्रमध्ये श्रेष्ठ्यं न समाश्रयेत्कथंकारम् ॥ ३२८ ॥
नृणां मूर्धस्रक्त्वं (न्यत्वं) कलयति कबीरस्य तनयः
कमालेत्येतस्मिन्विषय इह हेतून्समुचितान् ।
उपन्यस्तुं यावत्कृतपरिकरस्तावदचिरात्
समाख्यैवास्येयं मम समवरुन्द्धे मतिगतिम् ॥ ३२९ ॥
आत्मारामसमद्भूतिस्तुलस्यामोदमंदिरम् ।
सुमनःकोटितः प्रीत्यै श्रीरामस्य भवेन्न किं ॥ ३३० ॥
लोकोऽयं किल मोहितो ममतया काः का न नामाचरेत्
प्रेतासंगमहाभुजंगमपरिष्वंगादिघोरक्रियाः ।

यो हीति । यः कबीर आदिमो यो वर्णो ब्राह्मणस्तस्य योग्यो य उत्तमरस उत्कृष्टरसो ब्रह्मरसस्तं प्राप्तः स साधुसहस्रे श्रेष्ठः कथं न स्यादपि तु स्यादेवेति । यो हि कबीरः कुजन्मी वृक्षः । आदिवर्णः कः 'क'कारस्तदुत्तरं 'रे'ण रेफेण संगतः 'करवीरो' भवति । बवयोरैक्यात् । यश्च करवीरः स पुष्पसहस्रमध्ये श्रेष्ठः । 'एकतोऽन्यानि सहस्र पुष्पाणि, एकतः करवीरम्' इति **पारिजातादौ** द्रष्टव्यं । 'बकुलात्पुष्पसाहस्रान्नंद्यावर्तं विशिष्यते । नंद्यावर्तसहस्राद्धि करवीरं विशिष्यते' इति **नृसिंहपुराणे** ॥ ३२८ ॥

कमालं स्तौति । **नृणामिति** । कमाला इयं समाख्या नाम । इयमेवायं नृमूर्धन्य इतीममर्थं कथयति । के मस्तके माला पुष्पस्रक् कमाला । या कमाला मुंडमाला सा मूर्धन्येति ॥ ३२९ ॥

तुलसीदासं द्वाभ्यां स्तौति । **आत्मेति** । **आत्माराम**नामा कश्चित्कान्यकुब्जो विप्रस्तुलसीदासस्य पिता । आत्मारामात्समुद्भूतिर्यस्य । आमोदस्य संतोषस्य मंदिरं । एतादृशस्तुलसीनामा साधुः रामस्यान्येभ्यः कोटिसाधुभ्यः प्रीतये भवतीति युक्तं । आमोदस्य गंधस्य गृह । तुलसी हि अनेकपुष्पापेक्षया रामाय रोचते । तथा च **तत्त्वसागरसंहितायां** 'योगिना निर्वृतौ वांछा कामिना च यथा रतौ । पुष्पेष्वपि च सर्वेषु तुलस्यां तु तथा हरेः' इति । सा चेत्परारामानसंभूता किंचिद्गुणहीना । इयं तु आत्मारामसमुद्भूतिः ॥ ३३० ॥

लोक इति । अत्रेयमाख्यायिका । 'तुलसीदासो हि राजपुरुष आसीत् । स राजकार्यार्थं क्वचिद्गत्वा कियता कालेन गेहमागतस्तावन्ममतानाम्नी तस्य भार्या मातृगृहं गताऽभूत् । तदा काममोहितः सन्रात्रौ श्वशुरगृहं प्रति गंतुं निर्गतः । तदा मध्ये महानदी उपस्थिता । तत्र दृष्टं तावत्कश्चिच्छवस्तटे लग्नोऽभूत् । तदा मन्यते स्म किमहो वाच्यं मम प्रियया नौकैव मदागमनार्थं प्रेषितेति । तत-

तां जह्याद्यदि रामदर्शनसुधालाभस्य सद्भाजनः
स्यादित्यत्र निदर्शनाय तुलसीदासः समुज्जृंभते ॥ ३३१ ॥
अकिंचनवरेण्योऽपि समर्थपदवीं गतः।
दासोऽपि यः किल स्वामी स साधुः कोऽपि राजते ॥ ३३२ ॥
यो हि श्रीरामदासः स्यात्परित्यज्य श्रियं स्त्रियम्।
असौ न परलीनः स्यादिति कः सज्जनो वदेत् ॥ ३३३ ॥
यो रामदासः स्यात्तस्य कल्याणस्थितिरालये।
समाजयाति तं प्रेम्णा दुर्गाधीशः सदा शिवः ॥ ३३४ ॥
रामदासपदांभोजरजःस्पर्शो विराजते।
यः कुशीलजनस्यास्य कल्याणाय प्रकल्पते ॥ ३३५ ॥

स्तदुपर्यादद्य पारं गतः। श्वशुरगृहं गतस्तावत्प्रियानिद्रागेहगवाक्षात्कृष्णभुजंगो महाल्लंबमानोऽभूत्। तदा मन्यते स्म किमहो मत्प्रियया मदारोहणार्थं महारज्जुर्मुक्तेति। तेनावद्यांतर्गतो निद्रितो ममतां बोधितवान्। सा विस्मिताऽब्रवीत्। किमिदं कथमत्रैते श्रीमच्चरणा आगतवंतः। स आह। किं मम नर्माचरसि। त्वयैव नद्यां नौका स्थापिता गवाक्षे रज्जुश्च मुक्ता। हूं पश्यामि परं काऽसौ रज्जुरिति दीपं गृहीत्वा दृष्टं तावन्महान्कालसर्पो दृष्टः। शिव शिव केय साहसिकता, हंहो कीदृगयं दुरंतवीर्यः कामः। ततश्च तयोक्तं। एवं सौहृदं भगवदर्थे कृतं स्याच्चेत्किं नाम दुर्लभं (ऊनं) स्यात्। तदाकर्ण्य तदात्व एव विरक्तस्त्वं नमस्कृत्य त्वमेव मम गुरुरिति वनं गतः। ततश्च तत्र रामदर्शनं जातम् ' इति। ममता ममत्वं च। केचिद्द्रव्यार्जनार्थं प्रेतमधिष्ठाय मंत्रं जपन्ति। जांगलिका भुजंगान् कलयंति ॥ ३३१ ॥

रामदासं वर्णयति चतुर्भिः। अकिंचनेति। दासः स्वामी समर्थ इति तस्य समाख्या ॥ ३३२ ॥

यो हीति। रामदासो हि परे ब्रह्मणि लीनः, परल्यास्तन्नामकदुर्गस्य इनः स्वामी परलीनः ॥ ३३३ ॥

य इति। यो रामस्य दासः स्यात्तस्य गृहे सदा कल्याणं। तं दुर्गायाः पार्वत्या ईशः शिवः सदा सभाजयाति। ' अय भागवता यूयं प्रियाः स्थ भगवान्यथा ' इति भागवतोक्तेः। अथ रामदासस्य गृहे कल्याणस्वामी दुर्गाणां पर्वतकोटराणां रचयिता शिवः शिवाजी नाम राजा तं पूजयति च ॥ ३३४ ॥

रामदासेति। स्पर्शः मणिः। कुशी आयस्यो यः शंकुस्तां लाति। कल्याणाय सुवर्णाय। अन्यत्स्पष्टं ॥ ३३५ ॥

गंगाधरप्रेमरसास्पदं यो यः सूर्यवंशैकमणिप्रवेकः ।
खरांतकः शोभनलक्ष्मणाढ्यः स रामदासः किल राम एव ३३६

ध्वस्तमहाशोकवनं दलिताक्षं सद्रुचाफलावासम् ।
कल्याणशिवप्रभुपदसोल्लासं रामदासमवलंबे ॥ ३३७ ॥

श्रीरामो विपिनप्रयाणसमये श्वःश्रेयसध्वंसको
नास्ति क्रोधसमोऽपरो रिपुरिति प्राह प्रियं भ्रातरम् ।
तद्भूयासमकोपयुक्त इति चेत् श्वःश्रेयसावाप्तये
सर्वस्वं सहसा विहाय तृणवच्छ्रीरामदासो भव ॥ ३३८ ॥

श्रीरामः किल भिन्नभिन्नविधया मातेव कौतूहला-
न्याधत्ते स्वजनस्य पूर्णकरुणस्थाने तदेतद्यतः ।
पूर्वं काननजातयाऽभिरमितो रुद्रः स्वया लीलया
भूयोऽकाननजातया रमयितुं प्रायः प्रवृत्तः कलौ ॥ ३३९ ॥

गंगाधर इति । गंगाधरो रामदासस्य ज्येष्ठभ्राता । श्रेष्ठ इति **रामीरामदास** इति च ख्यातः, शिवश्च । सूर्यः रामदासस्य पिता **सूर्याजीपंत** इति, रविश्च । खरस्य खलस्य शोभनेन लक्ष्मणेन चिन्हेनार्बुदाख्येन च । ' भाळीं अबाळू असे ' इति रामदासस्य वर्णने प्रसिद्धं ॥ ३३६ ॥

हनूमता सहाभेदं स्तौति । **ध्वस्तेति** । यथा हनूमान् । **अशोकवनं** रावणस्य । **अक्षः** एतन्नामा रावणसुतः । सती रुक् रुचिः प्रीतिस्तया फलेषु आवासो वासना यस्य । सीतासंदेशेन । कल्याणस्य यच्छिवं कल्याणं तादृशं रामपदं । ' मंगलानां च मंगलम् ' इत्युक्तेः । तत्र सोल्लासं । अन्यत्र महाशोकस्तदेव वनं । अक्षाणि इंद्रियाणि । संत उत्तमा द्रुमा यत्र तादृशश्चाफलाख्यो ग्रामस्तत्र वसतिः । कल्याणः शिवश्च तयोः शिष्ययोः पदे रक्षणे ॥ ३३७ ॥

श्रीराम इति । ' नास्ति क्रोधसमो रिपुः ' इति लक्ष्मणं प्रति राम आह । तस्मात्कोपयुक्तेन न भवितव्यमिति चेद्रामदासो भव । ततस्तया स्याः । यो हि रामदासः सोऽकोपयुक्त एव । **अक्का**नाम्नी काचिच्छिष्यभावं गता तया उप समीपे युक्त इति प्रसिद्धं ॥ ३३८ ॥

श्रीराम इति । यथा माता बालकं प्रति भावाभावरूपेण लालयति । रे वत्स, अद्यैतत्तुभ्यं दत्तं, परं श्वो नास्ति, परश्वो दातास्मीति । **अक्का**नाम्न्याः पिता **रुद्र**नामा देशलेखक आसीत् । रामेण कानने जाता रावणवधाविरूपा लीला तया **रुद्रः** शिवः अभिरमितः । कलौ तु अकाननजातया **रुद्रं रमयितुं** प्रवृत्त इव । **अकाया** आननं मुखं तस्माज्जातया अभंगपद्यरूपया ॥ ३३९ ॥

अकामतात्युत्तमेति कृत्वा चोदिष्यते त्वया ।
श्रीरामदासशरणं व्रज तत्रास्त्यकामता ॥ ३४० ॥
आपूर्य स्वमुखेन कर्णविवरं वेणुं करांभोरुहे
कृत्वा वादयता पुरा भगवता साधुव्रजस्यार्पितः ।
मोहो मंजुरवेण हंत स पुनर्दासेन तु ध्वंसितो
जानीमस्तदतीव साधु चरितं दासस्य देवादपि ॥ ३४१ ॥
रामाकाशनृपालसंमितशके संवत्सरे दुर्मतौ
माघे मासि शनेर्दिनेऽथ चरमे पक्षे नवम्यां तिथौ ।
हित्वा दासपदं स सज्जनशिरोभूषामणिः स्वात्मना
शिष्टः केवलमर्धघस्रसमये श्रीरामदासो गुरुः ॥ ३४२ ॥
यस्त्यक्त्वा तृणवच्छ्रियं स्त्रियमपि श्रीरामदासोऽभवत्
सोऽयं षोडशशून्यपूर्वकतया लीनोऽधिरामं भवेत् ।
इत्थं दर्शयितुं शकाब्दगणनासंस्थामुखेनास्थितो
रामाकाशनृपालसंमितशके श्रीरामदासो लयम् ॥ ३४३ ॥

अकामतेति । निष्कामता परमश्रेष्ठेति कृत्वा वांछसि चेच्छ्रीरामदासो यः शरणं रक्षिता तं प्रति व्रज । तत्र अकामता वर्तते । श्रीरामदासस्य शरणं मठं व्रज । तत्र अकामता मान्याऽस्ति ॥ ३४० ॥

आपूर्येति । पुरा भगवता वेणुं करे कृत्वा मुखेन कर्णविवरं तच्छिद्रमापूर्य तज्जन्यमंजुरवेण साधूनां व्रजो गोकुलं तस्य मोह उत्पादितः । दासेन तु **वेणुं** हस्ते धृत्वा तत्कर्णं स्वमुखेनापूर्य मंत्रोपदेशं कृत्वा तद्द्वारेण रामायणादिप्राकृतग्रंथरचनया साधुसमूहस्य मोहो ध्वंसित इति । वेणूनाम्नी काचित्स्त्री शिष्यत्वेनागताऽभूत् । तत्कृतरामायणमतीव रामणीयकशालि ॥ ३४१ ॥

श्रीरामदासस्य प्रयाणोत्सवं वर्णयति । **रामेति** । रामास्त्रयः . आकाशं शून्यं । नृपाः षोडश । एवं च ' अंकानां वामतो गतिः ' इति शालिवाहनशकः षुत्तरषोडशशती लब्धा (शके १६०३) । तत्र दासपदं हित्वा स्वात्मना शिष्टो राम एवाभवदिति । सज्जनेषु श्रेष्ठः । **सज्जन**नामदुर्गस्य भूषणं । **परळी**दुर्गस्य **सज्जन** इति नामांतरं ॥ ३४२ ॥

उक्तसंख्यशक एव कुतः प्रयाणमित्यत्र हेतुमाह । **यस्त्यक्त्वेति** । यः श्रीस्त्रीत्यागपूर्वकं रामदासोऽभूत्तस्य षोडशकलाः, पंचज्ञानेंद्रियाणि, पंचकर्मेंद्रियाणि पंचप्राणाः, चित्तचतुष्टयमेकमिति । एतच्च लिंगमित्युच्यते । तच्छून्यपूर्वकतया तद्भंगपूर्वकं रामे ब्रह्मणि लयः स्यात् । 'इति रामपदेनासौ परं ब्रह्माभिधीयते' इति **ताप**नीय श्रुतेः । तथा च षोडशांकां लिंगबोधकस्तदुपरि शून्यं कृत्वा त्र्यंकाभिहिते रामे लयः । एवं सूचयन्निव स्वयं निदर्शनामभवत् ॥ ३४३ ॥

यः पुंसा मनसा नियम्य सहसा स्वार्थाय पुण्यस्तपो-
योगस्त्वास्थित एनमार्यमहितं संत्यज्य सर्वात्मना ।
त्यागो नैव वरस्तनोरिति जनान्संदर्शयन्कि तपो-
योगे तापसशेखरो निजतनुं श्रीरामदासोऽत्यजत् ॥ ३४४ ॥
आदौ दुर्मतिसंगतिस्त्वसुभृतां प्रायो मनोभ्रंशिका
चेत्तत्रापि भगप्रसंग उदयेत्त्यागस्तनोस्तद्वरः ।
स्थेयं न क्षणमात्रमित्युपदिशन्पक्षेऽतिमे सत्तमो
माघे मासि जगद्गुरुर्निजतनुं श्रीरामदासोऽत्यजत् ॥ ३४५ ॥
अस्मिन्भूवलये विधाय विमलां चंद्रप्रभां कोमलां
कीर्तिं जेतुमितो नरः परपदं यो रामदासो व्रजेत् ।
तत्रैवैष चिरं वसेन्न पुनरागच्छेदिति द्योतयन्
जेतुं मंददिने जनेशपदवीं श्रीरामदासो ययौ ॥ ३४६ ॥
स्नातानां गुरुराजपूर्णकरुणापीयूषधारांबुभिः
श्रीगोविंदपदांबुजस्मृतिसुधास्वादैकनुन्नात्मनाम् ।

माघे प्रयाणे हेतुरित्याह (तुमाह) । यः पुंसेति । यन यस्तपायोग आस्थितस्तेन तत्रै-वावसानं कार्यं न तु तत्परित्यज्य । आरूढपतितत्वदोषस्मरणात् । अतस्तपस्येवावसान-मकरोत् । 'तपा माघेऽथ फाल्गुने' इति कोशात्तपः शब्दो माघवाचकः ॥ ३४४ ॥

दुर्मतिवत्सरकृष्णपक्षाभिप्रायमाह । आदौ दुर्मतीति । आदौ दुर्मतीना विप-यिणा संग एव निंद्यः । भवतु नाम सः । यथा कथंचन पारयामः । परं तत्र भग-प्रसंगः सुरतप्रसंग उत्पन्नश्चेत्तदा देहावसानमेव वरं । नात्यवस्थानं । 'न तथाऽस्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः । योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥ पदाऽपि युवतिं भिक्षुर्न स्पृशेद्दारवीमपि' इति भागवतात् । तथा मम दुर्मतिस्तन्नामसंवत्स-रसंगोऽभूत् । पुनस्तत्र भगप्रसंगः फाल्गुनप्रसंगः समीप उत्पन्नः । अतो मया देहस्त्यक्त इति निदर्शनं लोकसंग्रहार्थं । 'कार्तिकादिषु संयोगे कृत्तिकादि द्वयं द्वयं । अंत्योपांत्यौ पंचमश्च त्रिधं मासत्रयं स्मृतम्' इति सूर्यसिद्धांतोक्तेर्नक्षत्राणां मासव्यपदेशत्वात् । भगः पूर्वाफल्गुनी तद्युक्तो मासः फाल्गुनः । लक्षणा 'अर्शआद्यच्' (अर्श आदिभ्योऽच्) वा ॥ ३४५ ॥

मंदवारप्रयाणहेतुमाह । अस्मिन्निति । 'मंदवारगमने पुनरावृत्तिर्न' इति क्वाचि-त्कज्योतिःशास्त्रं मनसि कृत्वेत्यर्थ: । यो रामदासः परं पदं जेतुं गतः स तत्र चिरं तिष्ठतु न पुनरागच्छेदिति सूचयितुं मंददिने शनावगमत् ॥ ३४६ ॥

पुनश्च कृष्णपक्षावसानहेतुमाह । स्नातानामिति । गुरुकरुणापीयूषधाराणां सं-स्था स्थितिः । शुक (क्ल) पक्षे आसुरभावेन स्यात् । किं तु कृष्णपक्षे दैवभावे ।

संस्था नैव च शुक्लपक्ष उदयेदेवं जनान्सूचयन्
संस्थामाप स कृष्णपक्ष इव नः श्रीरामदासो गुरुः ॥ ३४७ ॥

पुण्यादी मधुशुक्लपक्षनवमी श्रीरामजन्मोत्सवै-
र्दासस्याप्यथ तेन ता त्रिजहमुस्ताः कृष्णपक्षस्थिताः ।
ता एनं शरणं गता इव सतां प्राणप्रयाणोत्सवैः
कारुण्यात्तपसि स्थितां व्यरचयत्पुण्यां शरण्याग्रणीः ॥ ३४८॥

पूर्वाह्णोऽवभृथोत्सवेन भवता संभाव्यतामीदृशं
देवैर्धैरभियाच्यते स्म पितृभिः स्वीयो पराह्णस्त्विति ।
तत्रासावुभयानुरोधवशतस्तत्संधि मध्यंदिनं
किं संभावयति स्म मानुषहितः श्रीरामदासो गुरुः ॥ ३४९ ॥

किं युक्त्या प्रतिपादयामि बहुधा श्रीरामदासः सतां
नाथोऽवातरदेपरामयशसः ख्यात्यै हनूमानिति ।
आख्यैवास्य यतः समस्तजनताश्रोत्रातिथित्वं गता
चेत्सावत्प्रभवत्यभेदधिषणा श्रीमन्मरुत्सूनुना ॥ ३५० ॥

गुरुर्देशिको, बृहस्पतिश्च । शुक्रो दैत्यगुरुः, पूर्वः पक्षश्च । रलयोरभेदात् । कृष्णो विष्णुर्वर्गश्च । नत्ववद्यः । सस्था स्थितिर्मरणं च ॥ ३४७ ॥

नवम्यां प्रयाणे हेतुमाह । पुण्यादात्रिति । चैत्रशुक्लनवमी रामजन्मोत्सवेनादौ पुण्याऽभूत् । पुनरस्य दासस्य जन्मनापि । रामदासस्य जन्माप्यस्यामेव तिथाविति वदंति । तेन कारणेन अतीव महत्यभूत् । ततश्च राजात्याद्यावत्यः शुक्लपक्षस्था नवम्यस्ताः सर्वा गह्लफुल्लं कृष्णपक्षीया नवमीर्जहसुर्न भवत्योऽस्मादृश्य इति । ततश्च ताः सर्वा एनं शरणागता इवाभवन् । अनेनोक्तं ' पुण्यं विना न हि भवंति समीहितार्थाः ' इति तपस्तप्यतामिति । तत्र काचित्तपोयोगं कृतवती । तामयमवदत्त्वां प्रति जन्मोत्सवेन कृतार्थाविष्यामि । परं मम पुनर्जन्माभावः । अतः प्रयाणोत्सवेन भवतीं संभाव्य पुण्यां करिष्यामीति । तदैव तां पुण्यतिथिं कृतवानिति ॥ ३४८ ॥

मध्यंदिनहेतुमाह । पूर्वाण्ह इति । पूर्वाण्हो वै देवानामपराण्हः पितृणां, मध्यंदिनं मनुष्याणामिति । तैस्तैः स्वस्वकालपुण्यत्वायाभ्यर्थितः सन्सर्वेषामपि प्रियाय मध्यंदिनमंगीचकार । तत्र त्रयाणामपि संबंधोऽस्तीति । अवभृथः मरणं । ' यन्मरणं तदवभृथः ' इति श्रुतेः ॥ ३४९ ॥

श्रीरामदासो हनु (नू) मदवतारत्वात्स एवेत्याह । किं युक्त्येति । अस्य अभिधा नाम रामदास इति । सैव हनुमानयमिति बोधयति । तदर्थमुक्तिप्रपंचक्लेशो न कार्य इति ॥ ३५० ॥

गद्यं। दुस्तरतरसंसारसागरपरपारदस्य, साक्षात्पारदस्येवशारदशशधरगौरवपुषो, गौरवपुषः सिंहसंहननस्याशेषतमस्तोमनिस्तोदननिपुणैर्द्वादशभिर्भैरिवोर्ध्वतिलकैरलंकृतस्य, तीव्रतरतपःप्रभावात्संभूय स्वयमयत्नोपनता अणिमाद्यनेकासिद्धीरेताः खलु भगवद्विभूतय इति शिरसा श्लाघं श्लाघं निबध्य निहिता इवातिपिंगटा विशंकटा जटा बिभ्राणस्य, विधातृकरविलिखितमहाभाग्याक्षरपंक्तिवल्ल्या उदयमानेन फलेनेव लघुनार्बुदेन घटमानललाटपट्टस्य, जातमात्र एवैष श्रुत्यंतदर्शीति दर्शयद्भ्यामाकर्णविशालाभ्यां नयनाभ्यां विराजमानस्य, श्रीमद्रामप्रभुनामधेयसंकीर्तननिगूढरागेणैवोष्ठपटेन विनटमानस्य, कलिमहिमगलितजीवनीयगुणमात्मानमनवरतानिःसरन्नामपीयूषशीकरैराप्याययितुमिव मुखमभितः प्ररूढश्मश्रुमिषेण समाश्रितौषधिजालस्य, अनेन निगीर्णमिव त्रैगुण्यमिति सूचयता रेखात्रयेण विलसत्कंठस्य, एष साक्षाद्भगवतो रामस्य दास इत्यस्माकं दासस्य भूमंडलविसृत्वरामपि कीर्तिं महिम्नापसारयति न कश्चिदिति शंकाकुलतया महता चिंताभरेण शुष्काभिर्मणीभूय कतिपयीभिरुपकंठं लुठंतीभिः कतिपयीभिश्चास्मद्दासकीर्तिः स्वीयकीर्तेः सखी करणीयेति रहस्यवार्दं कर्तुमिव लाघवसमाश्रयेण श्रुत्यंतं लग्नाभिस्तुलसीभिरुपशोभमानस्य, दीनजनकारुण्यकंदलस्यांकुरायमाणैरिव लोमभिः परिचितवक्षःपीठस्य, पुरा किल त्रेतायामसंमानितया यया साम्राज्यच्युतिरभवदिति द्वापरे मथुरायां भगवता वासुदेवेनादावेव कृतपरिग्रहायां यस्यां सद्यः स्वसाम्राज्यसिद्धिरपादीति निपुणतरदर्शनेन स्वसाम्राज्यसिद्धय इव कराब्जादत्त (त्त) कुब्जापरिग्रहस्य, एतस्य खल्विन्द्रियगणो मुष्टिगत इव वशीभूत इति द्योतयंत्याक्षमालयाभिलक्षितस्य, सकौपीनः सकौपीन इत्यंतर्गर्भिताशया 'कौपीनवंतः खलु भाग्यवंतः' इति श्रीमदाचार्यभणितिं स्वस्मिन्प्रवर्तमानाभ्यां स्वामी-

गद्येन तं नमति। दुस्तरेति। गौरवं पुष्णातीति तस्य। सिंहसंहननः स्वंगः। यथोक्तलक्षणावयव इत्यर्थः। तमस्तोमोऽन्धकारः, अज्ञानं च। श्लाघं श्लाघं श्लाघयित्वेति णमुलंतं। विशंकटा विशालाः। अर्बुदं 'अवाळूं' इति लोके। श्रुत्यंतदर्शी वेदांतावलोचकः। राग प्रेमा, रक्तिमा च। अस्माकं दासस्य तुलसीदासस्य। उपकंठं समीपे, कंठसन्निधौ च। राघवो रामः, लघुत्वं च। रलयोरभेदः। श्रुत्यंतं वेदांतं, कर्णसामीप्यं च। स्वसाम्राज्यं ब्रह्मसाम्राज्यं, राज्यं च। रामावतारे कुब्जा मंथरानाम्नी, कृष्णावतारे कंसदासी कुब्जानाम्नी, कुब्जा यष्टिविशेषः 'कुबडी' इति। अक्षमाला स्मरणी, इंद्रियमाला च। यः सकौपीनः स कौ

समर्थशब्दाभ्यां समर्थयितुमिव कौपीनं परिदधानस्य, समाश्रितानां मनोरथान्सर्वथा पूरयामि परमन्यत्र ज्ञानादिति तादृक्कौशलीं शिक्षितुमिवोपसदनसंपत्तये तपसा शुष्कीकृतवपुषा पृच्छतो महाराष्ट्रान् श्रीरामदासचरणे किमपि न परिक्षीणामिति चट चट चटेति जल्पितेनोत्तरयतेव हरिचंदनेन पादुकाभिश्च समुपासितपादयुगुलस्य, सर्वांगीणामरविंदाक्षकृपाकटाक्षपातप्रभामिव शीतार्तिभंजिनीमानीलपाटलां मेखलां उभयपार्श्वे (मेखलाद्वयपर्दी) वसानस्य, ब्रह्मानंदोद्गारानिव जय रघुवीर जय रघुवीरेति मुहुर्वाक्यान्युदाहरतो, ब्रह्मविद्भिरक्तभक्तसार्वभौमस्य, श्रीरामदासस्य गुरोश्चरणसरोजयोः पंतविठ्ठलविरचितानंतप्रणतयः संततमुल्लसंतु ॥ १ ॥

कहाया सफळ मनुजजनि अवलंबुनि रामदासता राहे ।
श्रीरामदास होता या या जनिं (नि) चाफळावगम आहे ॥३५१॥
बोधस्य यत्नं त्यज राघवस्य दासो भव त्वं यत एष बोधः ।
न दासपृष्ठं त्यजतीति गुह्यं प्रबोधयन्भाति स दासबोधः ॥ ३५२॥
शूरकुलालंकारं विबुधास्यारतपदाब्जद्वितयम् ।

पृथिव्यां पानः समुद्रः । आचार्याः शंकराचार्याः, धर्मप्रवक्तारश्च । स्वामी ऐश्वर्यवान् । समर्थः शक्तश्च । एतस्य लोके 'स्वामीसमर्थ' इति संज्ञा प्रसिद्धा । आचार्योक्तधर्मः एतदाज्ञावर्तितश्च प्रचरति नान्यथेत्यर्थः । कल्पवृक्षो हि ज्ञानवर्जं सर्वं भोगजातं ददाति । तादृक्कौशलं ज्ञानप्रदानकौशलं । अतो कल्पवृक्ष न(ग)वता एवं तपसा वपुः संशोष्य रामदासपदयुगं समाश्रितं तर्हि तत्र किमस्ति चेति पृच्छतो महाराष्ट्रजनान्स्तदीयभाषया चट चट चट इति उत्तरयतेवेति । 'चट' इति सर्वनाम महाराष्ट्रेषु प्रसिद्धं । चट चटचटेति पादुकाशब्दानुकरणं च । सर्वांगीणा सर्वांगव्यापिनी । शीतार्तिः जाड्यदुःखं शीतपीडा च । आनीलपाटला 'हुर्मुजी' इति लोके ॥ १ ॥

कहायेति । मनुजजनि नृजन्म । रामदासता रामदासत्वं । या जनिचा अस्य जन्मनः । फलावगमः साफल्यं । या जनिं अत्र जने । चाफळावगमः 'चाफळ' नामकग्रामप्राप्तिः ॥ ३५१ ॥

तत्कृतं दासबोधाख्यग्रंथं वक्तुमाह । बोधस्येति । बोधो ज्ञानं । दासस्य पृष्ठं न त्यजति । दासस्य पदपीठासीनं तत्र तथाप्यनुपृष्ठगम एव । 'दासबोध' इति शब्दे दासस्य पश्चाद्भागे बोधः स्पष्ट एव दृश्यते इति ॥ ३५२ ॥

रंगनाथनामानं भक्तं वर्णयति । शूरेति । स च सर्वदा कंचुकोष्णीषखड्गधनुर्बाणादिशूरवेषेण वर्तते स्म । रंगनाथः कृष्णः, अयं च । शूरकुलं यादवकुलं तस्य भूषण, शूरकुलयोग्यभूषणयुक्तश्च । विबुधैर्देवैरास्येन मुखेनार्चितं पदं यस्य, ज्ञानी च

निगडीकृतसंस्थानं कविनाथं रंगनाथमवलम्बे ॥ १५३ ॥
यस्य मनोहरनामा हरिः सहायो नरस्य नीलांगः।
अरिवर्गं विजितवतो द्रुतसद्गतयेऽस्य को नु विवदेत ॥ १५४ ॥
गंगा तत्र सरस्वती च यमुना तत्रैव चैत्यादिना
प्रोक्ता श्रीधरकीर्तनस्य मुनिभिर्निःशेषतीर्थात्मता।
लोकप्रत्ययगामिनी तु विहिता सा ते (नै) न धन्यात्मना
नैके यत्कृतकीर्तने गतिमगुर्यद्ब्रह्मरक्षोगणाः ॥ १५५ ॥
साधोः श्रीरंगनाथस्यायतनं चरणे हरेः।
इति ज्ञापयितुं गंगा यतः स्रवति नित्यशः ॥ १५६ ॥
आनंदं यदि संततं स्पृहयसे कुर्यास्त्वमेकं सखे
याहि श्रीरघुनाथपादयुगलीमन्यद्वृथा मा कृथाः।

आत्या नाम तस्य भ्राता तेनाराधितं च। निगडमस्यास्तीति निगडी। निगडीकृतं संस्थानं मरणं येन, निगडी नामा ग्रामस्तत्र संस्थानं यस्य। को ब्रह्मा, विर्गंवद्रस्तयोर्नाथः, कवीनां ज्ञानिना नाथश्च ॥ १५३ ॥

यस्येति। मनोहरनामा श्यामलो हरिर्यस्य सहायः। जितकामादिरिपोस्तस्य द्रुतं सद्गतिर्न स्यादित्यत्र को विवादं कुर्यान्नकोऽपीति। यथा यस्य रंगनाथस्य मनोहरसंज्ञकः नीलः हरिरश्वः सहाय आसीत्। तेन भाग्यनगराद्यामचतुष्टयेन वटग्राममागच्छतो मध्ये चौरैर्निरुद्धस्ताञ्जित्वा शीघ्रमागच्छदिति। 'रंगनाथः निगडीग्रामान्निर्गत्य केशवस्वामिनो दर्शनार्थं भाग्यनगरं गच्छन्मध्ये वटग्रामे वसतिं चकार। तत्र जयरामस्वामिनाभ्यर्थितं। भवंतस्तु दूरं गच्छंति। श्रीगुरुचरणानां पुण्यतिथौ कीर्तनार्थमागमनं भवितव्य। तदवश्यमित्यंगीकृत्य गतः। तत्र तु कीर्तनसमारंभवशात्पुण्यतिथिदिनस्मरणं नासीत्। तत्र दिने यदा संध्योपासने देशकालसंकीर्तनं कृतं तदा स्मरण जातं। अथ तदात्व एव निर्गत्य यामचतुष्टयेन वटग्राममागतः' इत्याख्यायिकामाचक्षते ॥ १५४ ॥

गंगेति। यत्कृतहरिकीर्तने ब्रह्मराक्षसा गतिमाप्नुवंति स्मेति प्रसिद्धं ॥१५५॥

साधोरिति। यस्य समाध्याद्यायतनाद्भागीरथी स्रवतीति कथयंति तदुक्तं। एतस्य हरेः पद एव आयतनं। तत्र तात्पर्यमेवेति। यदाचायं शिवाजीराजेनाहूतो मार्गेऽश्वेनागच्छन्नभूत्तदा निगडीग्रामेऽश्वपदं प्रवाहजले निमग्नं। तं कशाया ताडितोऽपि नोद्धृतवान्। तदा चायमवदद्यद्याह अत्रैवास्माकमायतनमिति। ततः पदमुद्धृतमिति। हरेरश्वस्य पदे ॥ १५६ ॥

आनंदमूर्तिं वर्णयति। आनंदमिति। रघुनाथपादयुगुले आनंदो मूर्तिमानास्त इति नालंबनांतरप्रमाणानपेक्षं। स्वतः प्रमाणमित्यर्थः। ब्रह्म वेदः। न किं दर्शयति।

यामासाद्य समूर्तिमान्स्वयमयं वर्वर्त्यहो सर्वदे-
त्यैवं दर्शयति स्फुटं न हि जनं किं ब्रह्मनालंवनम् ॥ ३५७ ॥

भाग्याभिधाननगरे सुरदर्शनार्थं
गच्छन्यया किमपि नर्मपरैस्तुरुष्कैः।
कृष्टोऽपि पूर्वमपि दर्शयति स्म सद्यः
स्वान्वर्थभावमवतात्स हि केशवोऽस्मान् ॥ ३५८ ॥

जलाशयं स्वेन पुरा प्रविश्य संहारकृत्पत्तनमेत्य सद्यः।
चकार शांतस्य गुरोरभीष्टं कृष्णं वितृष्णं तमहं प्रपद्ये ॥३५९॥

गद्यम् । अदूरयोपेतुं भांडीरकोपनामान्वयं वटग्रामं समासाद्य कामं सह वयस्यैः क्रीडायां स्वपृष्ठमारूढं मामवरोहणसीमामतीत्यातिलंबितं लंबमानस्य प्रलंबस्य प्राणनिर्वापणेन परिश्रान्तमश्रांतं सखिआनंदमूर्तेर्गुरवो रघुनाथचरणाः। तत्सन्निधिमासाद्य मूर्तिमानानंदः। आनंदमूर्तिरित्यर्थः। आस्ते इति। वनरूपं न तु निवासरूपं। ब्रह्मनालं नाम ग्रामः कथयति। ब्रह्मनालं वने रघुनाथायतने समीपे आनंदमूर्त्यायतनं प्रसिद्धं ॥ ३५७ ॥

केशवस्वामिनं वर्णयति। भाग्येति। अत्रेयमाख्यायिका—' केशवो हि पूर्वं यवनकार्यपुरुष आसीत्। अथ केनचित्कारणेन विरक्तोऽभूत्। तस्य कदाचिद्भाग्यनगरे देवदर्शनार्थं गच्छतः केनचिद्यवनेन पूर्वपरिचितेन नर्मणा पश्चादेत्य तूर्ष्णीं शिखां धृत्वा स्थितं। यावत्स्वामी अग्रतो जगाम तावती शिखा वृद्धा। तदद्भुतं दृष्ट्वा यवनैरपराधः क्षमापितः ' इति। स्वान्वर्थभावः केशवभावः। प्रशस्ताः केशा यस्य स केशवः। ' केशाद्वोऽन्यतरस्याम् ' इति व्याकरणसूत्रं ॥ ३५८ ॥

कृष्णाप्पानामानं जयरामस्वामिगुरुं वर्णयति । जलाशयमिति । अत्रेयमाख्यायिका—'महादेवगिरिशिखरे शांतो नाम जंगमः सिद्धोऽवात्सीत्। तच्छिष्यः कृष्णाप्पा। शांतेन स्वदेहावसानसमये उक्तं मया काश्यां ऋणं कृतमस्ति। तदिदानीं निर्याप्य मयि जीवति मे ऋणपत्रमानेतव्यमिति। तदानीं कृष्णाप्पा महाप्रसाद इत्युक्त्वा तत्रत्यजलाशये द्रविणं गृहीत्वा निमज्ज्य काश्यां मणिकर्णिकाघट्टे उन्मग्नः। अथ ऋणनिर्यातनं कृत्वा पत्रं गृहीत्वा तदात्व एव पुनस्तेनैव पथाऽऽगत इति '। संहारकृत् शिवः, स च। कृष्णः कृष्ण एव। यथा कृष्णो जलाशयं समुद्रं प्रविश्य संहारकर्तुर्यमस्य पत्तनं गत्वा गुरोः सांदीपनेरभीष्टं मृतपुत्रानयनरूपं चकारेति ॥ ३५९ ॥

(गद्यव्याख्या)। पुरा श्रीकृष्णो रामादिभिः सह वृंदावने भांडीरवटाधः क्रीडमभूत्। तत्र प्रलंबासुरः शिशुरूपेण तत्र प्रविश्य क्रीडायां रामं स्वपृष्ठमारूढं जिघांसया दूरमनैषीत्। तज्ज्ञात्वा बलभद्रेण स हतः। तच्छ्रमश्रांतं रामं श्रीकृष्णः

भिः समं भूरिशः परिचरतोऽस्य परमेश्वरस्यैतस्याप्रिममपि अभ्यास्यंतम- सांप्रतमिति स एष इहैव तादृक् परिचर्यं एवं विचार्य तत्कामो रामः प्रतीक्षमाणोऽभूत्। तावत् कलाववतरंतं सारव्वटग्रामं समाश्रयंतं प्रलंबासुरसंपद्विधमनेन परिश्रमवन्तं भगवन्तं श्रीकृष्णं समालोच्य त्रेतायां दशग्रीवरूपेण द्वापरेऽपि शिशुपालरूपेण च श्रीमच्चरणद्वेषमेवार्जितवन्तं स्वमंडलीस्थं चैनं जयं 'मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ' इत्यूचिवान्भगवान्पुनरप्यासुर्यामेव योन्यां न कञ्चित्क्षिपतीति शंकमानस्तस्मिन्प्रसादचिकारयिषया तं जयं पुरस्कृत्यैव निरंतरं यः परिचचार तमाप्तकामं जयरामं दीनानुकूरंतमनंतं (महांतं) सन्तं प्रति संप्रति पंतविठ्ठलकृतानंतनतयः संततमुल्लसन्तु ॥ २ ॥

त्रिलोकीसाम्राज्यं तृणमिव यदग्रे स्फुरति तत्
पदं यत्संबंधात्परमनुभवंत्यत्र विबुधाः।
न यत्र स्थेमानं कलयति कदाचिन्मदलवः
स कोऽप्यस्मिंल्लोके गुरुरमृतराजो विजयते ॥ ३६० ॥
यन्मूनं समजीजनत्सुमधुरं सारस्वतो मां रसः
श्लाघंते स्पृहयंति हंत विबुधा मामेव नैनं क्वचित्।'

परिचचार । तद्बलरामो न समीचीनमिति मत्वा क्वचिदपि स्वयमेव चिरं कृष्णः परिचर्य इति कलौ कृष्णरूपेणावतरन्रामः परिचचारेव । जयेन शापवशेन त्रेताद्वापरयो रावणशिशुपालरूपेण हरिद्वेष एव कृतः । तेनानिष्टं प्रसज्येतेति स्वमंडलस्य तं जयं पुरस्कृत्य परिचचारेव। वटग्रामः बहुशिफासंकुलत्वेन एकोऽपि सन्ननेकवटप्रायत्वेनासीदिति ग्रामव्यपदेशः। अन्यत्र बडगांव इति । अदूरं गोपुंजोऽस्य । अन्यत्र गोपुंजनामको ग्रामो यत्समीपेऽस्ति । भांडीरकेत्युपनाम्नः आश्रयभूतं । भांडीरकमिति उपनाम यस्य तत्कुलस्याश्रयभूतं। वटग्रामे एतदुपनामकमेकं कुलं चिरवासि प्रवर्तत । प्रलंबस्य यासुरसंपदानुकल्पकोऽशक्यं, प्रलंबा महती आसुरसंपत्तिश्च । विधमनं नाशः। जयं पुरस्कृत्य वर्तमानो रामो जयरामो भवतीति ॥ २ ॥

अमृतराजाख्यं भक्तं वर्णयति । त्रिलोकीति । अमृतसंबंधाद्विबुधा देवाः स्वर्गसाम्राज्यमनुभवंति । किं च तदमृतं मादकमतएव तुच्छं । अयं तु अमृतराजः । यत्संबंधाद्विबुधाः संतः तत्पदं ब्रह्मपदमनुभवंति । यदग्रे त्रिलोकीराज्यं तृणवद्भाति । किं च यत्र मदलवोऽपि नास्तीति । अमी च मम गुरोः परात्परगुरुगुरवः॥३६०॥

यन्मूनामिति । अहं सारस्वतात्सामुद्राद्वाग्जलादुत्पन्नं तन्मामेव विबुधा आ-

तत्कुर्यामहमीदृशं मदधिकं सारस्वतं तं रसं
आचंतो स्पृहयंस्वितीह (व) धरणी तेनामृतेनोषितम् ॥२६१॥
शिरस्थितामृतकरो ज्ञानानंददयास्पदम् ।
समर्पितशिवानंदः सिद्धराजो विराजते ॥ २६२ ॥
शिवेन शिरसा वंद्यः कलानाथस्तमोऽपहा ।
जगदाल्हादयन्नास्ते रामश्चंद्र इवापरः ॥ २६३ ॥
त्रिश्रुतिस्थं त्रिदृक्स्थं च तथैवैकरसज्ञता ।
नृमात्रे सहजं स्वेतद्रामे कृत्रिममप्यदः ॥ २६४ ॥
पुरैव सिद्धेशकृतप्रसादो घनोदयाद्यस्य महाप्रकाशः ।
यज्ज्योत्स्नयाख्यं श्रुतिपद्धतिस्थं नष्टं स रामो विधुरद्वितीयः ॥२६५॥

म्रियंते न तु मम जनकमित्ययुक्तमिति मत्वेतःपरं सारस्वतं रसमेव यथा मदधिकं आचंतो तथा कुर्यामिति किमत्रावतीर्णमिति । यस्य सारस्वतो वाग्भवो रसः कविताख्पः अमृतादप्यातिस्वादुरिति तात्पर्यं ॥ २६१ ॥

सिद्धराजं वर्णयति । शिर इति । शिरसि स्थितोऽमृतकरश्चंद्रो यस्य । आनंदो दया च तदास्पदं । समर्पितः शिवयोरुमामहेश्वरयोः आनंदो येन । सिद्धराजो गणेशः । अन्यत्र अमृतराजेन यस्य शिरसि हस्तः कृतः तच्छिष्य इति । अमृतराजेनैनं बहु शिक्षयित्वा स्वगुरूणां ज्ञानानंदाख्यानां निकटे काश्यां प्रेषितः। तत्र तेभ्योऽपि दया संपादिताऽभवत् । शिवाख्यः करवीराधिपो राजा छात्रीभूतस्तस्मै आनंददः । एते च मम परात्परगुरवः ॥ २६२ ॥

श्रीरामचंद्रपंडितं स्तौति । शिवेनेति । चंद्रपक्षे स्पष्टं । गुरुपुत्रत्वाद्यः शिवाख्येन राज्ञा शिरसा वंद्यः । चतुःषष्टिकलानिपुणः किमेतावदेव न । तमसोऽज्ञानस्य नाशकः । ज्ञानदातेत्यर्थः ॥ २६३ ॥

त्रिश्रुतिस्थमिति । ऋग्यजुरूपवेदत्रयघनाताध्ययनवान् । ज्ञानं शास्त्रीयं, विज्ञानमनुभव इति दृग्द्वयवान् । शाब्दे परे च निष्णातमित्यर्थः । एकरसं ब्रह्मरसमनुभवति सदा । अन्यत्स्पष्टं ॥ २६४ ॥

पुरैवेति । चंद्रविलक्षणत्वमाह । चंद्रस्य आदौ शापो दत्तः, पश्चात्सिद्धेशेन गणेशेनानुगृहीतः । अयं तु पूर्वमेव । चंद्रो हि घनपटलेन हतप्रभः । अयं तु घनेन अष्टविकृतिमध्ये चरमो विकारस्तेन प्रकाशमानः । चंद्रस्य ज्योत्स्नया नेत्रगतं तमो नश्यति । एतत्कृतज्योत्स्नया एतन्नामकेन प्रातिशाख्यसूत्रैकजातीयसंदर्भरूपग्रंथेन । श्रुतिपद्धतिस्थं वेदपाठविषयकमौढ्यं, कर्णपद्धतिस्थं च । एते च मम परमगुरवः । एतैः श्रीचरणैः स्वप्न आगत्य मम गुरुचरणाः श्रीरामोपासनादीक्षादानेन कृतार्थीकृता इति ॥ २६५ ॥

शेषो लक्ष्मण एव वै मदनुजो भूत्वाऽप्यशेषात्मना
निर्व्याजं यदसेवतास्मि कृपणो स्वर्णस्य निर्यातने।
तत्कार्यं स्वयमेतदीयचरितं श्रीराम इत्यादृतः
कृत्वा राममिमं स्वयं तदनुजो भूत्वाऽनुकर्त्ताऽभवत् ॥ १६६ ॥
ध्यानेनात्मगतं स्त्रीत्वं गतं बाह्यं विरागतः।
क्रयेन माधवीभूता राधा तन्न तयोर्भिदा ॥ १६७ ॥
वक्तुं वयं न शक्ताः स्मो राधायाः प्रेमगौरवम्।
यदस्या माधवाद्भेदो न स्याकारं विनेतरः ॥ १६८ ॥
सा रंगामायमना राधा स्त्रीशतद्विधा प्रतीपा चेत्।
स्यादेवानर्थकृते केशव इति लालसो बभूवास्याम् ॥ १६९ ॥
श्रीकंठादपि पद्मजादपि महालक्ष्म्या अपि ज्येष्ठतो-
ऽपीष्टोऽभून्न हि केवलं भगवतः किंत्वात्मनोऽप्युद्धवः।
तद्धेतुः प्रतिभाति मेऽस्य कृतिनः कालत्रयाबाधिता
देवेऽपि व्यभिचारिणी क्वचिदहो यैकांतसत्त्वात्मता ॥ १७० ॥

बलरामं वर्णयति। शेष इति। रामेण चिंतितं अयं शेषोऽप्यशेषात्मना मां सेवते स्म। तस्य ऋणापकरणे नान्य उपायस्तादृशाकरणमंतरेणेति कृष्णावतारे तं रामं कृत्वा स्वयमनुजो भूत्वा तं सेवते स्मेति ॥ १६६ ॥

राधां वर्णयति। ध्यानेनेति। स्वाभाविकं स्त्रीत्वं ध्यानदार्ढ्येन, बाह्यं लज्जादिकं वैराग्येण गतं। स्त्रीत्वे गते 'राध' इति जातं। यश्च राधः स माधव एवेति तयोर्भेदो न। 'वैशाखे माधवो राधः' इत्युभयोरेकार्थत्वेनाभेदात् ॥ १६७ ॥

वक्तुमिति। स्याकारटाप् ॥ १६८ ॥

सा रंगेति। सा राधा। रंगे सुरतरंगेऽमायं निष्कपटं मनो यस्याः। ननु-अनतिलावण्यगुणोत्तमनायकलाभे तादृशी भवेदवेति चेन्न। स्त्रीशतविधा स्त्रीणां शतवद्द्विधा प्रकारो यस्याः। एकतः स्त्रीशतं एकत इयमिति लावण्यगुणाधिका। इयं प्रतीपा प्रतिकूला चेन्ममानर्थाय स्यात्। एतस्या वैपरीत्ये 'धावितशस्त्री धारा नाम। यमागारं सा' इति जायते। तत्र धाविता सद्यःशाणोत्तीढा या शस्त्री खड्गस्तस्या धारा नाम किं यमस्य अगारं गृहं सा। मरणाय स्यादिति भावः। स्वयं तां प्रति विपरीतश्चेत् 'वशक' इति भवति नाम। वशा एव वशकः। अनर्थाय न भवति प्रत्युत हितायैवेति ॥ १६९ ॥

उद्धवं वर्णयति। श्रीकंठादपीति। सत्त्वात्मकस्य हरेः सत्त्वशीलता प्रिया। शिवे तामसत्वं। ब्रह्मणि राजसत्वं। श्रियां चंचलत्वाद्राजसत्वं। बले उभयमिश्रत्वं। आत्मनोऽपि सत्त्वात्मता क्वचिद्व्यभिचरत्येव। परमस्य क्वचिदपि न व्यभिचरितेति प्रियत्वे हेतुः ॥ १७० ॥

यस्योपसर्गः क्व च नास्ति लोके सदा समाकारतया स्थितो यः ।
स उद्धवो माधव एव साक्षादित्थं कथं प्राज्ञजनैर्न वाच्यम् ॥३७१॥
अर्जुनेन विभेद्यंते दुर्भेदा अपि भूभृतः ।
कृपामाहात्म्यमेतद्धि मन्ये भगवतो हरेः ॥ ३७२ ॥
दैवाधीनमिहान्यूनं नूनमर्जुनवैभवम् ।
देव एवात एवायं श्रितो वासवसूनुना ॥ ३७३ ॥
समये शरवर्षाणां श्रीदेवस्य प्रसादतः ।
हरितत्वस्य लाभोऽभूदर्जुनस्येति सांप्रतम् ॥ ३७४ ॥
स्वयं सहजतेजस्वी यद्यप्येष धनंजयः ।
तथाप्यसौ स्फुरद्धेतिरहिप्रियसहायतः ॥ ३७५ ॥
सर्वपार्थप्रियतमा नीलोत्पलदलप्रभा ।
भिद्यते कृष्णतः कृष्णा स्त्र्याकारेणैव नान्यथा ॥ ३७६ ॥
स्वधर्मपरिनिष्ठया य इह तीव्रया सादरं
पुमानभिपुनक्ति चेद्धृतनरानुकंपे हरौ ।
सुदर्शनकरो हरिर्भवति तं प्रति श्रीपति-
र्निदर्शनकृतेऽत्र नः स्मरणमेति देवव्रतः ॥ ३७७ ॥

यस्येति । उपसर्गः उपद्रवः । उद्धव इत्यस्य उपसर्गः 'उत' नास्ति चेत् 'धवः' इति जातं । स समाकारतया माकारयुक्तत्वेन 'माधव' एव भवति ॥३७१॥

अर्जुनं वर्णयति । अर्जुनेनेति । अर्जुनः पार्थस्तृणं च । भूभृतः राजानः, पर्वताश्च ॥ ३७२ ॥

देवाधीनमिति । देवः कृष्णः, पर्जन्यश्च । अर्जुनः पार्थस्तृणं च ॥ ३७३ ॥

समयेति । शराः बाणाः, उदकानि च । श्रीदेवः कृष्णः, पर्जन्यश्च । हरितत्वं भगवतस्तत्वं, गीताभिरुपदिष्टं हरितवर्णत्वं च । अर्जुनः पार्थस्तृणं च ॥ ३७४ ॥

स्वयमिति । धनंजयः पार्थः । स्फुरंतो हेतय आयुधानि यस्य, ज्वालाश्च । अहिप्रियः शेषशायी कृष्णः, सर्पप्रियो वायुश्च ॥ ३७५ ॥

सर्वेति । स्त्र्याकारष्टाप् ॥ ३७६ ॥

भीष्मं वर्णयति । स्वधर्मेति । नरोऽर्जुनः, मानवश्च । सुदर्शनं चक्रं, सुष्ठु दर्शनं च । यद्यपि भगवता समरसीम्नि पतितं रथचक्रं धृतं न सुदर्शनं तथापि तदपि तत्प्रायमेवेति ॥ ३७७ ॥

अनेकधातुश्रेष्ठस्य गांगेयस्य लयो विना- ।
धनंजयप्रसंगेन दिव्यभावोत्तरः कुतः ॥ १७८ ॥
यः कृष्णेन महाप्रसादसुमुखीभूतेन तूत्पादितः
कृष्णेनैव सहोषितो भगवता कृष्णेन चाति स्मृतः ।
तत्त्वं कृष्णसखेन यस्य गदितं यः कृष्णकृष्णाप्रुवः
सोऽयं कृष्णमयः कथं न विदुरो वाच्यः सतां संसदि ॥ १७९ ॥
न भुंक्ते स्वाद्वन्नं विविधमपि मंदस्य भगवा-
नथो भुंक्ते फल्गुण्युदितरुचि तच्छान्त्युपहृतम् ।
खलप्रत्तं यत्ताद्विषमिव परित्यज्य विदुरो-
ऽटजे गत्वाऽभुंक्त स्वयमहह जोन्नालकणिकाः ॥ १८० ॥
लोकेषु हंहो मम सोदरं तत्पद्मं बभूव श्रिय आसनाय ।
तत्पुंडरीकेण तदीर्ष्यया किं स्थानं रमेशो गमितः किमेषः ॥१८१॥
भित्तिं कापि वदत्यभित्तिमपरेत्येवं द्विधाऽपि श्रुति-
स्तत्रादौ तु भित्यभाव उचितः श्रीशंकरार्योग्रिभिः ।

अनेकेति । अनेकधा श्रेष्ठस्य गांगेयस्य भीष्मस्य लयो मृत्युर्धनंजयस्य पार्थस्य प्रसंगेन । दिव्यभावो वसुता उत्तरा यत्र । अनेकेषु धातुषु श्रेष्ठं गांगेयं हेम तस्य लयो विलीनता अग्निप्रसंगेन । दिव्यभावो निर्मलता उत्तरा यत्र ॥ १७८ ॥

विदुरं वर्णयति । य इति । कृष्णेन वेदव्यासेन, कृष्णेन अर्जुनेन, कृष्णसखेन उद्धवेन, मैत्रेयेण च । स हि व्याससखः सतीर्थ्यत्वात्भगवता निर्वाणसमये यस्य स्मरणं कृतं ॥ १७९ ॥

न भुंक्त इति । जोन्नाला यावनाल्याः ॥ १८० ॥

पुंडरीकं वर्णयति । लोकेष्विति । पुंडरीकः, सिताभोजं च । तेन विचारः कृतः । मम सहोदरं पद्मं श्रिय आसनाय बभूव । श्रीस्तत्रास्ते । इतीर्ष्यया श्रियः पतिः स्थानं गमित इव ॥ १८१ ॥

भित्तिमिति। कापि श्रुतिर्जीवेशयोर्भेदमाह । कौशिकोपनिषदीति । 'भिन्नोऽचिन्त्यः परमो जीवसंघातपूर्णः परो जीवसंघो ह्यपूर्णः। यतस्त्वसौ नित्यमुक्तोऽयं च बद्धस्तस्मान्मोक्षं तत एवाभिवाञ्छेत् ' इत्यादिका । अपरा अभित्तिमैक्यमाह तत्रैव । ' स्वनिम्नमापो हि परः स्वतंत्रस्तस्मादसौ मोच्यते नित्यमुक्तः। स एव जीवोऽविद्यपाबंधमेति तन्नाशे तु ब्रह्म संपद्यतेऽतः ॥ मिथ्याभेदो ब्रह्मभावस्तु सत्यस्तस्माद्विद्वान्न प्रमाद्येत सत्यात् 'इति । तत्राभेदं श्रीशंकराचार्या उचितत्वेन मेनिरे । श्रीमध्वाचार्यास्तु भेदमुचितत्वेन मेनिरे । अत्र कारणं । शंकराचार्यास्तु आकाशलिंगादुत्पन्नास्तैः सर्वत ईक्षिते भित्तिः कापि नास्तीति दृष्टं । मध्वाचार्यास्तु म-

भित्तिः सर्वत ईक्षणे पुनरिति श्रीमठ्ठपादैरिहा-
दौ साकाशजता तु हेतुरपरे सा मठ्यगेहोत्थता ॥ ३८२ ॥

नित्यानिमेषचक्षुः सत्पक्षसमाश्रयेण मत्स्येंद्रः ।
विहरति वनेकवृत्तिर्विमलयितुं सर्वतो भुवनम् ॥ ३८३ ॥

लोकोत्तरानुकंपी अनपार्यविभूतिरचितगोरक्षः ।
मत्स्येंद्रो न विरक्तं कं कं कुरुते स्वकाक्षपातेन ॥ ३८४ ॥

भुवने विचरन्ननिशं शंखं जित्वैव सर्वशो निगमम् ।
गोरक्षाय समददादुपहितशृंगोऽत्र मत्स्येंद्रः ॥ ३८५ ॥

ठ्यगेहनामभट्टाद्धुत्पन्नास्तैरादौ सर्वत ईक्षितं तावत्परितो भित्तिरेवेति मठ्यगेहस्य-त्वात् । शंकराचार्याणां पिता कचित्तीर्थयात्रां कर्तुं गतवान् । पश्चात्तन्मात्राऽऽका-शलिंगसेवा स्थिरं कृता । कदाचित्तस्य महोत्सवे सर्वजनेषु पश्यत्सु आकाशलिंगा-त्तेजो निर्गत्य तस्या मुखे प्रविष्टं । तेन सा गर्भवती अभवत् । अथ महाजनैस्त-दैवकृत्यमिति मात्वा न जुगुप्सा कृता । ते शंकराचार्या इति तत्प्रबंधे स्थितं॥३८२॥

मत्स्येंद्रनाथं वर्णयति । नित्येति । निमेषरहितज्ञानः, अनिमेषनेत्रश्च । सत्प-क्षः साधुपक्षः, सत्पतत्रश्च । मत्स्येंद्रः, मीनश्रेष्ठश्च । वनं विपिनं, जलं च । भुवनं जगत्, जलं च । मत्स्यानां स्थित्या जलं विमलं भवति ॥ ३८३ ॥

लोकेति । अतिशयितकरुणः । अनपार्याऽमोघा या भूतिर्भस्म तेन रचि-त उत्पादितः गोरक्षो येन । 'येन कस्यैचित्पुत्रार्थिन्यै विभूतिर्दत्ता । इमां भक्षय तव पुत्रः स्यादिति । तया गृहीत्वाऽनंतरं भीता सती तामुत्करे तत्याज । वर्षेषु गतेषु मत्स्येंद्र आगत्य पृष्टवान् पुत्रः क्वास्ति । तयोक्तं मया भस्म न भक्षितं तर्हि त्यक्तं । क्व । उत्करे । दर्शय । दर्शितं । तेनाहूतं । तावद्बहिर्यातः पुत्रः । तं गोरक्ष-नाम्ना चकार ' इति समाख्यायिका । स मत्स्येंद्रः स्वस्य यः काक्षः कटाक्षस्तस्य पातेन कं कं विरक्तं न कुरुते अपि तु यो यो मिलितस्तं तं सर्वं । मत्स्येंद्रो विराटः । लोके, इतरे स्वपुत्रे कृपालुः । पार्यरहिताऽनार्या । सा न अनपार्या । महती संपत्तिस्तया रचिता गवां रक्षा यस्य । स्वको यः अक्षः पाशः तेन कंकं धर्मराजं विगतरक्तं न करोति स्मेति किं ॥ ३८४ ॥

भुवनेति । यथा मत्स्यावतारो हरिर्भुवने जले विचरन् शंखासुरं जित्वा वेदं गीर्वाण्या रक्षकाय ब्रह्मणे दत्तवान् । तस्य च शृंगमभूत् । तथायं भुवने ज-गति निगमं सर्वं जित्वा मथित्वा सां सुखं गोरक्षायाददात् । वादनार्थं गृहीतं शृंगं येन ॥ ३८५ ॥

अथ नाथपथं तात कथं कथयितुं क्षमे।
मूर्ता यत्रोपलभ्यंते निवृत्तिज्ञानमुक्तयः ॥ ३८६ ॥
यदि ज्ञानं च मुक्तिं च लब्धुमिच्छस्यपत्नतः।
निःसीमप्रेमभरितो निवृत्तिं नित्यमाश्रय ॥ ३८७ ॥
यद्विलासवशादात्मवस्तु नैव प्रकाशते।
अलंदीपो विनाशाय तमसस्तस्य केवलम् ॥ ३८८ ॥
सर्वथा सेवकं नामदेवं यः समुपादिशत्।
ब्रह्मात्मभावं विदितो गुरुः स इह खेचरः ॥ ३८९ ॥
सिषेविरे हृषीकेशं संतो नाम सहस्रशः।
सेवकत्वं परं नामदेव एव व्यवस्थितम् ॥ ३९० ॥
यस्य नाम्नः पराख्यातिः सदा सर्वत्र राजते।
सत्यं ब्रवीमि लोकेऽत्र सदामोदरसंगतः ॥ ३९१ ॥
श्रीरमारमणप्रेमा यत्र स्थेमानमास्थितः।
अतिधन्या सतां मान्या सैव नाम जनी मता ॥ ३९२ ॥
लौकिकजनेषु साधुषु दिविषत्स्वपि समनुवर्तते यस्य।

नाथपथं वर्णयति। अथेति। नाथ आदिनाथः शिवः। निवृत्तिर्निवृत्तिनाथश्च। ज्ञानं, ज्ञानदेवश्च। मुक्तिर्मुक्तिनाथा च ॥ ३८६ ॥

निवृत्तिनाथं वर्णयति। यदीति। निवृत्तिं वैराग्यमाश्रितस्य क्रमेण ज्ञानमुक्ती भवतः। निवृत्तिनाथस्याश्रये कृते तत्र ते स्यातामेवेति ॥ ३८७ ॥

ज्ञानदेवं वर्णयति। यद्विति। दीपस्तमसो नाशाय अलं समर्थः। अलंदी एतन्नाम ग्रामं पाति सोऽलंदीपो ज्ञानदेवः। तत्र हि तदायतनं ॥ ३८८ ॥

नामदेवगुरुं विसोबाखेचरं वर्णयति। सर्वथेति। नामदेवो हि केवलं भृत्यभावं गतः श्रीपांडुरंगं सिषेवे। तदा तेन खेचरानुसरणं कुर्विति संदिष्टस्तं शरणं गतस्तेन ज्ञानोपदेशेन सर्वत्रात्मभावं गमितः। वेवं इंद्र। खेचरो गुरुर्बृहस्पतिः। खेचरोऽयं ज्ञानदेवशिष्य इति वदंति ॥ ३८९ ॥

नामदेवं वर्णयति। सिषेविर इति। अत्रैव सेवकत्वं दृष्टं। सीव्यतीति सेवकः सिंपोलकः। 'शिंपीति' लोके ॥ ३९० ॥

यस्येति। यः सर्वत्र गीयते। सदामोदरसंगतः। यद्वा। सदा मोदरसं ब्रह्मानंदरसं गतः। दामेति नामदेवस्य पिता तदुदरात्संगतश्च ॥ ३९१ ॥

जनीं वर्णयति। श्रीति। यत्र जन्यां जन्मनि भगवति प्रेमा सा नाम जनी अतिधन्या। नाम्नः नामदेवस्य जनीनामिका दासी च ॥ ३९२ ॥

सावताख्यं वर्णयति। लौकिकेति। उत्तमपुण्ययुक्ता जने। प्रेत्य देवेषु तस-

उत्तमसुमनस्तासी माल्यकृत्सावताह्वयो जयति ॥ १९३ ॥
नन्वर्पितः परस्मिन्माधवदासस्य सर्व एवार्थः ।
अतिसारे तत्पटकान्कथमिव भगवान् स्वयं न धावयत्॥१९४॥
विध्वस्तसमस्तोमो जयति द्विजराज एष आत्रेयः ।
श्रितसज्जनैकनाथो जनार्दनो यस्य वंशेऽभूत् ॥ १९५ ॥
युक्तायुक्ततया किमप्यगणयन् जागर्त्यहो सर्वथा
सत्संकल्पसमर्थनाय भगवान् विन्यस्तपर्यस्तिकः ।
यस्माद्यस्य जनार्दनो घनरसं यच्छुस्त्विति ध्यातवान्
दत्तस्तावदिहोदवोढधमपि स्कंधे दधार स्वयम् ॥ १९६ ॥
पाच्यं चेद्विदुषा हरेर्भगवतो भक्ताय पाच्यं यतो
नित्यं ते ददते दयार्द्रहृदयाः स्वाम्येकनाथो यथा ।

मदेवता। साधुषु उत्तमसाधुता च ॥ १९३ ॥

माधवदासं वर्णयति । नन्विति । येन यो योऽर्थः संपादितः स सर्वोपि भगवतेऽर्पितः । येन गृहीतस्तेनैव तस्य सर्वं कार्यं करणीयमतएव हरिस्तस्यातिसारे पटकान्स्वयं धावयति स्म । युक्तं चैतत् । माधवदासपदयोरर्थः । सर्वः परस्मिन्नन्यपदार्थेऽर्पितः। न तत्पुरुषवदुत्तरपदे ' राजाश्व ' वत् । नाव्ययीभाववत्पूर्वपदे ' उपकुंभादौ ' । अन्यपदार्थेऽर्पमाणत्वाद्बहुव्रीहिरयं । तेन 'माधवः दासो यस्य' इत्येवार्थः । न तु 'माधवस्य दासः' इति तत्पुरुषः । दासभूतो माधवस्तत्करोतीति युक्तमेव ॥ १९४ ॥

दत्तपंथं वर्णयति । विध्वस्तेति ।तमः अज्ञानं, तामिस्रं च । द्विजराजो विप्रेंद्रश्चंद्रश्च । आत्रेयः अत्रिकुलोत्पन्नो दत्तः। चंद्रोऽपि तादृश एव। वंशो द्विधा। विद्यया, जन्मना च ।यस्य विद्यावंशे जनार्दनः जनार्दनस्वामी अभूत् । स कथं। श्रितः सज्जन एकनाथ एतन्नामा शिष्यः। यस्य चंद्रस्य जन्मवंशे जनार्दनः कृष्णोऽभवत् । श्रिता ये सज्जनास्तेषामेकनाथः॥ १९५ ॥

एकनाथस्वामिनं वर्णयति । युक्तेति । भगवान् सद्भिः कृतं संकल्पं सर्वथा समर्पयितुं जागर्ति। यस्मादयं ज्ञानपात्रं दृष्ट्वा दत्तचरणैरुक्तं। अस्य जनार्दनो घनरसं यच्छतु । तदा भगवता मनस्यानीतं । मया घनरसो ब्रह्मरसो देय उदकदानं च कर्तव्यं तत्रैव दत्तवाक्यस्य सर्वथा समर्पणं स्यान्नान्यथेति। एकेन जनार्दनरूपेण ब्रह्मरसं दत्त्वाऽपरेणोदकं दातुं स्कंधे वोढधं बभारेवेति । उदवोढधं ' पाणकावड ' इति देशभाषायां । पर्यस्तिका पर्यंकः॥ १९६ ॥

पाच्यमिति । यादि पाच्यं तर्हि भगवद्भक्तायैव पाच्यं । यतस्तेऽपिनित्यं ददते । यतः एकनाथः गाऊबानाम्नः शिशोर्जिह्वायै दद वसन्नपि ब्रह्मभागावे

प्रादादुत्तमपूरणं विबुलसो गाऊबनाम्ना शिरो-
जिह्नायै निवसन्निहान्यथ परब्रह्मप्रपन्नोऽपि सन् ॥ २९७ ॥
श्रीविश्वंभरलीलयोगो मुक्तेशभूतिर्मतनुते।
या हि महाभारतरणसमुद्यमे प्राकृतान्सतृष्णयति ॥ २९८ ॥
भाषंते विबुधाः सुधामधुरिमोद्गारं विधत्ते सुधा
स्फारं मुग्धकुमारवागिति पुनः सा नैव किंचिद्वयम्।
आपन्नाऽस्ति चिराय यत्पुनरियं मुक्ताऽथ मुक्ताधिपा-
दुक्ता पर्वचतुष्टयी मधुरतां तस्याः किमु ब्रूमहे ॥ २९९ ॥

(ब्रह्मभावं गतोऽपि) सन्नुत्तमपूरणं ददौ। अत्रेयमाख्यायिका 'प्रतिष्ठाननगरे काचि-त्पाकक्रियया स्वनिर्वाहकर्त्री योषिदासीत्। तस्याः कश्चिच्छिशुरुन्मत्त इवाभवत्। कदाचित्तया स्वेन साकं पाकार्थं यत्र गतवती तत्र स नीतः। तेन च तत्र पूरणं भक्षितं। तदाप्रभृति स पूरणं विना नैवाभुंक्त। माता त्रस्ता सती नाथसमीपे गत्वा प्रार्थितवती महाराजायं पूरणं विना न भुंक्ते। मया प्रत्यहं पूरणं कुत आनेतव्यं। श्रीमद्गृहे श्रीह-रिनैवेद्यार्थं प्रत्यहं तदस्त्येवायं भगवत्प्रसादं भुंजानोऽत्र निवसतु। नाथेनोक्तं तथेति। तस्मै प्रत्यहं उत्तमपूरणं दातव्यं। स तद्भुक्त्वा सर्वदा भगवद्गुणानुवादं कुर्वन्नासीत्। तेन तस्य गाऊबा इति नामाभवत्। अथ नाथैर्देहावसानसमये शिष्यान्प्रत्युक्तं मया भावार्थरामायणं सुंदरकांडांतं कृतं। अवशिष्टं कः पूरयिष्यतीति। शिष्यै-रुक्तं नास्माकं तादृशी शक्तिः। अथ गाऊबामाहूयोक्तं त्वमवशिष्टरामायणं पूरयेति। तेनोक्तं महाप्रसाद इति। तथा चक्रे च' इति। तथा च जीवदशायां उत्तमपू-रणं दत्तं। पश्चादपि उत्तमस्य रामचरितस्य 'उत्तमं रामचरितम्' इत्युक्तेः पूरणं दत्तमित्यविनश्वरं दानं भगवद्भक्तानां ॥ २९७ ॥

मुक्तेश्वरं वर्णयति। श्रीति। श्रीविश्वंभरस्य हरेर्लीलासंबंधः मुक्तेशस्य नाम्नानु-क्तस्य भूतिं संपत्तिं शमदमादिकां तनुते। या विभूतिः प्राकृताञ्जनान्महाभारतस्य संसाररूपस्य तरणप्रसंगेन सतृष्णान्करोति। तद्विपर्येतिकंच्या भवंतीति यावत्। यद्वा नाथस्य लीला नाम कन्या विश्वंभरभट्टाय दत्तासीत्। ताभ्यां मुक्तेश्वरनामा पुत्रोऽभूत्। भूतिर्जन्म। तेन तु भारतपर्वचतुष्टयी महाराष्ट्रभाषया व्याकृता। प्रा-कृतग्रंथवाचकान्प्रति तस्य भूतिर्महाभारतरणसमुद्यमे वचोगापर्वाणि वाञ्छयति। पर्वचतुष्टयीवदिदं व्याख्यातमभविष्यत्तेत्समीचीनमभविष्यदिति ॥ २९८ ॥

मुक्तेश्वरस्य पर्वचतुष्टयीव्याख्यानरूपं काव्यमतिमधुरमभूदित्यत्र हेतुमाह द्वाभ्यां। भाषंत इति। मुक्तेश्वरो जन्मप्रभृति मूक आसीत्। यदा च नाथप्रसादेनोक्तवानेव पर्वचतुष्टयं व्याख्यातं तन्मधुरतरमभूदिति युक्तं। बाल्यभाषणं तावदमृतमपि तत्तस्य ईषदपि न व्ययमगतं। अतश्चिरसंचितत्वेन माधुर्यभारसंभृतं ॥ २९९ ॥

या नाथेन समर्पिता भगवते पीयूषबुद्ध्या सिता
या चास्वाद्य मुखामृतेन हरिणा संभाव्य दत्ता पुनः ।
न्यस्ता साऽमृतपाणिनास्य रुदतो वक्त्रेऽग वस्सेदृशं
ब्रूहीति प्रभुणैव तस्य बत वाक् स्वाद्वीति किं ब्रूमहे ॥ ४०० ॥
मुक्तस्थितेः पर्वचतुष्कमार्या वदंति सर्वत्र सलोकतादि ।
तामन्यथाऽसौ कथमंग कुर्याद्धुर्या न संतः सदतिक्रमस्य ॥४०१॥
पूर्वं सर्वमयाचमेव हरिणा सख्या सुवर्णेन म-
प्यस्याप्येऽथ कृते सुवर्णमददां जातं किमेतावता ।
चेदास्येऽहमसौ सुवर्णरहितोऽप्यर्थ्यर्थितं तत्पुन-
र्दानं स्यादिति किं तथावतरता धान्यं सुदाम्नार्पितम् ॥ ४०२॥
अभंगकीर्तिग्रामेण तुकारामेण साधुना ।
अजो दशरथो नित्यं परमानंदसंभृतः ॥ ४०३ ॥
शृण्वन्वचांसि स जघन्यतुकोदितान्य-
व्यक्तान्यपि प्रभु (म) दमेति पिता प्रकामम् ।

या नाथेनेति । कदाचिन्नाथचरणानां भगवत्पूजासमये रुदंतं मुक्तेश्वरं कटौ गृहीत्वा श्रीकृष्णः स्थितोऽभूत् । नाथेन भगवते खंडशर्करानैवेद्यमुपहृत्यामृतभावनया निवेदि ।। भगवता च तां स्वीकृत्य स्वमुखामृतेन भावयित्वा प्रसादीकृता । अरे कृष्ण शिशुरयं रोदिति तदस्मा एतां चारयेति निवेदिता तां श्रीकृष्णः स्वेनामृतपाणिना यन्मुखे न्यस्येदृशं मधुरं ब्रूहीति वरमदात्ततस्य वाक् स्वाद्वीति किं वक्तव्यं ॥ ४०० ॥

मुक्तेश्वरेण पर्वचतुष्टयमेव कुतो व्याख्यातमित्यत्र हेतुमाह । **मुक्तेति** । मुक्तस्थितेः ' सलोकता, सरूपता, समीपता, सायुज्यता ' इति पर्वचतुष्कमेवोक्तमार्यैस्तदन्यथा कथं कार्यमिति । मम कृते. पर्वचतुष्टयमेव विषयः । यतो महदतिक्रमो न युक्त इति ॥ ४०१ ॥

दामाजीपंतं वर्णयति । **पूर्वेति** । ' सु ' वर्णरहितो यः सुदामा स एव दामा । तादृशोऽवतीर्य यत्सकाशे ददत्त ॥ ४०२ ॥

तुकारामं वर्णयति । **अभंगेति** । अभगरूपा (एतत्कृतपद्यविशेषनाम) याः कीर्तयस्तद्ग्रामेण दश रदा देहा यस्य दशावताराः । अजो विष्णुः । अजो दशरथश्च । साधुना तुकाऽपत्यरूपेण रामेण । अभगा याः कीर्तयस्तद्ग्रामेण । तुकू अपत्यं ॥ ४०३ ॥

शृण्वन्निति । तुकारामस्य अभंगरूपाणि वचांसि हरये प्रतिप्रियाणीति युक्तं । प्राकृतः पिता जघन्येन चरमेण तुकाऽपत्येन उक्तानि अव्यक्तान्यपि शृण्वत्सु-

तैः शास्त्रगर्भभरितैः किमभंगरूपै-
र्युक्तं द्रवीभवति विश्वगुरुस्तदेषः ॥ ४०४ ॥
रक्षार्थान्यजनार्पितैर्ननु धनैर्नित्यं द्विजाना यदि
स्यात्संतर्पणमेष विसपतिना गम्यो व्ययो न क्वचित्।
तद्योगेन हरेः प्रसाद उदितः प्राज्ञप्रकृष्टो यत-
श्चात्मप्रत्यय उद्भवेदिह तुकारामं स्मरामो वयम् ॥ ४०५ ॥

ष्टो भवति। तानि चेच्छास्त्रप्रमेयभरितानि निर्बाधानि च तर्हि तुष्येदिति किं वाच्यं। अयं विश्वगुरोः जघन्यं चतुर्थं शूद्ररूपमपत्यं स तादृशं वदति तस्मा-द्द्रवीभावो युक्तः ॥ ४०४ ॥

रक्षेति। अत्रेयमाख्यायिका। कश्चित्कृषीवलस्तुकारामं प्राह। रे मम प्रवास उप-स्थितः। क्षेत्रं च पक्वसस्यं। तदिह त्वमत्र पक्षिणो रक्ष मम पुनरागमपर्यंतमिति। तथेत्यंगीचकार। गते क्षेत्रस्वामिनि तुकारामस्तत्क्षेत्रमंडपिकायामुपविश्य भगव-न्नामसंकीर्तनपरोऽभूत। प्रातस्तावत्पक्षिणो मिलिताः। तदानीमनेन विचारितं। क्षेत्रिणादिष्टं पक्षिणो रक्षेति। यद्यहमेतान्दूरमुत्सारयामि तदेतद्रक्षणं कथं स्यादि-ति। तदेते कामं भक्षयंतु। तैर्भक्षितुमारब्धेऽधिकाधिकाः पक्षिणः संभवंति स्मेति। एवं क्षेत्रिण आगमनपर्यंतं सर्वं क्षेत्रं निःसस्यमभूत्। स च तद्दृष्ट्वा तुकाराममूचे। अरे मंद किमिदं कृतं। अनेनोक्तं यत्त्वयोपदिष्टं पक्षिरक्षणं तन्मया कृतं। हैं हैं अतिधूर्तोऽसि तच्चल ग्रामाधीशसकाशमिति प्रसह्य नीतः। ग्रामाधीशेन पृष्टं अरे किमिदं मात्रचरितं। तुकारामेणोक्तं यथैतेनादिष्टं तथाचरितमिति। तद्दौर्थ्यमालो-च्यायं दंडनीय इत्याह सः। तुका०—अहो मया सस्यं नाशितमित्युच्यते। आस्तां नामेद। यद्यहमेनादृक् नाकरिष्यं नर्हि कथं धान्यममास्यत्पादिति ब्रूहि। कृषी०—एतावा-न्मम धान्यराशिर्भविष्यः। तुका०— मर्दय तावद्यदि एतन्न्यूनस्तर्हि दंडमर्हामि। अथ धान्यं मर्दितं तावदुक्तमानाद्द्विगुणो धान्यराशिरभूत्। तद्दृष्ट्वा ग्रामाधीशो विस्मयमापन्नः। अस्ति महानयं सिद्ध इति कृषीवलमुवाच। अरे यावत्त्वयोक्तं तावद्धान्यं गृहीत्वा शेषमेतस्मै प्रयच्छ। ततस्तद्धान्यं तुकारामाय दातुं प्रवृत्तः। तेनोक्तं नानेन मम किंचित्कार्यं मया श्रीपांडुरंगमंदिरमारब्धं तदेतद्व्ययेन समाप-नीयमिति। अथ ग्रामाधीशेन हरेः प्रसादस्तद्धान्यव्ययेन निर्मितोऽभूदिति। द्विजा ब्राह्मणाः, पक्षिणश्च। यतः प्राज्ञेषु विद्वत्सु प्रकृष्टः प्रसिद्ध आत्मप्रत्ययः स्व-रूपसाक्षात्कारः भवेत् हरेः प्रसादोऽनुग्रहः। प्रज्ञादिशब्देभ्यः प्रकृत आत्मप्रत्ययः स्वार्थे प्रत्ययः ' अणूरूपः '। यतः प्रसादात्स प्रासादो भवति। प्रसाद एव प्रासाद इति। ' प्रज्ञादिभ्योऽण् ' इति व्याकरणं ॥ ४०५ ॥

गोरससेवी साधुव्रजतोषकरो यशोदयायुक्तः ।
आनंदसुतो हरिणा सम इत्याकारतः परं भेदः ॥ ४०६ ॥
अरणिसमुद्भूतो यो गोरससेवी परिस्फुरत्कांतिः ।
आनंदसुतोऽग्निसमो भेदस्तु परं नरानरत्वेन ॥ ४०७ ॥
प्रकटितचारुहरिगुणं मंजुमधुरवचसमरणिसंभूतम् ।
तं कृष्णलेखकंठं शुकमहमानंदनंदनं वंदे ॥ ४०८ ॥
तंत्रीज्ञानसुनिपुणः सुश्रुतचरकांतानिष्ठितप्रज्ञः ।
नवरसनिबंधचतुरो वैद्य इवानंदनंदनो जयति ॥ ४०९ ॥
यः काव्यं किल सर्वदानवमहामोदप्रदं तं रसा-
हरया शास्त्रविशारदो विरसयांचक्रे पुरा वामनः ।
सोऽयं जातमहाप्रसादवितितिर्भूयो रसाऽधानतः
काव्यं भव्यतमं द्विजेंद्रतिलकः प्रोल्लासयामास किम् ॥ ४१० ॥

आनंदतनयं वर्णयति । **गोरसेति** । गोरसो वाणीरसः । साधुव्रजः सतां संघः, साधु गोकुलं च । यशः दया च ताभ्यां यशोदयाभ्यां, **यशोदा**नाम्न्या गोप्या च । आकारतः । हरेश्चिन्मयो विग्रहः । अस्य तु पाचभौतिकः, आकारेण च । अयमानंदसुतः स तु नंदसुत इति ॥ ४०६ ॥

अरणीति । अरणौ समुद्भूतः । **अरणि**स्तन्निवासग्रामः । काष्ठमयः श्रौतपात्रविशेषः येनाग्निर्मथ्यते सोऽप्यरणिः । गोरसः वाग्रसः, घृतं च । कांतिः प्रभा, कांत्याद्युपकाव्यगुणश्च । अयं नरः, अग्निस्तु अनरः देवः, अनलश्च ॥ ४०७ ॥

प्रकटितेति । प्रकटिता हरेश्चारवो गुणा येन । मंजु मधुरवचनं स्पष्टं । अरणिनामकग्रामसंभूतं । कृष्णो योलेखः देवः स कंठे यस्य । तन्नामजापीत्यर्थः । शुको व्यासपुत्रः । तत्पक्षे । अरणेः संभूतं । 'अग्निमथनसमये घृताचीरारणेर्व्यासस्याप्सरोदर्शनेन रेतः अरणौ पतितं तस्माज्जातः शुकः' इति भारते । अन्यत्समानं । कीरपक्षे । हरिर्हरितरूपो गुणः । अरणिकर्न यो वृक्षः पिप्पलस्तत्र जातः । पिप्पलकुहरसंभूतः कीरो हि सम्यक् वदतीति लोके प्रसिद्धिः । कृष्णलेखा कंठे यस्य ॥ ४०८ ॥

तंत्रीति । तंत्र्यो वीणागुणाः । तंत्रीवादने निपुणः, नाडीज्ञाने च । उत्तमशास्त्रचर्यो । कांता रम्या । निष्ठिता भगवत्परायणा । प्रज्ञा मतिर्यस्य । **सुश्रुत चरक**नामके आयुर्वेदसंहिते । तदंते निष्ठिता प्रज्ञा यस्य च । नवाः रसाः शृंगारादयः, रसायनानि च ॥ ४०९ ॥

वामनस्वामिनं वर्णयति । **य इति** । पूर्वं वामनो रसाया भूमेराहरणं कृत्वा काव्यं शुक्रं विरसं कृतवान् । सर्वदानवानां मोदप्रदं । स एव कलौ तत्र जातप्रसाद इव रसाऽऽधानेन काव्यमुल्लासयांचक्रे किं । काव्यं सरसं कृतवानित्यर्थः । सर्वदा नवमोदप्रद ॥ ४१० ॥

स्वबोधयुक्तिकौशल्यं वामनस्य महाद्भुतम्।
गिरेरपि समुद्भूता येन चिद्घनता कृतम् ॥ ४११ ॥
वामनस्य गिरीशस्य चैकमत्यं तु सर्वथा।
इत्याह वामनो भूत्वा स्वयमेव निदर्शनम् ॥ ४१२ ॥
इह मुख्यकलोपेतो कोऽभवत्कविनायकः।
इति मीमांस्यमाने तु मयूरेशः स्मरत्यलम् ॥ ४१३ ॥
आर्यार्पितमहानंदः सर्वलोककृतादरः।
विराजते मयूरेशः कलाधरशिरोमणिः ॥ ४१४ ॥
अतिचित्रकलापाढ्यः सदारामपरस्थितिः।
कारिकाजनितानंदो मयूरेशो विराजते ॥ ४१५ ॥
श्रीकालिदासकविकीर्तिकलापमुच्चैः
कल्पामहे कथयितुं कथमल्पजल्पाः।

स्वबोधेति। गिरिः एतन्नाम्नी तद्भार्या, गिरिः पर्वतश्च ॥ ४११ ॥

वामनस्येति। विष्णोः शिवस्य च। परमात्मतयाऽभेदो। 'हरिरेव शिवः साक्षाच्छिव एव हरिः स्वयं' इत्यादिवचनजातमैकमत्यभिप्रायमित्याह। यो हि वामनः स गिरीशः गिरेरीश एवेति ॥ ४१२ ॥

मयूरकविं वर्णयति। **इहेति**। कलाभिः काव्यचातुर्यैरुपेतः कविनायकः क इति विचार्यमाणे मयूरेशः स्मृतिविषयो भवति। 'क' स्य लोपमितो गतः कविनायकः विनायको भवति। यश्च विनायकः स मयूरेश एव। 'क'लोपः प्रयत्नत्यागे मानाभावादाद्य एव विवक्षितः ॥ ४१३ ॥

आर्येति। आर्याभिः आर्याधिकारस्थगीतिभिरर्पित आनंदो येन। आर्येभ्यः अर्पित इति वा। आर्या पार्वती च। सर्वलोकै यत्कविना गीयते सर्वत्र पूज्यते च। चतुरः श्रेष्ठः भालचंद्रश्च। मयूरेशः कविर्गणेशश्च ॥ ४१४ ॥

अतिचित्रेति। अतिचित्राणि यस्मिन्सः। समासांतःकप्। स चासौ कलापः काव्यरचनं तेनाढ्यः। बहुतरयमकत्वात्। सदारामपरा स्थितिर्यस्य। रामोपासकत्वात्। बहुविस्तृतग्रंथस्य सारं गृहीत्वाऽल्पग्रंथेन रचनं कारिका। ताभिर्जनित आनंदो येन। भारतभागवतरामायणादिविस्तृतग्रंथा येन गीतिरूपेण अल्पग्रंथेन प्रणीता इति। मयूरेशः कविः॥ बर्हिणःपक्षे। अतिचित्रः यः कलापः बर्हः। सदारामः तत्परा स्थितिर्यस्य। कालिका मेघमाला तया जनित आनंदो यस्य ॥ गणेशपक्षे। आश्विनपौर्णमास्या पूर्णचंद्रः। ततश्चित्रामतिक्रांतः षड्राशिभोगे जाते योऽवशिष्यते स चासौ कलापश्चंद्रस्तेन। सदा यः रामपरः शिवस्तत्र स्थितिर्यस्य। कालिका पार्वती तया जनित आनंदो यस्य ॥ ४१५ ॥

कालिदासं वर्णयति। **श्रीकालिदासेति**। काली तस्या दासः कालिदासः।

काल्या यदी गुरुरिति प्रथितापि लोके
दासेन येन लघुतां गमिता बभूव ॥ ४१६ ॥
कालीच्या लीला जो ऱ्हस्व करी असुनि दास निजलीला ।
कवितेला आगवुनि प्रकटुनि कवि कालिदास निजलीला ॥४१७॥
श्रीकालिदासकविवर्यसरस्वतीयं
किं वर्णयाम्यतितरां रसवाहिनीति ।
यत्कालिका भगवती शुचिभावयोगा-
द्यस्यामहो मुहुरनुग्रहमादधाति ॥ ४१८ ॥
उच्चावचपदार्थानां दर्शिका रसहारिणी ।
भारती भाति भव्यस्य भारवेर्भा रवेरिव ॥ ४१९ ॥
एकं तु नैमिषारण्ये शौनकाद्यैर्महर्षिभिः ।
धृतः पारयितुं सूतो हरिबद्धं मनोरथम् ॥ ४२० ॥

'ङ्यापोः संज्ञाछंदसोर्बहुलम्' इति ऱ्हस्वः । अनेन दासेन सता काल्याः 'ई' श्रीः गुरुरपि लघुतां ऱ्हस्वत्वं प्रापिता । यस्य श्रियोऽग्रे काल्याः श्रीरल्पेति भावः । शब्दतोऽपीदं । कालीशब्दस्य ईकारो दीर्घोऽपि यत्संबंधेन ऱ्हस्वो जातः । कालिदास इति ॥ ४१६ ॥

कालीति । यः कालिदासः काल्या दासोऽपि संस्तत्प्रसादजन्यसामर्थ्येन चिरं निद्रितां कवितां प्रबोध्य निजलीलाः कविताद्वाराः प्रथयित्वा ताभिः काल्या लीला ऱ्हसयामास । काल्या यशसोऽप्यस्य यशः प्रथितमित्यतिशयोक्तिः । कथमिदमनुभवारूढमिति चेत्कालीशब्दगत 'ली' कार ऱ्हस्वयति वा नवेति द्रष्टव्यं । 'कालिदास' इति ॥ ४१७ ॥

श्री कालिदासेति । यतः यस्या कालिदाससरस्वत्या कालिका भगवती शुचिभावयोगेन निर्मलचित्तेन मुहुरनुग्रहं कुरुते । ततः रसवाहिनीति किं वक्तव्यं । शुचिराषाढस्तस्य भाव. सत्ता तद्योगेन कालिकाया मेघपंक्तेरनुग्रहश्चेद्रसवाहित्वं युज्यत इति ॥ ४१८ ॥

भारविं वर्णयति । **उच्चावचेति** । नानाविधपदानामर्थानां च दर्शयित्री । रसं हरते आकर्षयति । तथा रवेर्भा । यथा सापि पदार्थदर्शिका । रस जलं हरति ग्रीष्मे इति प्रसिद्ध ॥ ४१९ ॥

सूतं पुराणवक्तारं वर्णयति । **एकमिति** । सूतः सारथिश्च । हरौ बद्धः यो मनोरथस्तं पारयितुं सफलीकर्तुं । हरिभिरश्वैर्बद्ध मनोरथं शीघ्रगामिनं रथं पारयितुं गमयितुं ॥ ४२० ॥

ज्यायस्तमैस्तु शौनकमुख्यैर्मुनिभिर्वृतोऽभवत्सूतः।
युक्तं पुराणवृत्तिर्बहुदोषभवोपतापशमनाय॥ ४२१॥
पारं भवांबुधेर्गंतुं शौनकाद्यैर्महर्षिभिः।
सूतो वृतोऽभवद्यस्मात्सूतः पारद इष्यते॥ ४२२॥
बद्धाक्षिप्त इति ह्येष निमज्जतु भवांबुधौ।
तच्चित्रं यत्पुनर्दैवाल्लब्धपोतोऽपि मज्जति॥ ४२३॥
यत्तु भगवदपराधस्थितिमत्सदहो जघन्यकर्मरतम्।
तत्र निलयमग्नत्वं युक्तं चित्रं तदन्यत्र॥ ४२४॥
परदाररतिः फलाभिसंधिर्बहुदंभो भगकामना ममत्वम्।
चरितं मुहुरीदृगस्मदीयं कथमपवर्गरसस्य भाजनं स्मः॥४२५॥
कांतं रघुकुलतिलकं सर्वजगत्पालकं विहाय जनः।
अनुसरति नरं कांतं नानाकष्टाश्रयं शिवाशिवायम॥ ४२६॥

ज्यायस्तमैरिति। अतिवृद्धानां प्रायो रोगशान्त्यै कषायचूर्णादीनि नोपयुज्यंते किं तु रसायनमेव युज्यते। तच्च पुराणवृत्ति जीर्णमपेक्ष्यत इति ज्येष्ठतमैस्तैः पुराणवृत्तिः सूत एव वृतः। सूतः पारदः, अन्यः प्रसिद्धः। बहुदोषेभ्यो भवति य उपतापो रोगस्तस्य, बहुदोषो यो भवस्तस्येति च॥ ४२१॥

पारमिति। सूतः प्रसिद्धः, पारदश्च॥ ४२२॥

सत्प्रशंसानतरं प्रसंगादसता चरितं वर्णयति। **बद्धेति**। विधिवत्पाणिगृहीताया भार्यायाः पुत्रोत्पादनात्पूर्वं त्यागो न युक्त इति तया सह गृहधर्ममाचरतु। बद्धाक्षिप्तत्वात्। बवयोरैक्यात् बद्धो निक्षिप्तो निमज्जत्वेव। परं दैवात्पोतं पुत्रं यो लब्धवांस्तेन न मंक्तव्यं। कुतः। पोतस्य नौकाया लाभात्। 'तया व्यवायः प्रमया न रत्या' इति शुकोक्तेः॥ ४२३॥

गृहे निमग्नत्वं स्त्रीणां युक्तं न पुंसामित्याह। **यत्त्विति**। यत्र भगवतोऽपराधे स्थितं तत्प्रोक्तकारित्वाभावात्। किं च निरयकर्मरतं निषिद्धाचरणपरमतः एतादृशस्य निरयमग्नत्वं युक्तं। रलयोरभेदात्। निलयमग्नत्व। भगवत्सदपरस्य अधःस्थितं जघन्य कर्म मैथुनमाचरति तादृशं कलत्र॥ ४२४॥

परेति। परदाररतिः फलाभिसंधिः बहुदंभः भगकामना ममत्वं 'प, फ, ब, भ, म,' इति पवर्गस्यमस्मदीयं चरितं तेन अपवर्गरसस्य भाजनं कथं स्मः॥४२५॥

कांतमिति। यतो जगत्पालकः अतः कांतः रघुतिलक.। स्वाभाविकोऽयं न कृत्रिमः। सर्वजगत्पालक रघुतिलकशब्दौ हि कांतावेव। तं हित्वा नरं कांतं कृत्वानुसरति। नरो हि जीवकोट्यन्तर्गतत्वेनास्वतंत्रत्वात् कांतो न। नास्ति च नरशब्दः ककारांतः। तत्र कृत्रिमं कांतत्वं कृत्वानुसरति। तत्र कृते तु स नरक एव भवति। रामं हित्वा नरानुसरणं नरकानुसरणमेवेति भावः॥ ४२६॥

कोऽयं हंत महामोहग्रस्तचित्तोऽखिलो जनः ।
अर्थस्यार्थे कदर्थः सन्परमार्थं त्यजत्यहो ॥ ४२७ ॥

दानं तपो मख इति त्रितयं पवित्रं नेतुं क्रमादमृतधाम गतिं क्षमं सत् ।
तत्काममदोषककुषं पुरुषा विधाय प्रायः सुरालयगतिं स्पृहयंति हंत ४२८

दानं तपो मख इति त्रितयं पवित्रं स्वानुष्ठितं परमहंसगतिं ददाति ।
तत्काममदोषककुषं पुरुषा विधाय प्रायेण कौशिकगतिं बत कामयंते ४२९

दिव्यागमोदितमहो हरितत्त्वमत्र यो नाभिनंदति जनः कृपणस्तमेनम् ।
वक्तुं त्रपे पशुमपीति तृणोदितं तद्धरत्वस्य पश्य पशवः कियदाद्रियंते ४३०

विठ्ठले निर्विकारेऽस्मिन्विपरीतमतिस्तु यः ।
कोऽसौ केवलमित्येतन्महाराष्ट्रान्विचारय ॥ ४३१ ॥

मत्तः सन्यो हरिं द्वेष्टि माहिषः स हि पूरुषः ।
स नाम नैव कालेनाधिष्ठितः कथमुच्यताम् ॥ ४३२ ॥

यो दानमल्पयः स्वार्थे यश्चाल्पो यश्च कुत्सितः ।
नराधमस्ते नरकास्तत्संगं दूरतस्त्यजेत् ॥ ४३३ ॥

कोऽयमिति । अर्थस्य द्रव्यस्यार्थे परमार्थं त्यजतीति ॥ ४२७ ॥

दानमिति । अमृतधाम मोक्षधाम, पीयूषधाम च । सुरालयः स्वर्गः, मद्य-गृहं च । [सुराणामालयः, सुराया आलयश्च] ॥ ४२८ ॥

दानमिति । परमहंसानां ब्रह्मनिष्ठानां, राजहंसानां च । गतिं पदवीं । कौशिक इंद्रः, घूकश्च ॥ ४२९ ॥

दिव्यागमेति । दिव्यागमाः सच्छास्त्राणि तत्रोदितं, दिव्यागमे कल्पवृक्षे उदितं च । हरितत्त्वं भगवत्तत्त्वं यो नाभिनंदति स पशुरिति वक्तुं लज्जेऽहमिति । यतः पशुस्तृणोदितमपि तृणेषु उदितं हरितत्वं हरितवर्णत्वं आदरेणाभिनंदति तुच्छोदितमपि सोऽभिनंदति ॥ ४३० ॥

विठ्ठलेति । विठ्ठलः पांडुरंगः निर्विकारः शुद्धं ब्रह्म । एवं सति तं यो नायं साक्षात् किं तु कस्यचिज्जनस्य विग्रहोऽयमिति विपरीतमतिं करोति स कः इति चेन्महाराष्ट्राः कथयिष्यंति तान्पृच्छ । विठ्ठल इत्ययं निर्विकारः 'वि' काररहितश्चेत् 'ठ्ठल' इत्युर्वरित तस्य विपरीतस्यनिर्गः स 'लठ्ठ' इति भवति । महाराष्ट्राश्च यो यो ज्ञानशून्यः मूढश्च तं तं प्रति लठ्ठ इति वदंति ॥ ४३१ ॥

मत्त इति । यो हरिं भगवंतं द्वेष्टि, हरिमश्वं च । यो द्वेष्टि स महिष एव । 'गोश्वानां,' 'महिषाश्व,' 'ओतुमूषकम्' इति तयोर्नैसर्गिकवैरत्वात् । माहिषश्चेत्कालेनाधिष्ठित एव । महिषो हि कालवाहनं ॥ ४३२ ॥

यो दान इति । स्वार्थमेव यस्य दानं न परोपकाराय । पाणिनिना हि स्वार्थे अल्पे कुत्सिते चार्थे कप्रत्ययो विहितः । यथा नर एव नरकः । अल्पो नरः नरकः । कुत्सितो नरः नरकः ॥ ४३३ ॥

सुवृत्तदर्शिनां बाह्येऽभ्यंतरे कठिनात्मनाम्।
बहुधान्योपमर्दाय खलानां दृश्यते स्थितिः॥ ४३४॥
अपकारस्य जनका उपकारविलोपकाः।
पुरुषा न ततोऽन्ये तु दृश्यंते कठिना मम॥ ४३५॥
परस्परमतिप्रेमरसेनाश्लिष्टयोर्द्वयोः।
सन्निविश्यांतरं कर्तुं बालिशः पंडितायते॥ ४३६॥
ओषधीशोऽमृतकरः सन्नपींदुः क्षयार्दितः।
न हि प्रतिक्रियासंपत्सिद्धिर्दोषाकरे भवेत्॥ ४३७॥
मा खिद्यस्व यदि खलो बहूपचरितोऽपि नोपकुरुत इति।
गरलमलंकृतमपि किं कथय सखे स्वस्वभावमस्मृजति॥४३८॥
कौटिल्यं शिथिलांतरत्वमपि सद्वृत्तत्वहानिं परं
पातित्यं वितनोति बालिशजनस्येह प्रसंगो नृणाम्।
तादृग्बालिशदूषितस्य न पुनः शर्मप्रदः संस्तवः
प्रत्यक्षं तु न चैव पंकजदृशां वक्षोरुहद्वंद्ववत्॥४३९॥

सुवृत्तेति। यथा खलो धान्यमर्दनस्थानं बाह्यतः सुवृत्तं वर्तुलं दृश्यतेऽभ्यंतरे तु कठिनं। अन्यथा मर्दनासंभवात्। बहूनां धान्यानामुपमर्दाय। खलः दुष्टो बाह्ये सुवृत्तः सद्वृत्तः अंतः क्रूरः। बहुधाऽन्येषामुपमर्दाय॥ ४३४॥

अपकारस्येति। ये पुरुषा उपकारं विलोप्यापकारं जनयंति तदन्ये कठिना न। किं तु त एव कठिनाः। पुरुष इत्यत्र 'उ'कारयुक्त 'प'कारः 'पु' तस्य लोपे 'रुष' इत्यवशिष्टं। तत्र 'अ'कारयुक्त 'प'कारः 'प' तत्र जनिते 'परुष' इति जायते। यः परुषः स कठिन एव॥ ४३५॥

परस्परमिति। द्वयोः स्त्रीपुंसयोरंतरं कर्तुं बालिशः शिशुः पंडितः। उभयोः प्रेमभावात्। तथा सुहृदोरंतरं कर्तुं मूर्खः पंडितः। असत्यकथनादिना॥ ४३६॥

ओषधीश इति। चंद्र ओषधीनां राजा अमृतकरश्च। परं दोषाकरत्वात्क्षयी। तन्मन्यामहे पुण्यकर्म विना औषधं न रोगं प्रतिकरोति॥ ४३७॥

मा खिद्यस्वेति। गरलं अलंकृतं सत्कृतं, 'ल'काररहितं च कृतं 'गर' एवावशिष्यते। यच्च गरं तद्गरलमेव। तथा खलोऽप्यलंकृतः 'ख' इत्यवशिष्यते। यच्च खं तच्छून्यमिति॥ ४३८॥

कौटिल्यमिति। यथा बालिशजनस्य शिशुजनस्य प्रसंगः स्तनयोः कौटिल्यं कोटी अग्रे लग्नः गृहीतः कोटिनौ। तद्भावः कौटिल्यं वृंतचूचुकत्वं। शिथिलात्मता। सद्वृत्तत्वस्य वर्तुलत्वस्य हानिं पतितत्वं च करोति। तादृशयोर्दूषितयोः परिचयः परंपरासंबंधेनापि वस्त्रादिव्यवधानेनापि न सुखदः। प्रत्यक्षं तु नैव। तथा मूर्खप्रसंगः

सदसि चमत्कारकरश्चतुरतरश्चित्रबाणसंधाने ।
कोशधरोऽप्यर्थपरो रसेश्वरो जगति जयति कविराजः ॥४४०॥
मथ्नंतु परमप्रेम्णा सारस्वतरसं मुहुः।
यो मंदरागमथितोऽप्यसूत परमामृतम् ॥ ४४१ ॥
सरस्वती सत्युवती सत्कवीनां च भारती।
प्रयत्नेन गूढरसाः सज्जनानंददायकाः ॥ ४४२ ॥
समलंकृताऽपि बहुधा सुगुणैरनुरंजिताऽपि नोपैति ।
कविना न विनाश्लेषं कविता वनिता च सुरसभरितत्वम् ॥४४३॥
कवयः कुरुत सुकाव्यं नानालंकारसंकुलं तादृक् ।
येन श्रुतेन जात्वपि न भवेत्सहृदयमनस्यलंकारः ॥ ४४४ ॥
न द्विष्मो द्विजराडसाविति धिया दोषाकरोऽप्येष सन्
सोऽयं त्वत्र बुधाय किं च कवये महां जडो द्रुह्यति ।

कुटिलत्व शैथिल्य दुर्वृत्तत्वं पतितत्व च करोति ।तादृशस्य परिचयः परपरासंबधेनापि न सुखदः । कुतस्तरा प्रत्यक्षमिति ॥ ४३९ ॥

अथ **कविनादि** वर्णयति । **सदसीति** । सदसि सभायां । चित्रा ये बाणा. शब्दास्तेषा संधाने संयोजने । कोशानमरादीन् । अर्थेऽर्थालकारविन्यासे परः । रसाना शृंगारादीनामीश्वरो निबंधननिपुणः । राजपक्षे । सन् य. असिः खड्गस्तस्य चमत्कारो हस्ते कृत्वा धुनन । चित्र यद्बाणाना सधान तत्र । कोशो द्रव्यराशिः । तथापि पुनरर्थसपादनतत्पर. । रसाया भूमेरीश्वर. ॥ ४४० ॥

मथ्नंत्विति । सारस्वतं सरस्वत्याः सबधिन, समुद्रस्य च । मंदरो नाम यः अग पर्वतस्तेन, मदो यो रागः प्रेमा तेन च । परमममृत ॥ ४४१ ॥

सरस्वतीति । रसः जल, रसः प्रेमरस , रसः शृगारादि. । गूढोऽदृश्यः स्मितादिभावोत्थ , भावानुभावोत्थश्च ॥ ४४२ ॥

समलंकृतेति । सप्तगलकाररूपमादिभिर्भूषिता, ताटंकाकर्णपूरग्रैवेयकादिभिश्च । गुणै. प्रसादादिभिः काव्यशोभाकरै, रतिकोविदत्वादिभिश्च । श्लेष श्लेषालकार, आश्लेष आलिंगन विना च । रसश्चमत्कारपूर्णत्वं, प्रसन्नचित्तत्व च ॥ ४४३ ॥

कवय इति । नानाऽलकारैः सकुल सदपि यथा अनलंकारो भवेत्तथा कुरुत । अनलकारोऽलभावाभावः ॥ ४४४ ॥

प्रायः कवयः उपमानदशाया चद्र गर्हयति तत्कारणमुत्प्रेक्षते । **न द्विष्म इति** । कविना शुक्राचार्येणेत्थ विचारित । एष चद्रः दोषाकरोऽपि द्विजराट् ब्राम्हण इति मत्वा सर्वे वयमेन न द्विष्मः । ' विधोर्नो रिपुः ' इति ज्योतिष ।

इत्थं रुष्ट इवावतीर्य बहुधैनं न्यक्करोतीव किं
राज्ञां सद्यशसा मुखैरपि नखैः स्त्रीणां जितोऽसाविति ॥ ४४५ ॥
भृशं दोषाहर्षं भजति न च निद्रां वितनुते
विधत्ते बालानां नवमदमलंकाररचनैः ।
प्रियो यः प्रौढानां नवरसनिबंधैकनिपुणः
सदा श्लेषैस्तुष्टो जयति सुकविर्जारसदृशः ॥ ४४६ ॥
अभ्युत्तिष्ठति यां प्रति द्रुततरं लोम्नां गणः सादरं
कर्णावर्पयतः सुखासनमथो पाद्यादिपूजाविधिम् ।
नेत्रे कल्पयतः, स्तवीति वदनं, यां साधुवादैर्मुहुः
सा साध्वी कविता जगत्सु विदिता मान्यातिधन्यात्मनाम् ॥ ४४७ ॥
महांतं कौशल्यव्ययमिह विधायैव विहिता
विचित्रा सावर्णा विविधसदलंकाररचना ।
यदेषा सर्वेषां प्रियकरणसाद्गुण्ययुगपि
प्रसादश्चेन्नैकः सकलजनतोषं न तनुते ॥ ४४८ ॥

ग्रहस्वभावश्च 'परिनामानपीडकः' । एवं सति अय जडो बुधाय किं च मह्यं कवये द्रुह्यति । आस्तां नामेदमिदानीमिति रुष्टो भूमौ बहुरूपेणावतीर्य स कविः प्रतिपदं तं न्यक्करोति । अयं हि नलस्य राज्ञोऽधरावतारणं । अयं दमयंतीमुखनिर्माणाय ब्रह्मणा पात्रे लावण्यं गृहीतं । तेन निर्मिते च मुखे यदवशिष्टं पात्रे किंचित्तेनायं निर्मित इति । अस्या वामनयनायाः नखविरचनार्थं ब्रह्मणा दिव्यहारमणीनां रसं कर्तुं मृत्ता कृता । रसं कृत्वा नखानि निर्मितानि । उपयोगाभावान्यक्ता मृगयमिति ॥ ४४५ ॥

भृशमिति । दोषाहर्षं, रात्रौ हर्षं च । यमकादिभावनावशान्निद्रां न भजति, रतिविह्वलत्वाच्च । बालानां अनभिज्ञानां शब्दालंकारार्थालंकारैः, बालानां मुग्धानां तरुणीनां च । अलंकारदानादिभिः प्रौढानां सहृदयानां, प्रौढावस्थापन्नानां शृंगाररसनिबंधनेन सुरतचातुर्येण । 'बाला तारुण्यदानादिभिस्तरुणी भूरिभूषणैः । सुप्रेम्णा रज्यते प्रेम्णा वृद्धा स्यादरसैरेव' इति ॥ ४४६ ॥

अभ्युत्तिष्ठतीति । यत्संगात्सात्त्विकभावाः भवंति सा कविता या मान्या भवतीति मान्यत्वे हेतुरभ्युत्थानादिसत्कारः, आनंदाश्रुपूर्णे नेत्रे, पाद्यादिपूजां कुर्वत इत्यादि ॥ ४४७ ॥

गुरुदेवताप्रसादमंतरेण कविता न सर्वतोषिकेत्याह । महांतमिति । यथा केनचित्स्वर्णकारेण सुवर्णानामलंकारा निर्मितास्तत्र स्वकौशल्यमप्यतीव प्रकटितं तच्च कौशल्यं अद्भुतानंदकारकं । परं तु तत्र प्रसादोऽपेक्षितः । अत्यमत्कारः कषायलेप-

यो मूढो गुणदोषचिंतनविधौ स्वच्छंदसा यद्गति-
र्न स्वप्नेऽपि सुवर्णसंग्रहपरव्यापारविद्धांतरः ।
सच्छन्दान्विजहाति यः स कुकविर्वेदांतविन्तुल्यतां
यायादेकमसौ निरंतरतया सेवेत चेत्सद्रसम् ॥ ४४९ ॥
अनर्थपदपूरिता रुचिरवृत्तहीनाऽपि यां
श्रयति किल कौरवा गुरुतिरस्कृता याऽनिशम् ।
सुयोधनमतिस्तथा कुकविता तयोरुत्तमा
मतिर्मम मता यतो भवति कर्णसंतोपदा ॥ ४५० ॥
सर्वदानवचिंतायां रतस्य महतः कवेः ।
अंतर्गतं विजानाति गुरुपुत्रस्तु केवलम् ॥ ४५१ ॥
समलंकरोति काव्यं सुकविः कुकविश्च तदुभयं काव्यम् ।
वर्धयति सुखं सद्यः सत्हृदयत्हृदयं प्रविष्टमात्रं चेत् ॥ ४५२ ॥
समलंकरोति काव्यं सुकविः कुकविश्च तदुभयं काव्यं ।
अनलं तनोति चित्ते सत्हृदयत्हृदयं प्रविष्टमात्रं चेत् ॥ ४५३ ॥

नपूर्वकशिल्पनिर्माणरूपः । तेन विना न चमत्कारिता । तया उत्तमवर्णानामलंकारघटना कृताऽपि प्रसादमपेक्षत इति ॥ ४४८ ॥

यो मूढ इति । गुणाः प्रसादादयः, दोषा विरोध्यादयः । स्वच्छंदसा न तु पिंगलछंदोनुसंधेन । सुवर्णानां संग्रहः । तत्तद्रसानुगुणान् शब्दान्रसं शृंगारादिरसं तत्तद्विभावानुभावव्यभिचारिभावैर्व्यंग्य । अन्यत्र गुणा दोषाः प्रसिद्धाः । स्वेच्छया सुवर्णं कांचनं । ' नाधीयीत बहून् शब्दान् वाचो विग्लापनं हि तत् ' इति । सद्रसं ब्रह्मरसं ॥ ४४९ ॥

अनर्थेति । प्रतिपक्षे पैरनर्था भाव्यरतानि साध्व्याः केशाकर्षणवस्त्रहरणादीनि पदानि स्थानानि तैः पूरिता । वृत्तं चारित्र्य तेन हीनामपि या सर्वे कौरवा अनुसेवंते । गुरुणा द्रोणेन । कवितापक्षे । अर्थरहितानि यानि पदानि तैः रुचिराणि प्रार्थनीनि यानि वृत्तानि परिचितमर्दानि तैर्या कविता रवा. शब्दास्तेषां समूहाः कौरवाः अत एव गुरुभिर्महज्जनैः । कर्णो राधेयः, श्रवण च ॥ ४५० ॥

सर्वदेति । सर्वदा नवा नतना या चिंता, सर्वेषा दानवाना या चिंता तस्या । कवेः कविताकर्तुं , शुक्रस्य च । अंतर्गतमभिप्राय, उदरगतं यत्किंचित् । गुरुपुत्रः गुरोः पुत्र इव पुत्रः शिष्यः, उपनिषद्गुरुकुत्रः कचश्च ॥ ४५१ ॥

समलंकरोतीति । समलंकरोति सम्यगलंकारयुक्त, मलसहित च । वर्ध छेदनपूरणयोः । वर्धयति पूरयति, नाशयति च ॥ ४५२ ॥

समलंकरोतीति । अनलं अलंभावाभावमग्नि । तदुपलक्षित संतापं च । ४५३

कविरहिताः कविलापा जायंते कंठशोषणायैव ।
संमुखगतः कविश्चेद्भवति कुलपिताऽपि कविकुलपितैव ॥ ४५४ ॥
बहुवृत्तोपकलितमप्यलंकरणयुगपि विपकथाढ्यमपि ।
कविजनकवनं चेत्कविहीनं न मनोज्ञभावमावहति ॥ ४५५ ॥
तरंगिणी तथा वाणी पुरःस्थानपि भूभृतः ।
तिरस्कृत्य समभ्येति रसिकं रसवाहिनी ॥ ४५६ ॥
व्रजति वितानं विपुलं विरचयते सुमनसां महामोदम् ।
अतिमुक्तकवनमपि तद्रसिकस्थलमलमपेक्षते किमपि ॥४५७॥
सुसंगतिवशाच्छ्लोकः सुश्लोको भवति स्फुटं ।

काव्यस्य श्रोतुः कवेरभावे श्रम एवेत्याह । **कवीति** । कवीनां लापाः श्रोतृभिः रहिताश्चेत्केवलं कंठशोषणायैव । युक्तं चैतत् । कविलापाः 'क'कारण विरहिताश्चेत् 'विलापाः' भवंति । ये तु विलापास्ते कंठशोषणायैव । कवेः श्रोतुः सद्भावे गुणमाह । कुत्सितं लपिता कुलपिताऽपि बहुवक्ताऽपि सन् यदि तस्य संमुखे श्रोतृत्वेन कविः स्थितश्चेत्कविकुलस्य गुरुर्भवति । श्रोता कविस्तस्य तात्पर्यवर्णनेन तं कविकुलगुरुं करोति । युक्तमिदं । यत् 'कुलपिता' इत्यस्य संमुखे 'कविः' स्थितश्चेत् 'कविकुलपिता' भवति ॥ ४५४ ॥

बहुवृत्तेति । कविजनस्य कवनं भाषणं कवितारूपं कविभिः श्रोतृभिर्हीनं न मनोज्ञं भवति । कीदृशं तत् । बहुभिर्वृत्तैः सहितमलंकारयुक्तं च । विं गरुडं पाति विपः कृष्णः, तस्य कथयाऽऽढ्यं । युक्तमेतन्न भवति । युक्तं चैतत् । कविजनकवनं 'ककार'द्वयेन विहीनं 'विजनवनं' भवति । तत्किं मनोज्ञं स्यात् । तदपि रमणीयं स्यादित्याह । बहुवृत्तोपकलितं । 'क' विहीनमिति सर्वत्र । बहुवृत्तोपलितं बहवो वृक्षा वर्तुला ये उपलाः पाषाणास्ते संजाता यत्र तत् । अलंरणभूषितं अलं पर्याप्ता ये रणास्तदर्थं वा भूषितं उत्पलं । अलमिति भिन्नपदं वा निश्चयार्थकं । विपक्थाढ्यं विपथेन दुरध्वना युक्तं ॥ ४५५ ॥

तरंगिणीति । भूभृतः पर्वतान्, राज्ञश्च । रसिकं समुद्रं, रसज्ञं च ॥ ४५६ ॥

व्रजतीति । अतिमुक्ता व्यासादयस्तेषां कवनं कविता वितानं विस्तरं गच्छति । सुमनसां साधूनां च महामोदं महानंदं रचयति । परं किमपि रसिकरूपं स्थलमपेक्षते । तत्र किं वक्तव्यमन्येषां कवनं तदपेक्षत इति । युक्तं चैतत् । अतिमुक्तकानां पुंड्रकाणां वनं विस्तृतं तत्सुमनसां पुष्पाणां सुगंधं तनोति । रसिकस्थलं सजलमालवालं चेत् । पुंड्रक कुसुमं, मधुमाधवी इति महाराष्ट्रा वदंति ॥ ४५७ ॥

सुसंगतेति । श्लोकः सुसंगतिः सत्संगतिः निर्मत्सरश्रोतृसमागम इत्यर्थः । तद्वशेन सश्लोकः चमत्कारातिशयवान् भवति । 'श्लोक'स्य यदि 'सो.' उपसर्गस्य संग-

अलंचिकीर्षोः संसर्गाल्लूनः शोको भविष्यति ॥ ४५८ ॥

यस्मिन्नासुरसंपदः समभवन्नेकांततः संगताः
काव्यस्यास्य तमःसमागमवशाच्छुक्रः प्रकाशो महान् ।
न स्वल्पोऽपि हि सूर्यवासिथतिमतस्तत्रापि चेत्स्तोककः
सोऽयं पूर्वतपःप्रभाववमहिमा नान्यत्प्रपश्यामहे ॥ ४५९ ॥

कुटिलप्राया लक्ष्मीस्तत्र प्रभवति सरस्वती यत्र ।
प्रायः श्वश्रूस्नुषयोः सौहार्दं नैव दृश्यते क्वापि ॥ ४६० ॥

विभाति दिवि चंद्रिका, द्विजवरस्य विद्या भुवि
प्रयाति जलराशिरप्यतितरां प्रमोदं यया ।
तमोविशसनक्षमा कुवलयप्रकाशप्रदा
करोतु कमलोदयं कथमसाविहो कथ्यतां ॥ ४६१ ॥

निश्चेत् 'सुश्लोक' एव । श्लोकं अलं मा मा इति निषेधं विचिकीर्षोः । अरसिकस्येत्यर्थः । संसर्गात् श्लोको लूनाश्छिन्नः स्यात् । चमत्कारभग इत्यर्थः । युक्तं चैतत् । 'अलं' लकारसहितं चिकीर्षोः समागमात् लूनः 'ल'कारेण ऊनः स्यात् । तथा चेत् 'शोक' एवापतितव्य इति भावः ॥ ४५८ ॥

यस्मिन्निति । यत्र काव्ये आसुरसंपदः शृंगाररसोपेता विटकथाः सर्वत्र संगतास्तत्काव्यस्य तामसजनसमागम एव प्रकाश । न तु सूर्या ... धनासवसियतौ । इत्येतदुक्तं । यत्र काव्ये शुक्रे दैत्यसंपदः संगतास्तस्य काव्यस्य शुक्रस्य प्रकाशस्तमसः समागम एव । न तु सूर्यस्य वसियतौ अवसियतौ । 'अवाप्योरुपसर्गयोः' इत्यकारलोपः । अथ तस्य काव्यस्य सूर्यवसियतावपि चेन्मनाक्प्रकाशः । तत्र कारणं तस्य कवेस्तीव्रतप एव । यथा पूर्वे तपसि माघमास इत्यर्थः । पूर्वमाघमासे सूर्यावसियतावपि शुक्रो दृश्यते । तृतीयप्रहरादौ ॥ ४५९ ॥

प्रायः कवयो दरिद्रास्तद्धेतुमाह । कुटिलेति । स्पष्टं ॥ ४६० ॥

विभातीति । द्विजवरस्य चंद्रस्य यथा चंद्रिका दिवि, तथा द्विजश्रेष्ठस्य विद्या भुवि । यथा चंद्रिकया जलराशिः समुद्रः प्रमोदते, तथा जडानां राशिः । मदा अपि कवितया मोदंते । यथा चंद्रिकया तमोनाशः, एवं विद्ययाप्यज्ञाननाशः । यथा चंद्रिकया कुवलयानां प्रकाशो विकासः, एवमनयापि कोः पृथ्व्या वलये मंडले प्रकाशः कीर्तिरूपः । एवं सर्वसाम्ये सति यथा चंद्रिकया कमलानामुदयः प्रकाशो न भवति, एवमनया कमलायाः लक्ष्म्या उदयो न स्यादिति युक्तं ॥ ४६१ ॥

हस्ताब्जे चतुराननस्य तनया धत्ते सरस्वत्यसौ
सद्वंशं गुणिनं रमा तु जलजं धत्ते जलध्यात्मजा ।
नैकस्या गुण एव संभवति नो दोषः परस्या यतः
प्रायः कारणनिष्ठधर्मसदृशं कार्यं समुत्पद्यते ॥ ४६२ ॥

आवासं सरसीरुहं हिमकरं सद्भ्रातरं क्षीराधिं
तातं चापि नृपालकीर्तिललनासौंदर्ययोः संस्तवे ।
प्रेम्णात्युत्कटकोटिनाहताधियो निंदंति ये निस्त्रपा
धृष्टेष्वेषु कथं कृपाविलुलितान्कुर्यात्कटाक्षान्रमा ॥ ४६३ ॥

॥ अथ संकीर्णं ॥

राजा पूर्णकलाधरः कुवलयानंदप्रदाता शुचिः
सद्वृत्तश्च तमोऽपहोऽमृतकरो मित्राश्रयश्चंद्रमाः ।
यायाद्बोरघुनंदनस्य तुलनामेष क्षणं पर्वणि
स्याच्चेदेकमसौ तदापि कमलानंदप्रदानक्षमः ॥ ४६४ ॥

श्रीरामो दिनकृत्कुलैकतिलकस्तीरे सरय्वा वसन्
सीताश्लिष्टतनुः समीरशिशुना संसेव्यमानः सदा ।
साकेते मणिमंडपे जवनिकासंभारसंभाविते
देदीप्यच्छुचि पुष्पकं प्रतिवसल्लोकाञ्शशासाखिलान् ॥ ४६५ ॥

हस्ताब्जे इति । सरस्वती यतश्चतुराननाद्ब्रह्मणः सकाशादुत्पन्ना, चतुरमानन यस्य तस्माच्च । अतः सद्वंशं गुणिनं धत्ते । गुणास्तंत्र्यस्तद्युक्तं सद्वेणु वीणामित्यर्थः । रमा जलध्यात्मजा समुद्रकन्या जडधीकन्या च । ततः जलजं कमलं, जडसंभूतं मदं च । तदेतत्सर्वं युक्तं । कार्यं हि कारणगुणं धत्त इति ॥ ४६२ ॥

आवासमिति । एते कवयः राज्ञः कीर्तेः स्त्रीणां च सौंदर्यवर्णने प्रवृत्ते लक्ष्म्या निलयं पद्मं तुच्छीकुर्वंति । नैतावदेव । शिवेन शिरसा श्लाघ्यं भ्रातरं चंद्रं । भगवन्निवासभूतं समुद्रं तातं च । इति दृष्ट्वा कथमेतान्पश्येदिति युक्तमेव दारिद्र्यमिति ॥ ४६३ ॥

राजेति । रामश्चंद्र इव रामचंद्र इति उपमानं कल्पयंते । तत्र पूर्णकलाधरत्वं सद्वृत्तत्वं च पौर्णिमास्या (स्य) तत्क्षण एव न सर्वदा । तत्क्षणस्थो यद्यपि उपमानतां यायात् परं तु तत्रापि क्षणं कमलानंदप्रदो यदि स्यात्तर्हि नान्यथेति कथमपि नोपमानं पूर्णतया संभवति । राजा भूपः, चंद्रश्च । कलाश्चतुःषष्टिः, षोडशांशाश्च । कुवलयं, भूवलयं, उत्पलं च । शुचिः शुद्धः, श्वेतश्च । वृत्तं चारित्रं, वर्तुलत्वं च । तमः अज्ञानं, तामिस्रं च । अमृतं मोक्षः, सुधा च । मित्रं सूर्यश्च ॥ ४६४ ॥

श्रीराम इति । सूर्यवंशजोऽप्ययं नद्यास्तीरे वसन् सीताश्लिष्टः मारुतसेवितश्चेति जवनिकापरिवृतं पुष्पकं प्रतिवसामीति शास्ति । शीतबाधा चेत्पुष्पकं हसंतीं सेव्येति देदीप्यच्छुचि दीप्तानलं ॥ ४६५ ॥

श्रीरामचंद्रे रविवंशभूपे शासत्यभूद्भूमिरनामयेयम् ।
तथाहि सोमस्य विभावसोश्च साम्येऽन्यथा प्राणभृतः कुतः स्यात् ॥४६६॥

साधं चापलतां द्विषां सहतयोस्थाप्य प्रकल्प्यानतिं
यत्रा तत्र तथा विधाय तदिव ज्याप्रापणं कुर्वतः ।
जीवाकृष्टिमपीश मार्गणगणो लेभे स्वलक्षं न य-
त्संपूर्णं प्रतिमार्गणं प्रतिपदं प्रत्यर्पितं प्रत्यहं ॥ ४६७ ॥

मुक्तानां स्वातिरभूज्जननीत्येवं नु रोहिणी सुषुवे ।
रत्नं किंचन सौम्यं मुक्तोत्तममृग्यमाणपदधूलि ॥ ४६८ ॥

सोऽन्यासु सतीषु केवलमहं राज्ञः परा प्रेयसी-
त्येवं विष्टपवित्तमेव भगवानाविर्भविष्यन्कुले ।

श्रीरामेति । ' अग्नीषोमयोः साम्ये कापि बाधा नोत्पद्यते ' इति शास्त्रसिद्धं । रवि-वंशभवत्वात्तृष्णः रामचंद्रत्वाच्छीतः । एवं च साम्ये सति अनामयत्वं युक्तं ॥ ४६६ ॥

साधमिति । हे ईश अयं भावः । भवता यदा चापलता धनुर्लता उत्था-पिता हस्ते कृता, तदा शत्रूणां चापलता चपलभावः कंपोऽभूत् । यदा त्वया तत्र पुनरानतिः कल्पिता, तदा शत्रुभिरपि आनतिः कृता । यदा तत्र ज्याप्रापणं मौर्वी-संगमनं कृतं, तदैव तैर्ज्याप्रापणं भूमसमर्पणं कृतं । यदा जीवाकृष्टिः जीवाया ज्याया आकर्षणं कृतं, तदैव तेषां जीवानामाकर्षणं जातं । ते हता इति भावः । अनंतरं मार्गणस्य बाणस्य स्वलक्षं शत्रुरूपं लक्षं नासीत् इति । वीररसे तेषां वासनापूर्ति-र्नाजायतेति कृत्वा दानवीररसे तद्वासनापूर्तिः कृता । मार्गणौ बाणयाचकौ । स्वं द्रव्यं, स्वीयं च । लक्षं शरव्यं, शतसहस्रसंख्याकं च ॥ ४६७ ॥

मुक्तानामिति । रोहिणीनक्षत्रं कृष्णजन्माधिकरणं । मुक्तानां मौक्तिकानां, ज्ञानिनां च । स्वातिः जननी अभूदिति आत्मनि भर्तुः प्रीतिर्न स्यादिति सापत्न्य-मत्सरेण रोहिणी किंचन रत्नं सुषुवे । कस्तत्रातिशय इति चेन्मुक्तोत्तमैर्मृग्यमाणा पदधूलिर्यस्य तत् । ननु स्वातिरपि तादृशं रत्नं नृसिंहाख्यं सुषुवे इति किं तया-धिकं कृतमिति चेत्तत्राह । सौम्यमिति । सोमस्य भर्तुरनुरूपं पुरुषाकारत्वात् । ' दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ' इति वचनाद्दर्शनीयतमं च । तत्तु ' उग्रं उग्र वीरं महाविष्णुं ' इति मंत्रवर्णनाद्विजातीयं च । पुरुषसिंहाकारत्वात् । अतो भर्तुः संतापाकुलतया तत्र प्रेमातिशयो न स्यादिति भावः ॥ ४६८ ॥

रोहिणीनक्षत्रे कृष्णजन्मकारणमाह । सोऽन्यास्विति । अन्यासु अश्विन्यादिषु । चंद्रस्य, भूपतेश्च । विष्टपे भुवने वित्तं प्रसिद्धं । यदीक्षणे मन्निमित्तमेव इतर-दारकुपितस्य चंद्रस्य ' क्षयी भविष्यसि ' इति शापो दत्त इत्यादि भर्तुः प्रेयस्त्वेन स माहात्म्यातिशयो वर्तत एव । अथ यदि अवतरिष्यता भगवताहं सत्कृता

सत्कुर्वापादि मामलं लक्षिति साऽजुहूलखका तत-
स्तेनास्या अनुरोधतोऽभित इवैनां सच्चकाराच्युतः ॥ ४६९ ॥

सूर्यं वर्णयति—

औषधान्वेषणक्लेशैर्भृशमुत्क्लिश्यते कुतः।
रुगाब्धितरणे हेतुं तरणिं शरणीकुरु ॥ ४७० ॥

नृसिंहं वर्णयति—

वयस्य पश्य यस्यास्य पंचास्यास्यस्य वश्यता।
शस्यस्य तस्य सस्यस्य संपत्किं नु विनश्यति ॥ ४७१ ॥

शिवं वर्णयति—

योऽनंतभूषितभुजोऽधिकशैलवासः
संदर्शयन्द्रविणनायकसख्यमुच्चैः।
भव्याकृतिर्बहुविसर्गनिबद्धभाषो
दुर्गाप्रियोऽवतु चिरं करहाटको नः ॥ ४७२ ॥

भविष्यामीति चेन्मम माहात्म्यस्य पराकाष्ठा स्यादिति। तदर्थं ब्रह्मणो भक्ताऽभवदिति। 'रोहिण्या देवता ब्रह्मा' इति प्रसिद्ध। 'यद्वैर्योजननजन्मर्क्षे' इति (!) भागवतं। अवतरिष्यंतं भगवंतं प्रति तया ब्रह्मणा प्रार्थितमिति तदनुरोधेन रोहिणी सत्कृताऽभूदिव ॥ ४६९ ॥

औषधेति। तरणिं सूर्यं, नौका च ॥ ४७० ॥

वयस्येति। हे वयस्य सखे, पश्य अस्य जनस्य पंचास्यास्यस्य सिंहाननस्य नरहरेर्वश्यता चेत् शस्यस्य स्तुत्यस्य तस्य सस्यस्य धनधान्यादेः संपत्किं विनश्येदपि तु न। स्वयं मोक्षसपद्यं वृणुते ॥ ४७१ ॥

य इति। अनंतः शेषस्तेन कपूरकटकादिकरणात्। अधिकः सर्वाधिको यः शैलः कैलासः। कुबेरसख्यं दर्शयन्। भव्यार्थं जगत्कल्याणार्थमाकृतिर्यस्य। 'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना' इति श्रुतेः। बहवो विसर्गा दानानि तैर्निबद्धा भाषा वाग्यस्य। बहुवरप्रद इति यावत्। दुर्गा भार्या यस्य। करे हाटकं धत्तूरो यस्य। मदोत्पादनार्थं तद्धारितत्वात्। 'धत्तूरः कनकाह्वयः' इतिकोशः। यच्छिवः करहाटकः अतः करहाटका ब्राह्मणजातिविशेषः। कथं। स हि 'अनंत' दोरधारी। प्रायेण कराले इत्यधिकशैले वासो यस्य। करील इति ग्रामनाम। तत्रहि तेषां प्रायो वासः। यः दारिद्र्येऽपि समर्थतां दर्शयति। वस्त्रपात्रभूषणादिनोज्ज्वलाकृतिश्च। यस्य भाषा विसर्गबद्धा 'दडाः पेटी' 'दाराः कडी' 'ताकाः कोडणी' इति। स्त्रीणां च 'नि' कारेण बद्धा 'केलेनि' 'घेतलेनि' 'पाहिलेनि' इत्यादि। दुर्गा देवी प्रिया यस्य। उपास्यत्वात् ॥ ४७२ ॥

अस्मिन्नीशे शशीशेऽभ्युदयति न कदाऽनर्थकृत्प्रातिकूल्यं
कांते चावां तथेमे भगवत उचिते कालिका काशिका च ।
प्रायस्त्वेकांतरेयं जनयति हि सुतान्पंचवक्त्रांस्तथाऽहं
नातस्त्यागस्तु न स्यादिति गिरितनयाश्लेगलग्नेव शंभोः ॥ ४७३ ॥

कालिकासान्निधानेन विना शैलेंद्रमूर्धनि ।
सानंदं नीलकंठस्य कथं स्यात्तांडवोत्सवः ॥ ४७४ ॥

कपर्दमाली धृतभैक्ष्यपात्रो भूताधिपो नृत्यति तेन मन्ये ।
आराधकोऽयं तव दीव वन्हेर्धृतिस्तु नित्यास्य ललाटपट्टे ॥४७५॥

संसारं निजकर्मणैव भजते जंतुः परंतु ध्रुवं
क्षेत्रेऽस्मिन्नविमुक्तके पशुपतौ राजन्यहो तामसे ।
स्यात्किं मुक्तिकथा नृणामिति महाकुत्साऽत्रयोः स्यादिति
त्रस्तः सन्नविशेषतो व्यरचयत्किं मुक्तिसत्रं शिवः ॥ ४७६ ॥

अस्मिन्निति । पार्वत्या विचारित । अयं भगवान् शशीशः शिवः साधुस्वभावात् । अत्र अनर्थकृत्प्रातिकूल्यं नास्ति । तत्सहचरत्वात् । अहं कालिका, एषा काशिका काशी च तथैव मिथ सापत्नभावरहिते एव । परमिय पंचवक्त्रान्सुतान्जनयति । अत्र ये मृतास्ते शिवस्वरूपा भवंतीति भर्त्रनुरूपतनयजननयित्री । अह तु न तथा । एक षडानन गजाननं परमिति जनितवतीति भर्तृविरूपसुतजनयित्री । तस्मादियमेकांतरा भर्त्रा सहेति निश्चयः । तत्कादाचित्कत्यागस्तु न स्यादिति अर्धांगलग्नेवेति । शशीश कालिका काशिका शब्दा. प्रातिकूल्येन पठिता अपि अनर्थदा न भवति । काशिका शशीशेन सहैकांतरा समानमध्या । उभयोर्मध्ये शिकार । एकत्र दीर्घः, अन्यत्र ह्रस्वः इति प्रायिकत्व ॥ ४७३ ॥

शिवस्ताडव कालानिकटे कुतः करोति तत्राह । **कालिकेति** । नीलकंठस्य शिवस्य, मयूरस्य च । तांडवोत्सव । कालिका गौरी, मेघपंक्तिश्च ॥ ४७४ ॥

कपर्दमालीति । कपर्द जटाजूट मालते धारयति । कपर्दो वराटिकास्तमाला बिभर्ति च । भैक्ष्यपात्रं कपाल, पर्दाटिका च । 'परडी' इति लोके । भूताधिपः शिवः, उपासकविशेषश्च । 'भूत्या' इति । आराधकः आराधनकर्ता, 'आराधी ' इति तस्यैव नामांतर । एव शिवस्तवाराधक इत्यत्रः । परमस्य दीपिका नास्तीति चेद्देव विभो यो जातस्तस्य भाल एव सा कीलितेति । शिवनयने दीप्तो वन्हिरास्ते ॥ ४७५ ॥

संसारमिति । न सति विमुक्ता यस्मिस्तत् । पशुपतिः शिव, मूर्खश्च । तामसः तमोगुणी, अलसश्च । आवयोः पुरपुराधीशयोर्मुक्तिमत्र । ' क्षेत्रेऽत्र तव देवेश यत्र कुत्रापि वा मृता. । कृमिकीटादयोऽप्याशु मुक्ताः सतु न चान्यथा ' ते श्रुते. ॥ ४७६ ॥

मार्तंडं वर्णयति--

स्वैरवंध्यगणैर्युक्तं वैरवंचितकैरवम् ।
स्वैरवंधाच्छिदं देवं वंदे मार्तंडभैरवम् ॥ ४७७ ॥
चरंतं तं तुरंगेण रजनीचूर्णभासुरम् ।
प्रचंडकरपालं श्रीमार्तंडं प्रणमाम्यहम् ॥ ४७८ ॥

काशीं वर्णयति--

महादोषाचारा भयलवविहीना अपि महा-
श्मशाने चासीना उपितवति भूताधिपतिना ।
महामंत्रं कंचित्सकृदुपगता एव सहसा
वशीकुर्वंत्येते शिव शिव परां मुक्तिरमणीम् ॥ ४७९ ॥

गंगां वर्णयति--

एषादौ तु सुरापगाऽन्यदपि च ब्रह्मघ्नसंसर्गिणी
स्यादस्या गतिरस्य का नु जगतः स्यादेष दोषो मयि ।
यद्येतस्य समुद्धृतौ विरचयाम्येषा विचारं मना-
गप्येवं मशती समुद्धरति किं गंगाऽविशेषाज्जगत् ॥ ४८० ॥

करवीरं वर्णयति--

पत्ये श्रीः कुपिताऽत्र चम्पुमगमस्त्वेनं कृत्वामं धिया
पश्यंत्याः किल नीरजस्थलमिहार्मात्सौमनस्यप्रदम् ।

स्वैरिति । स्वैः स्वकर्तृभिरन्यैः अदिष्टकार्यसंपादका ये गणास्तैः । वैरेण वंचिताः कैरवा दैत्या येन तम् । स्वैरं यथेष्टचारी । अनिच्छायामपि बलादापतितो यो बंधः संसारस्तच्छिदम् ॥ ४७७ ॥

चरंतमिति । मल्लारिपक्षे करपालः खड्गः । 'करवालः करपालः' इत्युभयमपि कोशांतरे स्पष्टम् । [रजनी निशा, हरिद्रा च] । श्रीमार्तंडः सूर्यस्तत्पक्षे । तुरगेण तद्युक्तरथेन रजन्या रात्रेश्चूर्णं चूर्णीकरणं । नाश इति यावत् । भासुराः देदीप्यमानाः प्रचंडा ये कराः किरणास्तान्पालयतीति तम् ॥ ४७८ ॥

महादोषेति । ये जारणं कुर्वंति ते महाचारा भयहीनाः संतः श्मशाने भूतप्रेताद्यधिष्ठिते मंत्रजपं कृत्वा परस्त्रियं वशीकुर्वंति । तथा काशीस्था दोषाचारा अपि कृते येषां भयं नास्ति किमन्यत्स्यादिति । महाश्मशानं काशी । भूताधिपती रुद्रः । महामंत्रं तारकं ब्रह्म । सकृदेवोपगता मुक्तिं वशीकुर्वंति ॥ ४७९ ॥

एषेति । सुरापगा देवनदी, मद्यनदी च । [सुराणां सुरायाः आपगा] । ब्रह्मघ्नः शिवः, ब्रह्महा च । शिवेन ब्रह्मणः शिरः कर्तितमिति स ब्रह्मघ्नः ॥ ४८० ॥

पत्ये इति । 'लक्ष्मीः पत्ये नारायणाय कुपिता सती वैकुंठं परित्यज्यात्र भुवि

त्रस्तास्मिन्मधुपप्रसंगत इति श्रेष्ठं ततोऽधिष्ठिता
प्रेष्ठं किं करवीरमत्र यदसौ तद्वासवाक् त्वन्यथा ॥ ४८१ ॥

भूमिं वर्णयति—

अप्यवर्णे जनैरेषा गमितोष्मपरोदयम् ।
क्षमामेव प्रथयति क्षमेव क्षमैव विराजते ॥ ४८२ ॥

शास्त्रिणं वर्णयति—

अर्थाहरणकौशल्यं किं स्तुमः शास्त्रवादिनाम् ।
अव्ययेभ्योऽपि यैरर्था निष्काश्यंते ह्यनेकशः ॥ ४८३ ॥
भूपादयोऽपि वित्रस्ता नूनं यदुपसर्गतः ।
विसृजंति बहूनर्थांस्तस्मै ते शास्त्रिणे नमः ॥ ४८४ ॥

वस्तुमगमत् ' इयमाख्यायिका व्यंकटेशमाहात्म्ये प्रसिद्धा । नु परं । एनं कुवासं पूर्ववासं कुत्सितवासं मन्वानाया नीरजस्थलं कमलस्थानं रजो रहितस्थलत्वात्सौमनस्यप्रदं प्रसन्नचित्तत्वस्य कारकमासीत् । तत्र सुमनोभावः पुष्पत्वं चास्ति । अथ तत्र । मधुपानां मद्यपानां, भृंगाणां च । सदा प्रसंग इति त्रस्ता सती इदं तु निःशेषरजस्थलं सौमनस्यं प्रकर्षेण ददातीत्येव सत्यमिति मन्वाना तत्परित्यज्य तादृशं श्रेष्ठं करवीरमेवाध्यतिष्ठदिव । ननु अत्र पद्मे तस्या लक्ष्म्या वास इति । यत् लौकिकी, शास्त्रीया च उक्तिः । तस्याः का गतिरिति चेत्सा तु अन्यथाऽन्यप्रकारेण वर्तमाना साधारणैर्न ज्ञायते । यथा कस्याचिन्मञ्जूषिकाया कस्तूरी कियत्कालं स्थापिताऽभूत् । अथ तस्या कियता कालेन निष्कास्य नीतायामपि तस्या वासस्तत्रास्ति । तद्वदत्र स्थितायां अनंतरं गताया अपि लक्ष्म्या वासोऽस्तीति तत्त्व । वासः सुगंधः, वसतिश्च ॥ ४८१ ॥

अप्येति । ऊष्मा तापस्तस्य परः उत्कृष्ट उदयो यस्मात्तादृशमवर्णं निंदां गमितापि यत्र क्षमामेव प्रथयति । निंदितापि क्षमामेव कुरुते इति । अवर्णे अकारे । ऊष्मा षकारः । तस्मात्परः उदयो यस्य । 'क्ष्मा' इत्यत्र षकारात्पर मवर्णं गमिता 'क्षमा' भवति ॥ ४८२ ॥

अर्थाहरणेति । अर्थोऽभिधेय, द्रव्यं च । अव्ययाः व्ययं न कुर्वंतः कृपणाः । अव्ययानामनेकार्थत्व ॥ ४८३ ॥

भूपादय इति । यस्य शास्त्रिण उपसर्गादुपद्रवात्पुनः पुनरागमनस्तवनदैन्यदर्शनरूपाद्भूपादयो राजादयोऽपि बहूनर्थान्विसृजंति । 'भू सत्तायां' 'पा पाने' इत्यादयो धातवोऽपि येनार्जितेन उपसर्गेणानेकार्थान्विसृजंति । यथा 'प्रभवति' 'संभवति' 'अनुभवति' 'परिभवति इति' । 'पानं' 'अनुपानं' ॥ ४८४ ॥

वैद्यं वर्णयति--

प्रवर्तंतेऽगदंकाराः सत्यंकारादनंतरम्।
यदाह कारे सत्येति भगवान्पाणिनिः क्रमम् ॥ ४८५ ॥

रोगिणं वर्णयति--

देवोऽपि गदी नीचैर्भूत्वाशौ प्राप्तरसतया प्रायः।
कृतकार्यः पुनरेवं रसापंकमवंचयन्नरि न चित्रम् ॥ ४८६ ॥
येन स्वस्थाः संतस्तीर्त्वा दुस्तरतरोपतापभरम्।
तं वैद्ययोगमिह ये त्यजंति तान्निर्गुणान्नरान्मन्ये ॥ ४८७ ॥

सभ्यं वर्णयति--

सभारतो यः पुरुषः स एवेदृङ् न चान्यथा।
भूरिवित्तः पुमान्यस्तु स एवेदृङ् न चान्यथा ॥ ४८८ ॥

आश्चर्यं--

प्रदाय शुणिकेभ्यस्तु स्वसकाशगतं धनम्।
आधिं लब्ध्वा सुखीभूता धनिका इति विस्मयः ॥ ४८९ ॥

कामांधं--

श्रुत्वा विष्णोर्भक्तिमाहात्म्यचर्चां
कामांधानां मूर्च्छयंदेनीव शलभम्।

प्रवर्तंत इति। अगदंकारा वैद्याः। सत्यकारं किंचिदानीं द्रव्यं ['सच्चकार' इति प्रसिद्धं] गृहीत्वा रोगचिकित्सायां प्रवर्तंते। युक्तमेतत्। भगवता पाणिनिनाऽयं क्रम उपदिष्टः। 'कारे सत्यागदस्य' इति सूत्रे ॥ ४८५ ॥

देवोपीति। गदी गदाधरः, रोगी च। देवो महाविष्णुरपि आदौ नीचैर्वामनो नम्रश्च भूत्वा। प्राप्ता रसा त्रिपदा भूः, रसायनं च येन तत्त्वग्राहया प्रायः कृतं कार्यं त्रैलोक्यराज्य, अनामयं च। येन तथा सत्त्वेन रसापंक बलिं, वैद्य च। अवंचयन्नगृहीत्वन्न। किं पुनर्नरा एव कुर्वंतीति। तत्र चित्रं न ॥ ४८६ ॥

येनेति। ये जना येन वैद्ययोगेन रोगं तीर्त्वा न पुनस्त्यजंति त नरा निर्गुणा मंदाः। यथा ये विद्यायां अयं वैद्यः सचार्मौ यागस्तेन उपतापं तापत्रयोपेतमाविद्यामयं संसार तीर्त्वा पुनर्विद्यायोगमपि त्यजंति ते निर्गुणाः कैवल्यभाजः 'येन त्यजसि तत्त्यज' इति अंते ज्ञानमपि त्याज्यमुक्तं ' (!) ॥ ४८७ ॥

सभारत इति। भारतेन महाभारतेन अपरिशीलक। सभायां रतः स्यात्। पक्ष्भूरि वित्ता विदो भावः वित्ता विद्वत्ता यस्य। स एव भूरिवित्तं द्रव्यं यस्य तादृशः स्यात्। नान्यथेति ॥ ४८८ ॥

प्रदायेति। आधिं मनोव्यथा, बंधकं च। 'गहाण' इति लोके ॥ ४८९ ॥

मूर्धांदोलं ग्राम्यगीते वदंते
वा वाः खाशी ठीक क्याबात होहो ॥ ४९० ॥

नैय्यायिकं--

लिंगपरामर्शपरा व्यभिचारविचारका हि तर्कज्ञाः ।
कलयंतीश्वरसिद्धिं तद्धि विपुलमत्र चित्रकृद्भवति ॥ ४९१ ॥

प्रश्नोत्तरं—

सकलंकस्य संसर्गान्नूनं भवति गर्हितम् ।
परिपाटी वराकस्य हितमावहति ध्रुवम् ॥ ४९२ ॥

दैवं--

राजराजसखोऽप्येष महादेवोऽपि भिक्षते ।
वक्रे विधौ ललाटस्थे तत्रान्येषां तु का कथा ॥ ४९३ ॥

स्वभावं—

जानीमहे जगति जंतुजनस्य नूनं
योनिस्वभावसदृशी भवति क्रियेति ।
लब्ध्वाऽपि वक्षसि पदं जलराशिकन्या
श्रीवासुदेवचरणप्रवणैव नित्यम् ॥ ४९४ ॥

मैत्री --

वन्यानामपि कोशेषु सुहृदां स्वोदयार्थिनां ।
अर्प्यते स्वोदयादेव श्रीः सेयं मित्रता मता ॥ ४९५ ॥
सद्यो जातः सौहृदबालमरालोऽधिमानसं तनुयात् ।

मूर्धेति । मूर्धानमांदोलयित्वा । णमुल् । वदंते । भासने आत्मनेपद ॥४९०॥

लिंगेति । लिंगस्य गुह्यस्य परामर्शो. वारंवारमास्फालन । व्यभिचारः परस्त्रीसग । एत पदार्थद्वयं न्यायशास्त्रे एतन्नामकत्वेन प्रसिद्धं । ईश्वरसिद्धिर्हि न्यायमतरेण न स्यात् । नास्तिकनिरासापेक्षत्वात् ॥ ४९१ ॥

सकलमिति । कलंकेन सहितस्येत्युत्तरं । वराकस्य अनुद्धतस्येति च॥४९२॥

राजराजइति । राजराजः कुबेरः । विधौ दैवे, चंद्रे च ॥ ४९३ ॥

जानीमहइति । जलस्य स्वभावो निम्नं प्रति सर्पण ॥ ४९४ ॥

वन्यानामिति । वन्याना वनेभवानामारण्यकाना, पद्मानां च । कोशेषु धनागारेषु, कोरकेषु च । उदयः अभिवृद्धिः, उद्भवश्च । श्रीः लक्ष्मी, शोभा च । मित्रता मैत्री, सूर्यता च ॥ ४९५ ॥

सद्य इति । स्नेहबालहंसः सद्यो जात. उभयतः पत्राणि लघूनि, पक्षाश्च यदि न प्रवर्तेरंस्तदा । मानसे चित्ते, तन्नामसरसि च । विनोद विहारं मोदं

किं नु विनोदमुभयतः पत्राणि पुनर्न चेत्प्रवर्तेरन् ॥ ४९६॥

मित्रपत्रं—

स्वांताक्षितौ स्नेहलता समुप्ता तद्वैव सा स्वस्तिमतीति मन्ये।
प्रवर्तयेच्चेत्सुमनोविनोदं पुनः पुनः पत्रवती प्रभूय ॥ ४९७ ॥

समस्यां—

चंद्रो गजेंद्रः क्षितिनायकेंद्रो
धनुर्धरेंद्रः शिशुवाग्विलासः।
स्याद्दातृभोक्ता चतुरश्च कीदृक्
गृहाण विद्वन् सुकलास्त एते ॥ ४९८ ॥

दैत्यजनोऽदितितनयान्, शीतं धन्यो जनो, युवा युवतीः,।
किं बलमाश्रित्य जयति वद विद्वन्नपि गृहाण शुक्रबलम्॥४९९

पर्जन्यं—

सरिच्छैलसमुद्रेषु कुतोऽभ्र वसु वर्षसि।
भ्रातरेतन्मया ज्ञातं भ्रांतत्वं तत्र कारणम् ॥ ५०० ॥

शीतकालं—

अस्तं यातो दिनेशः प्रबलमथ हिमं जातमेतत्स्वभावा-
च्छीतानां मामकानां कथमिव पयसां स्यादवस्थेत्यचिंत्यः।

च। कथं तनुपात्सुखगतये च न स्यादित्यपि बोद्धव्यं। सुष्ठु खे गतिः, सुखप्राप्तिश्च ॥ ४९६ ॥

स्वांतेति। मनआलवाले स्नेहवल्ली उप्ता सा जीवंतीति कदा मन्तव्यं। यदि पुनः पुनः वारंवारं। पत्राणि लेख्यानि, पर्णानि च। समागत्य। सुमनोविनोदं मनसः आनंदं, पुष्पविनोदं च। प्रवर्तयति ॥ ४९७ ॥

चंद्र इति। कलाभिः सहित (?)। सुष्ठुकरः शुंडादंडो यस्य। करैः करभारैः सहितः। रत्नयोरस्य। सुष्ठु कुशलः करो यस्य। सुतरां कलः मधुरः सुकलः। सम्यक् धनव्ययज्ञः। सुष्ठु कला गीतादयो यस्य। 'सुकलो दातृभोक्तरि' इत्यमरः ॥ ४९८ ॥

दैत्यजन इति। शुक्रः शुक्राचार्यः। शुक्रः अग्निः। शुक्रं रेतः ॥ ४९९ ॥

सरिदिति। अभ्रेति पदं भ्रांतं। 'भ्र' कारांतं, भ्रांतियुक्तत्वं च ॥५००॥

शीतकाले जलाशयान्निर्गच्छंतं धूममुत्प्रेक्षते। **अस्तमिति**। मामकानां

अंतर्ग्रातुं प्रविष्टोऽनल इव कृपया तान्यथेप्यंतमर्क
ज्ञात्वा निर्गच्छतोऽग्रे चलति हुतभुजो धूम एष ध्वजोऽस्य५०१
शीतर्तुश्चंडभानौ सति म जगदिदं व्याप्नुमीष्टेऽथ तस्मि-
न्नस्तं यातेऽस्य धुर्यं ज्वलनमिह समाक्रम्य नीराशयाऽहे ।
कारागारे निवेश्य प्रसभमथ जगद्व्याप्तमेतन्निशम्य
प्राप्तं क्रुद्धं दिनेशं कथयति किमयं धूमदूतैः स्ववासम् ॥५०२॥
वक्षोजदुर्गे सुघने त्रिवलीपरिखावृते ।
श्रितः किमूष्मा विजितः शीतेनातिबलीयसा ॥ ५०३ ॥
यथांबरांतः शयितः स पौरस्त्यः पयोधरः ।
कथं शीतकथाश्रोत्रपथमभ्येतुमर्हति ॥ ५०४ ॥
हाहाहूहूहालापैर्धनंजयस्यातिसंस्तवो यत्र ।
मकरारंभो जंभभिदालय इव सहतिलोत्तमारंभः ॥ ५०५ ॥
स्विन्नाः कंटकनिचिताः प्रकटितरागाश्च सहासिता मधुराः ।
दामोदरदर्शनजो राधायस्याविशेष इव तिलकाः ॥ ५०६ ॥

त्पमूत्रानां ' अमरापः ' इति श्रुतिः । शीतस्य जेता रविरागत इति जलान्निर्ग-च्छतः ॥ ५०१ ॥

अन्यथांप्रसत्ते । **शीतर्तुरिति** । धुर्यं कार्यभारिणं । सूर्यो हि स्वतेजोऽग्नौ दिनांते निधत्ते । क्रुद्धमारक्तत्वात् । आग्नेयकोणे तदवलोकनायेव गतं चेति ज्ञेयं ॥ ५०२ ॥

वक्षोजइति । वक्षोजशब्दमध्ये ऊष्मा ' ष ' कारो दृश्यते ॥ ५०३ ॥

यथांबरांत इति । अंबरांत प्रावरणवस्त्रांतः । पौरस्त्यस्तारुण्यावस्थासंभवः स्तन शयितश्चेच्छीतवार्ता न । कांतामालिंग्य सुप्तं चेन्न शीतबाधा । आकाशे यथा पौरस्त्यः हस्तचित्रांतरभावी । स हि पूर्वस्या प्रादुर्भवति । मृगमारभ्य तु पश्च-त्प्रादुर्भूय पुरो गच्छति । तत्र शीतमस्ति । पौरस्त्ये तूष्मेति सर्वजनप्रसिद्धं ॥५०४॥

हाहेति । मकरमकमणारंभः । तत्र ह्यतीव शीतमिति । धनंजयस्याग्नेः । 'हा हा हू हू' इति प्रकारैः शब्दैः सह संस्तव. परिचयः । तिलोत्तमानां दानाद्यारं-भेण सहितः । ' तिलभुक् तिलदाता च ' इति स्मृतेः । जंभभिदिंद्रस्तस्य गृहं तत्र ' हाहा ' ' हूहू ' नाम गंधर्वयोरालापैरर्जुनस्य सम्यक्स्तवः । प्रियपुत्र-त्वात् । **तिलोत्तमा** च **रंभा** च ताभ्यां सहितः ॥ ५०५ ॥

स्विन्ना इति । महाराष्ट्रे शार्करतिलान् ददति भुंजते च जनाः । ते च स्विन्नाः स्वेदेन अग्न्यूष्मणा सिद्धाः । कटकैर्युक्ताः । तत्र केशरादिरंजनं कुर्वंतीति प्रक-टितरागाः । सितया शर्करया सहिताः । अत एव मधुराः । अन्यत्र स्वेदयुक्तः । रोमां-चयुक्तः । प्रकटितो रागः प्रेमा ... सितेन स्मितेन सहितः । मधुरो रम्यः ॥५०६॥

वर्णकालं—

ग्रामे मुरवध्वनिं श्रुत्वा भयसंविग्नमानसा ।
त्यक्त्वा वनविहारं श्रीरंतगंतुमना इव ॥ ५०७ ॥
बहुलोत्सवो जनोऽसावृतुश्रियः पुष्पसमय इति ।
कंदर्पः कथमिव न स्वध्वजमस्मिन्नुद्दुडयतु ॥ ५०८ ॥

प्रातःकालं--

सूरे तूदयमासाद्य स्वप्रतापं वितन्वति ।
युक्तं नक्षत्रनिग्रहो निस्तेजस्को विलुप्यते ॥ ५०९ ॥
दोषोपचयस्तावज्जघन्यकर्मणि नरं नियोजयति ।
सुदिनं तु शुचौ कर्मणि सदसद्वस्तुस्वभाव एवायम् ॥५१०॥

पुरुषचर्या--

भवितव्यं प्रसिद्धेन नरेणातिप्रयत्नतः ।
पाणिन्याद्या ह्यविज्ञातं नरं नरकमूचिरे ॥ ५११ ॥
सदशन एव मदशनो विकलः किल जायते विकल एव ।
असुरत एवासुरतस्तद्वदविनयो जनोऽविनय एव ॥ ५१२ ॥
श्रेष्ठ्यस्योज्ज्वलतैव कारणमिति प्रायो बहिर्दृष्टयः
पश्यंत्यस्य जना न कर्म सहजं किं साधु वाऽसाध्विति ।

ग्रामे इति । माघान् पश्चिमधान्यौषधिरूपां लक्ष्मीं मुरवध्वनिं 'तुबा' रवं । स च महानर्थं विना न जायत इति ॥ ५०७ ॥

बहुलेति । पुष्पसमयः वसन्त, ऋतुदर्शनं च । स्वध्वज प्रसिद्ध., कामाङ्कुशश्च ॥ ५०८ ॥

सूरे इति । सूरे सूर्ये, शूरे च । उदय प्रसिद्ध, अभिवृद्धि च । प्रतापमातपं, शौर्यं च । नक्षत्रगणा क्षत्रभिन्नाना ॥ ५०९ ॥

दोषेति । दोषाणामुपचयो वृद्धि, रात्र्युपचयश्च । जघन्य नीच कर्म, रतं च । सुदिनं पुण्य, दिवसश्च । शुचौ शुद्ध मज्जनस्नानादौ ॥ ५१० ॥

भवितव्यमिति । अज्ञातार्थे 'क' प्रत्ययो विहितः । अज्ञातो नरः नरक इति ॥ ५११ ॥

सदशन इति । मदनश्चेन्मध्यगाशनं भोजनं यस्य । विकलः कलाशून्यः क्लेशादिविह्वलश्च । असुषु प्राणेषु रतः बलरक्षणे विर्काणुः । नास्ति सुरतं यस्य बहुसुरतविमुखः । अविनया विनयशून्यः । नयतीति नयः 'पचाद्यच्' । अवीनां मेषाणां नयो नेता औरभ्रः 'धनगर' इत्यर्थ. ॥ ५१२ ॥

श्रेष्ठ्यस्येति । उज्ज्वलता वपुर्वस्त्रभूषणादिभव्यता । जघन्यकर्मणि नीचकर्म-

शृंगारो हि जघन्यकर्मसाचिवो मूर्धन्यतां प्रापितः
शांतः पश्य जघन्यतां बत पुनर्मूर्धन्यकर्मापि सन् ॥ ५१३ ॥
बह्वर्थतामव्ययानां विद्वदुक्तां न धारय ।
सुप्रतिष्ठाऽत्र नास्तीति भगवान्पाणिनिर्जगौ ॥ ५१४ ॥
सुवृत्तो बालिमूर्धन्यो घनः पीनोऽपि वा जनः ।
बालिश (शा) स्य प्रसंगेन पतत्येव यथा स्तनः ॥ ५१५ ॥
महदाधाग्दानाय महांतोऽर्हंति नेतरे ।
अचलाधारिणो नूनमचला एव केवलम् ॥ ५१६ ॥
द्विधापि लोके बह्वाशो विद्वानपि न राजते ।
द्विधापि सुकलस्त्वस्मिन्नविद्वानपि राजते ॥ ५१७ ॥

भोजनं —

तनुग्रासे स एव स्यादसुग्रासेऽपि स स्मृतः ।
तस्मात्सर्वप्रयत्नेन भवेन्नित्यं सुभोजनः ॥ ५१८ ॥

णि, रते च । साचिवोऽपि । मूर्धन्यतां 'शृंगारवीरकरुणाद्भुतहास्यभयानकाः' इति 'शृंगारो रसमूर्धा' इति **रसमीमांसा**। जघन्यतामंतिमता, नीचता च । मूर्धन्य श्च योगधारणादिना, नित्यानित्यवस्तुविवेकेन च । तस्माल्लोकयात्रायां पुरुषेणो-ज्ज्वलेन भाव्य, न मलिनेन । 'शृंगार शुचिरुज्ज्वल.' इति कोशः ॥ ५१३ ॥

बह्वर्थतामिति । यो न व्ययं करोति स बह्वर्थ. । अव्ययानां चादीना-मनेकार्थत्व । तेषु अव्ययेषु सुपः सप्त विभक्तीनां प्रतिष्ठा नास्ति । 'अव्ययादा-प्सुपः' इति लुग्विधानात् । यो व्ययं न करोति तस्य सुतरां प्रतिष्ठापि न ॥५१४॥

सुवृत्तइति । घनो गंभीर., कठिनश्च । सद्वृत्तः सच्चारित्र:, वर्तुलश्च । बलिनां मूर्ध्नि स्थितोऽथवा बली, त्रिवलीमस्तके स्थितश्च । बालिशो मूर्खः, शिशुश्च । बालिशेन सह महता प्रसंगो न कार्य इति ॥ ५१५ ॥

महदेति । अचला पृथ्वी । अचलाः पर्वताः ॥ ५१६ ॥

द्विधापीति । बह्वी आशा यस्य । बहु अश्नाति सः । सुकलो द्रव्यस्य सम्य-क् व्ययं जानाति । शोभनगीतादिकलायुक्तश्च ॥ ५१७ ॥

तनुग्रास इति । तनुः स्वल्पः यो ग्रासः भोजनं तत्र सति । तनोः शरीरस्य ग्रासः काश्यं । असुग्रासे सुग्रासाभावे । असूनां प्राणानां ग्रासः मरणमित्यर्थः । तस्मात् सुष्ठु सुतरां च भोजनं यस्य तथा स्यात् । तेन जनः सुष्ठु भा कांतिः प्रतिभा च यस्य तादृशः [सुभः] स्यात् ॥ ५१८ ॥

देशस्थं—

अधितिष्ठन्नभिमानं व्यालस्यधरः शिरःस्थितर्णभरः ।
भूतिव्ययकृत्तिक्तकभक्षपरः शंकरोऽन्यदेशस्थः ॥ ५१९ ॥

मार्जारं—

अमृतैकलालसात्मा, विगतस्नेहः स्वकार्भकेष्वपि यः ।
गिरिकाननासनोऽयं, मार्जारः संयमीव मे भाति ॥ ५२० ॥

शृंगिणं वर्णयति—

शृंग्यर्भकोऽपि कुपितो घाताय महतां मतः ।
अचिरादेव यस्माप्तः पंचतां राजकुंजरः ॥ ५२१ ॥

धूम्रपत्री तमाखुरिति भाषायां । तां वर्णयति--

सुपर्णपरिशीलितो भवति साधुपूगाश्रितः
करोति सुदृढास्थितिं द्विजगणस्य सारान्वितः ।
सदा स्पृहयते सुधामिति बुधा गदाभृत्सम-
स्तमाखुरिति सेव्यतां न वितनोति रागं यतः ॥ ५२२ ॥

अधीति । अभिमानी । विशेषेण आलस्यधरः । शिरःस्थितऋणभरो ऋणे मग्नः । भूतेः संपत्तेः व्ययं करोति । तिक्त तेमनं भक्षं । 'भाकरी' इति लोके तत्र परः । अन्यदेशस्थ. 'बालेघाट्या' द्विजः शंकर इति । स हि अहंकाराधिष्ठितः रुद्र इति प्रसिद्ध । व्यालः सर्पः । शिरःस्थितः ऋणभरो जलभरो यस्य । गंगाधर इत्यर्थः । तिक्तकं कालकूट तद्भक्षणपर. । भूतेर्भस्मनः व्यय करोति । बहुभस्मधारित्वात् । अन्यच ऊर्ध्वे यो देशः कैलासस्तत्र तिष्ठति ॥ ५१९ ॥

अमृतेति । अमृते दुग्धे । स्वशिशून् भक्षयति । गिरिका बालमूषिकास्तासां अनाः प्राणास्तान् नाशयति । मशयोरैक्यं । अन्यत्र [संयमिपक्षे] । अमृते मोक्षे । स्वपुत्रेष्वपि ममताशून्यः । गिरौ कानने चासनं स्थितिर्यस्य ॥ ५२० ॥

शृंगीति । अर्भकोऽपि शृंगी वृषमहिषादिः कुपितो महतामपि प्राणिनां घाताय स्यात् । यतः राजकुंजरो महागजः पंचतां मरणं प्राप्तः स्यात् । **शृंगीनामा शमीकमुनिपुत्रस्तस्य शापेन राजकुंजरो नृपश्रेष्ठः परीक्षिन्मरणं प्राप्त** ॥ ५२१ ॥

सुपर्णेति । सुष्ठुपर्णानि ताम्बूलीदलानि तैः शीलितः सेवितः । साधु पूग पूगफलं । द्विजगणस्य दन्तानां दृढस्थितिं दाढर्यं । 'धूम्रपत्री दंतदाढर्यप्रदा पित्तकरी सरा (मता !) ' इति वैद्यकात् । सारः खदिरसारः । सुधा चूर्णं । अन्यत्र (गदाभृत्पक्षे) । सुपर्णो गरुडः । साधूनां सनकादीनां पूगः समूहः । द्विजानां स्थितिं पालन । सारं अराभिः सहितं चक्र । सुधा अमृतं । एवं गदाभृता विष्णुना समश्चेन्सर्वदा सेव्यः किन्न । यतः । राग रक्तिमान, स्नेहं च । विष्णुस्तु वैराग्यं तनोतीति भेद. ॥ ५२२ ॥

जर्दा--

जनार्दनो नरहितो भूत्वाऽऽकारविपर्ययात् ।
अवतीर्ण इव प्रायः स जर्देत्यभिधीयते ॥ ५२३ ॥
भर्तुः प्रियतमं वस्तु संगृह्णातु सदा सती ।
करोति यद्भ्रमवती विजयां निजसन्निधौ ॥ ५२४ ॥

सायंकालं--

संध्या प्रौढवधूरिनो व्रजति मां हित्वेति रागाकुला
पृष्ठे यास्यपि हस्तगो न स इति प्रायो विरक्ताऽभवत ।
तामिभिर्यमुनाजलैर्हरिपदं संस्नप्य दत्वा पुन-
र्मेघानिंदुमयास्तनोति परितस्ताराप्रसूनांजलिम् ॥ ५२५ ॥

कुक्कुरं—

मध्यऋतुसमय एव स्त्रियमुपगच्छत्यशेषभूतानाम् ।
यो जागर्ति निशायां शुनकः प्रतिभाति संयमीव मम ॥५२६॥

मत्कुणं—

यो रात्रिंचरशेखरः किल दशास्यः कोणपाल्याश्रयो
बलाबाधितशक्तिको नृरुधिरं पातुं सदा वांछति ।

जनार्दनेति । धूम्रपानेऽपेव एव्वाल्पवंगकशारपत्र्यादिमत्कृता **जर्दे**त्युच्यते । जनार्दनो नरेभ्यो हितः सन्नाकारस्याकारविपर्ययं कृत्वा रूपान्तरं गृहीत्वाऽव-तीर्ण इव । ' जनार्दनः ' ' न ' रहित नकारद्वयेन रहितः । ' जआर्द ' इति शिष्टं । तत्र ' आ ' कारस्य विपर्यासः कृतः । दकारोत्तरभावं गतश्चेत् ' जर्दा ' इति भवति ॥ ५२३ ॥

भर्तुरिति । **विजया** नाम सखी । पार्वत्याः **जयाविजयेति**, सखीद्वयं । वि-जया मदद्रव्यं ' भाग ' इति । सा च शंभोः प्रिया ' शांभवी ' इत्युच्यते ॥५२४॥

संध्येति । इनः सूर्यः, स्वामी च । हरिपदं विष्णुपदं, आकाशं च । रागः रक्तिमा, प्रेमा च । विरक्ता निर्विण्णा, रक्तिमहीना च ॥ ५२५ ॥

मध्येति । ऋतवः षट् । वसंतादयः । त एव समयस्तस्य मध्ये वर्षाश-रदृते । हेमंतशिशिरयोः समासेनेति पञ्चर्तुपक्षे वर्षासु मध्यर्तुसमय इत्यव्ययीभावः। ' तृतीयासप्तम्योर्बहुलम् ' इति नामभावः । ' पारे मध्ये षष्ठ्या वा ' इति एकारा-न्तनिपातनेऽपि तस्य सन्धिवशाल्लोपः । तादृशे काले मैथुनमाचरति । ' कुक्कुरो रात्रिजागरः संयमी ' । ' या निशा सर्वभूतानां तस्यां जागर्ति संयमी ' इति । भार्यां ऋतुसमयमध्य एव गच्छति । तेन ब्रह्मचर्यहानेरभावात् ॥ ५२६ ॥

य इति । रात्रिंचराणां मशकादीनां मध्ये शेखरः । अतिनिपुणत्वात् । दशा-

उन्मत्तो मधुयोगतो भवति यस्तन्मत्कुणो रावण-
स्तस्मान्नश्यति पुत्रपौत्रसहितः सीताभिसंधानतः ॥ ५२७ ॥

मैथुनं—

सततं सुरताभिकांक्षिणो बलिमुख्या अपि शुक्रबृंहिताः ।
असुराः क्षयमाशु भेजिरे मनुजानां पुनरत्र का कथा ॥ ५२८ ॥
स्त्रीणामल्पापराधानां नैव कार्यं गवेषणम् ।
अपराधस्थितिं स्वस्या (तासां) निर्ममे स्वयमीश्वरः ॥ ५२९ ॥

स्तनं—

पयोधरोद्गमस्यांतरंबरे प्रांशुभाविनः ।
चांचल्युपस्थितिः कर्णेनपस्वमधिगच्छति ॥ ५३० ॥
धाराधराणां किल वृष्टिपातो धराधराणां शिखरेषु पूर्वम् ।
तथैव यूनामपि दृष्टिपातः पयोधराणां शिखरेषु पूर्वम् ॥ ५३१ ॥
पयोधरघनीभावस्तावदंबरमध्यगः ।
आश्लेषोपगमस्तत्र यावन्नैव प्रवर्तते ॥ ५३२ ॥

कारो_वयवः आस्ये मुखे यस्य । यथा रक्तं शोष्यते । प्रशस्तः कोणः कोणपाली
' प्रशंसावचनैश्च ' इति समासः । सा आश्रयो यस्य । स्तंभकुड्यादीनां कोणेषु
वसति । वज्रेषु हीरकेषु अव्याहतशक्तिः । एतस्य रक्तेन हीरकाः स्फुटंतीति वज्र-
भस्मप्रकरणे वैद्यके स्तु । नृरुधिरं विना यस्य आहार एव नास्ति । मद्योश्ले-
ष्मस्य योगेन उन्मत्तो भवति । रावणपक्षे । रात्रिचरा राक्षसाः । दशमुखः । को-
णपाः राक्षसास्तेषां पाली पंक्तिस्तस्या आश्रयो यस्य । वज्रेण इंद्रायुधेन अव्या-
हता शक्तिर्यस्य । नृषु मद्यं । अत एव यथा रावणः सीताभिसंधानेन मत्कुणो
मृतः एवमन्यापि शीतकालस्याभिसंधाने सर्तीति ॥ ५२७ ॥

सततमिति । सुरता देवत्वं । बलिः एतन्नामा दैत्यः । शुक्रः शुक्राचार्यः ।
सुरत मैथुनं । बलिनः बलवन्तः । शुक्रं रेतः । तस्माद्बहुव्यवायो न कर्तव्यः ५२८

स्त्रीणामिति । अपराधस्य अधःस्थितिं रतिसमये ॥ ५२९ ॥

पयोधरेति । चंचलस्य भावश्चांचली । सा स्त्रीणां वस्त्रांतरे पयोधरोद्गमः
शीघ्रेणैव भविष्यतीत्यस्य सूचिका । यथा चंचला विद्युत्तस्या इयं चांचली उप-
स्थितिः आकाशे मेघोद्गमस्य सूचिका ॥ ५३० ॥

धारेति । स्पष्टं ॥ ५३१ ॥

पयोधरेति । पयोधरो मेघः, स्तनश्च । घनीभावः सांद्रता, काठिन्यं च ।
अंबरं नभः, वस्त्रं च । आश्लेषा नक्षत्रं, आलिंगनं च । आश्लेषानक्षत्रनिर्गमे
मेघा विरला भवंति । तथाऽन्यत्र शैथिल्यं भवति ॥ ५३२ ॥

पयोधरघनीभावस्तावदंबरमध्यगः।
हस्तलीलायितं तत्र यावन्नैव प्रवर्तते ॥ ५३३ ॥

प्रौढां प्रति भर्तुर्नर्मोक्ति—

सद्वृत्तं स्तनमंडलं यदभवत्तत्किं पुनः सांप्रतम्
दूरादेव बलंबते भवति न स्प्रष्टुं यमत्यादरः।
देवेनैव जघन्यकर्मणि बलादापीड्य संयोजितं
भूयो बालिशसंस्तवो बत ततः पातित्यमेयान्न किम् ५३४

स्तनौ तवाशेषतनौ तु बाले त्वधावतीवेति तदीयभाले।
कालेन लिप्त्वा जनदृष्टिभास्या प्रौस्या महस्या किमिवावृणोपि ५३५

वृद्धस्य भार्यो—

पुरुषस्य पुराणस्य द्वितीया युवतिस्तु या।
असौ वसुमती नैवेत्येवं हि कथमुच्यताम् ॥ ५३६ ॥

सर्वोत्तमस्यापि पुराणपुंसो योषिद्द्वितीया किल सारसाढ्या।
नूनं पतत्येव विचल्यमाना भुजंगराजस्य बतोत्तमांगे ॥ ५३७ ॥
पुराणपुंसो ललनाद्वितीया विचल्यमाना पतिता भुजंगे।

पयोधरेति। पूर्वार्धं सम। हस्तनक्षत्रस्य, करस्य च ॥ ५३३ ॥

सद्वृत्तमिति। सद्वृत्त उत्तमचरित्र, वर्तुलं च। यथा कथंचिदपि तं प्रति स्प्रष्टुं आदरो न भवति। स च दूरादवलंबते सन्निकर्षे न भजति। तद्वदिदं। कुतः। उत्तरं। देवेन परमेश्वरेण, भवता च। जघन्यकर्मणि नीचकृत्ये, रते च। योजितं तदनंतरं। बालिशस्य अज्ञस्य, बालस्य च। संस्तवः परिचयः तस्मात्पातित्यं कथं न स्यात्। तत्र च सति सर्वं संगच्छत एवेति ॥ ५३४ ॥

स्तनाविति। द्वयौ हृदि भवौ, मनोहरौ च ॥ ५३५ ॥

पुरुषेति। पुराणपुरुषो वृद्धः, विष्णुश्च। तस्य द्वितीया भार्या, भूदेवी च। वसुमती द्रव्यवती, पृथ्वी च। वृद्धस्य स्त्री तस्य सर्वस्वं स्वाधीनं कृत्वास्ते इति ५३६

सर्वोत्तमस्यापीति। सर्वोत्तमस्य गुणैः सपर्यया च। वृद्धस्य विष्णोश्च द्वितीया योषित् भूः सा रसा पृथ्वी आढ्या धनिका। किं च सारसाढ्या कमलाढ्या। 'कूर्मब्रह्मशिलारूढा नीलोत्पलकरद्वया' इति तद्ध्यानात्। किं च सारसाढ्या शृंगारेणाढ्या विचल्यमाना यदा तदा भुजंगराजस्य शेषस्य उत्तमांगे शिरसि पतिता। भुजंगा जारास्तेषां राज्ञः श्रेष्ठस्य उत्तमं अंगे पतति। या वृद्धस्य द्वितीया भार्या सा रसेन आढ्या सती विचल्यमाना चेद्व्यभिचारिणी भवति वा पतिता भुवि भवति वा ॥ ५३७ ॥

पुराणेति। कुनायकाः राजानः। ये केऽपि पुरुषास्तेऽपि एतादृशी या सा सर्वे

विलोड्यतेऽथापि कुनायकैः सा तस्साधु सर्वंसहतां बिभर्ति॥५३८॥

परस्त्रीपराङ्मुखं—

मामकं कौशलं दृष्ट्वा मा कार्षीः किलकिंचितम् ।
भुजंगेन विना भोगलाभो नैव भविष्यति ॥ ५३९ ॥

जरां—

ब्रवीम्यहं किं बहुशः कवीश्वरा
जरा नराणां सुतरां दुरासदा ।
यया यियासोरपि निर्जरेशितुः
पादेऽपि वेधो रचितो निजोचितः ॥ ५४० ॥

कायापक्षयहेतू जरे परं तत्र राक्षसी प्रवरा ।
या किंचिदपि शरीरं सुदृढतरं संदधाति स्म ॥ ५४१ ॥

सुप्रत्ययादजाद्याद्बहुशो भव्याकृतिर्ख्याता ।
सस्त्वेक एव हि जराकारं कुर्यादसाररचितम् ॥ ५४२ ॥

॥ इति संकीर्णं ॥

इंदोर्नैल्यमिदं वदंतु कवयो यत्किंचिदंकादिकं
सिद्धांतस्त्वमुनैव दृढप्रणिहितः श्रीकृष्ण आलोक्यताम् ।

सहत एव । या तु सती सात्वन्यकृतनर्मादि नितरां न सहते तया नेयं ॥५३८॥

मामकमिति । किलकिंचितं रागभयलज्जादिगुंफो रतेरभिव्यंजकः । भुजगेन जारेण, सर्पेण च । भोगो रतिः, सर्पदेहश्च ॥ ५३९ ॥

ब्रवीमीति । यियासोर्निजधाम गन्तुमिच्छोर्निर्जरेशितुः श्रीकृष्णस्य पादेऽपि यया जरया वेधः कृतः । जरा नाम व्याधः । सा आख्यायिका भागवते स्पष्टैव ५४०

कायेति । द्वे जरे शरीरनाशहेतू । यया राक्षस्या **जरया जरासंधस्य** जन्मना द्विधाभूतशरीरस्य शरीरं दृढतरं संहितं । अन्या जरा तु न तथा । दृढतरसंधानं न करोति ॥ ५४१ ॥

सुप्रत्ययेति । यो बहुशो भव्या कल्याणकारिणी आकृतिर्यस्य तस्य हरेर्ख्याता स एवैकः । अजाद्यात् । अजोऽहं अद्वयोऽहं इत्याद्यात्सुप्रत्ययात् उत्तमज्ञानात् । जराकारमसाररचितं तुच्छं कुर्यान्नान्यः । यथा यो बहुशो भावेदस्य येन मुखरूपत्वात् । 'मुखं व्याकरणं स्मृतं' इत्युक्तेः । तस्या व्याकृतेर्व्याकरणस्य ख्याता स्मर्ता । वैयाकरण इत्यर्थः । स एव अजाद्यात् स्वराद्यात् सुप्रत्ययात् सुप्संज्ञात् प्रत्ययात्, औजसादि रूपात् । जराकारं जराशब्दसंबंधिनमाकारमावर्णं । असाररचितं कुर्यात् । 'जराया जरसन्यतरस्याम्' इति सूत्रात् ॥ ५४२ ॥

इंदोरिति । चंद्रस्याभ्यंतरे यत्कृष्णं दृश्यते तद्विषये बहवो विवदंते । मम तु

नोचेज्जातमिमं नमेत्कथमयं द्रुह्यंति नास्मै ग्रहा
ईहंते किल यद्बलं सुमनसां श्रेष्ठः कुले चाच्युतः ॥ ५४३ ॥

तस्मात्—

ध्यातव्यं सर्वदा स्वत्पदमिति मम यश्चित्त आशांकुरोऽस्मिन्
बीजावापः कृपा ते रघुवर न परं किंचिदन्यद्विजाने ।
लोप्तुं दुर्वासनेयं शलभ इव मुहुः प्रेक्षते तत्कृपाब्धे
रक्षैनं स्वोप्तवृक्षानपि कृपणजना प्राय आप्याययंति ॥ ५४४ ॥

कवयः कथयत कोऽन्यः कृष्णात्करुणाकराद्विनैकस्मात् ।
करकमलकोरके स्वे कामं कुर्वीत नरकभीरुजनम् ॥५४५ ॥

मृत्यूदर्कादघाद्घोरात्त्रातुं मुग्धजनं प्राति ।
कतमो नाम कुशलो विना कृष्णं कृपार्णवम् ॥ ५४६ ॥
यत्कृपालेशवशतो मंदोऽपि धिषणायते ।
वंदे तं परमानंदकंदं श्रीनंद (रघु) नंदनम् ॥५४७॥

मम नाथ भवान् जननी जनकः सहजः सुहृदो गुरवो द्राविणम् ।
समुपेक्षत एव भवान्यदि मां वद यामि परं कमहं शरणम् ॥ ५४८ ॥

इयं स्वजननीमिति स्वयमिहाहृतां मत्कृतिं
वधत्छघुधियं पुनर्मयि महात्मतां चात्मनि ।

सिद्धांतोऽनेन द्विजराजेन हृदये श्रीकृष्ण एव प्रणिहितः । तेन कारणेनायं द्विती-
याया दृश्यमानमात्रं जना नमति । 'नास्मै ग्रहा द्रुह्यंति '। ' विधोर्नो रिपुः ' इति
वचनात् । सर्वग्रहानुकूल्येऽपि यस्य बलमवश्यमपेक्षते । देवाश्च कृष्णपक्षे यमापी-
य तुष्टाः पुष्टाश्च भवंति । वंशे च भगवदवतारः। एतादृक् सौभाग्यमन्यथा कथं
स्यादिति ॥ ५४३ ॥

अथात्र रामं प्रार्थयते । ध्यातव्यमिति । स्पष्ट ॥ ५४४ ॥

कवयइति । नरकाद्भय प्राप्नुवन्त जन कृष्ण विना को नु हस्ते कुर्यात् । न-
रकासुरेण बदीकृतं स्त्रीजनं च कः करे कुर्यात् । विवहेदित्यर्थः । तादृश. कृष्ण
एवेत्यर्थः ॥ ५४५ ॥

मृत्यूदर्कादिति । मृत्यु ससार उदर्क उत्तरफल यस्य तादृशादघात् पापात् ।
मुग्धजन अविद्वासं । त्रातु कृष्णाद्विनाऽन्यो नास्ति । यथा मरणप्रदादघासुरात् ।
मुग्धजन गोपशिशुजन ॥ ५४६ ॥

यत्कृपेति । स्पष्टं ॥ ५४७ ॥ ममेति । स्पष्टं ॥ ५४८ ॥

इयमिति । स्वस्य आत्मनः दुर्व्यस्य तदुपलक्षितप्रतिष्ठादेश्च जननी माता

यदेयादि महात्मनां सदसि योऽन्यदीयां पुमा-
नलक्ष्मणतया पितुः पितृकुटुंबिनीमप्यसौ ॥ ५४९ ॥
यस्य श्रीकरहाटकाभिधमहाक्षेत्रे निवासो महा-
देशो यस्य पिताऽच्युतांघ्रिनिरतो माता च गीताह्वया।
सर्वस्वं रघुनंदनांघ्रियुगुलं यस्यैहिकामुष्मिकं
ग्रंथेऽस्मिन्स निमित्तमात्रमभवत्पंतादिमो विठ्ठलः ॥ ५५० ॥
हृत्पुंडरीकांतरसंनिविष्टः श्रीरामचंद्रः कुलदैवतं मे।
यथा यथा प्रेरयदप्रमेयस्तथा तथाऽत्राचमिदं समग्रम ॥ ५५१ ॥
शालिवाहनभूपालशकेऽक्षाश्वाश्वभूमिते [१७७५]।
ग्रंथोऽयं ग्रथितः संतः पंतविठ्ठलशर्मणा ॥ ५५२ ॥

इति श्रीमद्राजाधिराजरघुनंदनसुंदरपदद्वंद्वारविंदमकरंदमिलिंदायमानमानसेन शांडिल्यकुलतिलकायमानेन पंतमहादेवनंदनेन गीताप-राभिधानवाराणसीगर्भसमुद्भवेन ब्रह्मण्याग्रगण्यपदव्यारूढश्रीनिवासपंडितप्रतिनिधिधर्मपरिषत्पुरुषप्रवरोज्ज्वलेन पंतविठ्ठलेन विरचितं सुश्लोकलाघव समाप्तम् ॥

उत्पादयित्री। अलक्ष्मणः दरिद्रः। अन्यदीया कालिदासबाणादीनां संबंधिनीं कस्य-चित् महादयास्य पितृकुटुंबिनी माता ॥ ५४९ ॥ यस्येति। स्पष्टं ॥ ५५० ॥
हृत्पुंडरीकेति। स्पष्ट ॥ ५५१ ॥ शालिवाहनेति। स्पष्टम् ॥ ५५२ ॥

इति श्रीमद्राजाधिराजरघुनंदनसुंदरपदद्वंद्वारविंदमकरंदमिलिंदायमानमानसस्य शांडिल्यकुलतिलकायमानस्य पंतमहादेवनंदनस्य गीतापराभिधानवाराणसीगर्भसमुद्भवस्य ब्रह्मण्याग्रगण्यपदव्यारूढश्रीनिवासपंडितप्रतिनिधिधर्मपरिषत्पुरुषप्रवरोज्ज्वलस्य पंतविठ्ठलस्य गुरोश्चरणशुश्रूषापरायणेन शिष्येण (नारायणेन) अनुलिखिता सद्वृत्तव्याख्या सुश्लोकलाघवव्याख्या समाप्ता. (शाके १७८९ प्रभवसंवत् कार्तिक शुद्ध ४ रवौ)

